बौधायनश्रौतसूत्रम्

THE BAUDHĀYANA ŚRAUTASŪTRA

VOLUME - II

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

The Baudhāyana Śrautasūtra together with an English translation is being presented here in four volumes. There will be other volumes also presenting Bhavasvāmin's bhāṣya and the word-index of the sūtra-text. The Baudhāyana Śrautasūtra belongs to the Kṛṣṇa Yajurveda Taittirīya recension. It represents the oral lectures delivered by the teacher Baudhāyana, hence is the oldest śrauta-text. The text is revised here in the light of the variant readings recorded by W. Caland in his first edition (Calcutta 1906), and is presented in a readable form. The *mantras* forming part of the *sūtras* have been fully rendered into English. The translation is supplied with notes giving reference to the *mantras* and explanations of the ritual. The work is expected to serve as an advancement of Taittirīya ritualistic studies.

बौधायनश्रौतसूत्रम्

THE BAUDHĀYANA ŚRAUTASŪTRA

कलामूलशास्त्र-ग्रन्थमाला

KALĀMŪLAŚĀSTRA SERIES

इ.गा.रा.क.के. क.मू.*शा* - ३६

I.G.N.C.A. *K.M.S.* - 36

बौधायनश्रौतसूत्रम्

THE BAUDHĀYANA ŚRAUTASŪTRA

CRITICALLY EDITED AND TRANSLATED
BY
C.G. KASHIKAR

VOLUME TWO

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS
NEW DELHI
AND
MOTILAL BANARSIDASS PUBLISHERS PVT. LTD.
DELHI

CONTENTS

ABBREVIATIONS

App	Apparently
ĀpŚS	Āpastamba Śrautasūtra
ĀśvŚS	Āśvalāyana Śrautasūtra
AV	Atharvaveda Saṁhitā
BaudhŚS	Baudhāyana Śrautasūtra
BhārŚS	Bhāradvāja Śrautasūtra
DhS	Dharma Sūtra
GS	Gṛhya Sūtra
JAOS	Journal of American Oriental Society
JBr	Jaiminīya Brāhmaṇa
JBRAS	Journal of Bombay Royal Asiatic Society
KauṣBr	Kauṣītaki Brāhmaṇa
KāṭhŚS	Kāṭhaka Śrautasūtra
KātyŚS	Kātyāyana Śrautasūtra
KS	Kāṭhaka Saṁhitā
MānŚS	Mānava Śrautasūtra
MS	Maitrāyaṇī Saṁhitā
MSS	Manuscripts
RV	Ṛgveda Saṁhitā
ṢaḍBr	Ṣaḍviṁśa Brāhmaṇa
ŚāṅkhGS	Śāṅkhāyana Gṛhya Sūtra
ŚBr	Śatapatha Brāhmaṇa
ŚS	Śāṅkhāyana Sūtra
ŚuS	Śulba Sūtra
TĀ	Taittirīya Āraṅyaka
TāṇḍBr	Tāṇḍya Brāhmaṇa
TBr	Taittirīya Brāhmaṇa
TS	Taittirīya Saṁhitā
VādhŚS	Vādhūla Śrautasūtra
VS	Vājasaneyi Saṁhitā
VSK	Vājasaneyi Saṁhitā Kāṇva

TEXT
AND
TRANSLATION

अग्निष्टोमेन यक्ष्यमाणो भवति। स उपकल्पयते कृष्णाजिनं च कृष्णविषाणां च वासश्च मेखलां च सैषा पृथ्वी वेणीकार्या भवति त्रिवृदेकत:पाशा द्वाविंशतिं च दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूलां च शरेषीकामौदुम्बरं च दण्डं चमसं च व्रतप्रदानं स्थालीं सशिक्यां समेक्षणाम्। एतानि त्रयोदश यजमान:। तावन्त्येव पत्नीमभितो भवन्ति कुम्बं च कुरीरं च वासश्च योक्त्रं चापरिमितानि च दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूला च शरेषीकाऽमृन्मयश्च पात्र: शङ्कुश्च स्थाली सशिक्या समेक्षणा। जुष्टे देवयजने शाला कारिता भवति। पुरोहविषि देवयजने याजयेदित्येतेषां यज्जोषयते। प्राचीनवंशा दिक्ष्वतीकाशा दक्षिणतो वर्षीयसी। तस्यै चतस्रो द्वार: कुर्वन्ति प्राचीं दक्षिणां प्रतीचीमुदीचीम्। दक्षिणतो व्रतश्रपणागारं कुर्वन्ति पश्चात्पत्नीशालम्। अथ यदि दूरे तीर्थं भवत्युत्तरेण शालां द्वौ कटपरिवारौ कुर्वन्ति पूर्वं यजमानायापरं पत्न्यै। तयो: प्राची द्वारौ कुर्वन्ति। तदुदकुम्भौ निधापयति। अथामावास्येन वा हविषेष्ट्वा नक्षत्रे वाऽरण्योरग्नीन्समारोह्य शालामभिप्रैति। उत्तरेण शालां परीत्य पूर्वया द्वारा शालां प्रपाद्य गार्हपत्यस्यायतने मथित्वाग्नीन्विहृत्य मध्यमे वंशे राजानं प्रग्रथ्नन्ति। परिस्तृणन्ति। दक्षिणत उपविशतो ब्रह्मा च यजमानश्च। अथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा सप्तहोतारं मनसाऽनुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वा-हेति। अपरं चतुर्गृहीतं गृहीत्वा यूपाहुतिं जुहोति यद्यत्र जुहोति। पूर्वाह्ण एवैतौ व्रतदुघयोर्वत्सौ बध्नन्ति। अथाभ्यां व्रतोपायनीयं पाचयति। तस्याशितौ भवत: सर्पिर्मिश्रस्य पयोमिश्रस्य। अथाध्वर्युस्तीर्थ्यान्सं-भारान्याचति।

CHAPTER - VI
AGNIṢṬOMA

VI.1

(The sacrificer) is going to perform the Agniṣṭoma sacrifice. He procures a skin of black antelope, a horn of a black antelope, a piece of cloth, a girdle—it is large, braided with three strands and with a noose at one end, twenty two bunches of darbha-blades, butter, collyrium, a blade of Śara-grass together with a panicle, a staff of *Ficus glomerata* and a goblet of *Ficus glomerata* for providing Vrata-milk, a vessel together with a sling and a stirring stick. These thirteen for the sacrificer. So many are by the side of the sacrificer's wife : a head-dress, a net of grass, a piece of cloth, a yoke-halter, a large number of bunches of darbha-blades, butter, collyrium, a blade of Śara-grass with a panicle; a pot made of a substance other than clay, and a vessel together with a sling and a stirring stick.

A shed is got constructed on an acquired sacrificial place selected out of those mentioned in the passage beginning with "one should cause a sacrifice to be performed in a sacrificial place which has *havis*[1] in the east." It should be having the central beam pointing towards the east, having openings towards the corners and higher towards the south. Four doors are provided for it—eastern, southern, western and northern. A chamber for boiling Vrata-milk is constructed towards the south, the chamber for the sacrificer's wife towards the west. If the water-place is at a distance, two mat-chambers are made towards the north—the eastern one for the sacrificer and the rear one for the sacrificer's wife. Doors facing the east are provided for them, two water-jars are caused to be deposited therein.

After having performed the New-moon sacrifice or having performed a sacrifice under (an auspicious) constellation and after having consigned the fires into the kindling woods, (the Adhvaryu) moves towards the (Prāgvaṁśa) shed. Having gone round along the north of the shed, having carried them (the kindling woods) into the shed through the eastern door, he churns out fire and spreads out the fires. (The load of) king (Soma) is tied to the central pole. Darbha-blades are strewn round (the fires). The Brahman and the sacrificer seat themselves towards the south. Having melted clarified butter over the Gārhapatya, having purified it, having taken four spoonfuls into the ladle, and having mentally gone along the Saptahotṛ formula, he makes an offering on the Āhavanīya with *svāhā* while the sacrificer has contacted (the Adhvaryu). Having taken up another four spoonfuls, he offers an oblation pertaining to the sacrificial post if he means to offer at this stage. The calves of the two Vrata-yielding (cows) are tied away in the afternoon

1. Sacred fire, water and sun, that is to say, from where one can gaze at the sacred fire, water and the rising sun. (cf. TS VI.2.6).

अथाहैहि यजमानेति । पूर्वया द्वारोपनिष्क्रम्य यत्रापस्त–द्यन्ति । अथास्य प्राङ्मुखस्य दक्षिणं गोदानमद्भिरुनत्ति ॥ १ ॥

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस इति । ऊर्ध्वाग्रं बर्हि-रनूच्छ्रयत्योषधे त्रायस्वैनमिति । स्वधितिं तिर्यञ्चं निदधाति स्वधिते मैनꣳ हिꣳसीरिति । प्रवपति देवश्रूरेतानि प्रवप इति । स्वस्त्युत्तराण्यशीयेत्युप्तान्तं प्रत्यभिमृशते । एतयैवावृतोत्तरं गोदानमद्भिरुनत्ति यजुषा वा तूष्णीं वा । नापिताय क्षुरं प्रयच्छन्नाह नापितोप्तकेशश्मश्रुं मे निकृत्तनखं प्रब्रूता-दिति । तं तथा प्राह । अथैनमद्भिरभिषिञ्चत्यापो अस्मान्मातरः शुन्धन्तु घृतेन नो घृतपुवः पुनन्त्विति । संप्रधाव्य रजः प्रप्लावयति विश्वमस्मत्प्रवहन्तु रिप्रमिति । उदेत्युदाभ्यः शुचिरा पूत एमीति । वसनस्यान्तेन प्रतिच्छाद्याप आचामति । अपो ऽश्नातीति ब्राह्मणम् । अथ प्रदक्षिणमहतं वासः परिधत्ते सोमस्य तनूरसि तनुवं मे पाहीति । अथास्यैतन्नवनीतं विचितमुदशराव उपशेते । तस्य पाणिभ्याꣳ संप्रम्लाय मुखमेव प्रथममभ्यङ्क्ते महीनां पयो ऽसि वर्चोधा असि वर्चो मयि धेहीति । अनुलोममा पादाभ्याम् । अन्यो ऽस्य पृष्ठमभ्यनक्ति । अथास्यैतदाञ्जनं पिष्टं दृषद्युपशेते सतूला च शरेषीका । तस्य प्राङ्मुखस्य प्रत्यङ्मुख उपविश्य सव्येन पाणिना दक्षिणमक्ष्यनक्ति वृत्रस्य कनीनिकासि चक्षुष्पा असि चक्षुर्मे पाहीति त्रिरनिधावम् । द्विरुत्तरम् । अप्यु पञ्च कृत्व आङ्क्ष इति ब्राह्मणम् । पञ्च कृत्व एव दक्षिणं पञ्च कृत्व उत्तरम् । अथैनमेकविꣳशत्या दर्भपुञ्जीलैः पवयति चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता

itself. He causes the Vrata-food to be cooked for them (sacrificer and his wife). They partake of it mixed with ghee and milk. The Adhvaryu asks for the substances relating to the bathing. Then he says, "Come, O sacrificer." Having gone out through the eastern door, they go to that place where there is water. He then moistens with water the hair above the right ear of the sacrificer sitting facing the east.

VI.2

With the formula, "May the water moisten for life, long life and glory."[1] He holds erect a darbha-blade with its tip above with the formula, "O plant, do thou guard him."[1] He holds across the razor with the formula, "O razor, do thou not injure him."[1] He shaves (his hair) with the formula, "Obedient to gods, I shave these (hair)."[1] (The sacrificer) touches the shaved portion with the formula, "May I accomplish the succeeding (rites) in a safe manner."[1] With the same procedure (the Adhvaryu) moistens the hair above the northern ear with the formula or without reciting the formula. Handing over the razor to the barber, he says, "O, shaver, do thou report to me when the hair and beard (of the sacrificer) have been shaven and the nails have been pared." (The barber) reports accordingly. Then (the Adhvaryu) sprinkles water over him with the formula, "May the waters, the mothers, cleanse us, may those who purify the clarified butter purify us with clarified butter."[1] Having cleansed (the sacrificer) he washes away the dirt with the formula, "May (the waters) wash away all impurity from us."[1] (The sacrificer) comes out (of water) with the formula, "I come out of these, clean and purified."[1] After having covered himself with the end of the garment, he sips water, "He sips water," so says the Brāhmaṇa.[2] He wears a new piece of cloth by the right with the formula, "Thou art the body of Soma; do thou guard my body."[1] Fresh butter collected in a pot filled with water lies near him. Having grasped it by means of the palms, he first anoints his mouth with the formula, "Thou art the milk of big (cows), thou art the giver of glory; place glory in me."[1] (He anoints) (other parts of his body) down to the feet. Somebody anoints his back.

The collyrium crushed on the mortar lies near him; also a blade of Śara-grass having a panicle. Having sat down facing the west in front of the sacrificer facing the east, (the Adhvaryu) anoints his right eye with his left hand with the formula, "Thou art the pupil of Vṛtra; thou art the guardian of the eye, do thou guard my eye."[3] Three times without moving (the grass-blade) backwards. Twice the left eye.

1. cf.TS.I. 2.1.1
2. cf. TS VI.1.1.3
3. cf. TS I.2.1.2

पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति । यजमानमतिवाचयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमिति । अथैनꣳ सव्ये पाणावभिपात्य शालामानयत्या वो देवास ईमहे सत्यधर्माणो अध्वरे यद्वो देवास आगुरे यज्ञियासो हवामह इति । पूर्वया द्वारा शालां प्रपादयतीन्द्राग्नी द्यावापृथिवी आप ओषधीरिति । अथैनमग्रेणाहवनीयं पर्याणीय दक्षिणत उदङ्मुखमुपवेश्याहवनीयमीक्षयति त्वं दीक्षाणामधिपतिरसीति । इह मा सन्तं पाहीत्यात्मानम् ॥ २ ॥

यावदेवात्राध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता पत्न्यै दक्षिणमुपपक्षमद्भिरुनत्ति तूष्णीम् । तूष्णीमूर्ध्वाग्रं बर्हिरनूच्छ्रयति । तूष्णीꣳ स्वधितिं तिर्यञ्चं निदधाति । तूष्णीं प्रवपति । तूष्णीमुप्तान्तं प्रत्यभिमृशते । एतयैवावृतोत्तरमुपपक्षमद्भिरुनत्ति तूष्णीमेव । नापिताय क्षुरं प्रयच्छन्नाह नापितोप्तोपपक्षां मे निकृत्तनखां प्रब्रूतादिति । तां तथा प्राह। अथैनामद्भिरभिषिञ्चति तूष्णीम् । तूष्णीꣳ संप्रधाव्य रजः प्रप्लावयति तूष्णीम् । अद्भिरुदेति तूष्णीम् । वसनस्यान्तेन प्रतिच्छाद्याप आचामति । तूष्णीं प्रदक्षिणमहतं वासः परिधत्ते । तूष्णीमभ्यङ्क्ते । तूष्णीमाङ्क्ते । अथैनामपरिमितैर्दर्भपुञ्जीलैः पवयति तूष्णींतूष्णीमेव । अथैनामानीयापरया द्वारा शालां प्रपाद्य प्राचीमुदानयन्वाचयति प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु । अथाहमनुकामिनी स्वे लोके विशा इहेति । अथ जघनेन गार्हपत्यमुपसीदति सुप्रजसस्त्वा वयꣳ सुपत्नीरुपसेदिम । अग्ने

"He anoints five times," so says the Brāhmaṇa.[4] Five times the right eye, five times the left one. He purifies him with twentyone clusters of darbha-blades with the formula, "May the lord of thought purify you; may the lord of speech purify you; may god Savitṛ purify you by means of the flawless purifier, by means of the rays of the bright sun."[3] He makes the sacrificer pronounce the formula, "O lord of the purifier, may I be able (to obtain) with thy purifier that for which I purify myself."[3] Having grasped him by the left hand, he brings him in the shed with the formula, "O gods who have true ordinances, we approach you at the sacrifice while, O gods, we, desirous of performing a sacrifice, call you for approval."[4] He makes him enter the shed through the eastern door with the formula, "Indra-Agni, Dyāvāpṛthivī, waters and plants."[3] Leading him along the Āhavanīya and having seated him towards the south facing the north, he makes him gaze at the Āhavanīya with the formula, "Thou art the lord of consecrations."[3] Towards himself with the formula, "Guard me being here."[3]

VI.3

While the Adhvaryu is functioning, the Pratiprasthātṛ moistens the right armpit of the sacrificer's wife without reciting any formula. He holds silently a darbha-blade with its tip upwards. He holds the razor across silently. He shaves silently. He touches the shaven region silently. With the same procedure he moistens the left armpit silently. Handing over the razor to the barber, he says, "O barber, report to me when the armpits (of the sacrificer's wife) have been shaven and nails have been pared." He reports accordingly. He sprinkles water over her silently. Having cleansed her, he washes away the dirt silently. She comes out of the water silently. Having covered herself with the border of the garment, she sips water. She wears a new garment by the right silently. She applies fresh butter silently; puts collyrium silently.

(The Adhvaryu) purifies her with a large number of clusters of darbha-blades each time silently. Having led her, and having made her enter the shed through the western door and leading her towards the east, he makes her recite while leading her towards the east, the verse "Let the Brahman's wife go forward; let her sit on the Mahāvedi with fair colour so that I, aspiring for the fulfilment of a desire, may sit here on my seat."[1] She sits down to the rear of the Gārhapatya with the verse, "With fair offspring, with a noble husband we have come to thee O Agni, to thee that deceivest the foes the undeceivable we that are not deceived."[2]

4. cf. TS VI.1.1.6

1. cf. TS III 5.6.1
2. cf. TS I.1.10.1

सपत्नदम्भनमदब्धासो अदाभ्यमिति । अथ पृष्ठ्याः स्तीर्त्वापः प्रणीयाग्नावैष्णवमेकादशकपालं दीक्षणीयामिष्टिं निर्वपति । तस्यै दशतयमुत्सीदति न यजमानं व्रतमुपनयति न पत्नीः संनह्यति न यजमानभागं करोति न ब्रह्मभागं न बर्हिषदं पुरोडाशं करोति नान्वाहार्यं याचति न फलीकरणहोमेन चरति न समिष्टयजुर्जुहोति न पूर्णपात्रे यजमानं वाचयति न विष्णुक्रमान्क्रमते । अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य पत्नीः संयाज्य प्राडेत्य ध्रुवामाप्याय्याज्यस्थाल्यां प्रत्यवनीयाज्यस्थाल्याः स्रुवेणोपघातं दीक्षाहुतीर्जुहोति ॥ ३ ॥

आकूत्यै प्रयुजे ऽग्नये स्वाहा मेधायै मनसे ऽग्नये स्वाहा दीक्षायै तपसे ऽग्नये स्वाहा सरस्वत्यै पूष्णे ऽग्नये स्वाहेति । अथ स्रुचि चतुर्गृहीतं गृहीत्वा स्रुचा पञ्चमीं जुहोत्यापो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहेति । अपरं चतुर्गृहीतं गृहीत्वाज्यस्य पूर्णाः स्रुचमौदग्रहणं जुहोति विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यम् । विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहेति । अत्रैतत्पूर्णपात्रमन्तर्वेदि निनयति । अथाग्रेणाहवनीयं पर्याहृत्य यजमानाय प्रयच्छति कृष्णाजिनं च कृष्णविषाणां च वासश्च मेखलां चौदुम्बरं दण्डं पञ्चममुष्णीषः षष्ठम् । अथ प्रतिप्रस्थाता पत्न्यै प्रयच्छति कुम्बं च कुरीरं च वासश्च योक्त्रं च शङ्कुं च ॥ ४ ॥ प्रथमः ॥

अथ यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तस्य शुक्लकृष्णे संमृशति शुक्ले ऽङ्गुष्ठो भवति कृष्णे ऽङ्गुलिर्ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृच इति । अथ दक्षिणं

Having strewn the Pṛṣṭhyā line, and having carried forth (Praṇītā) water (the Adhvaryu) performs the Dīkṣaṇīyā Iṣṭi (for which) he pours out paddy for a cake on eleven potsherds for Agni-Viṣṇu. In this Iṣṭi he drops out ten rites: he does not administer the vow to the sacrificer, does not girdle the sacrificer's wife, does not provide the sacrificer's portion (of the cake), nor the Brahman's portion, does not put down the cake on the sacrificial grass, does not ask for the Anvāhārya cooked rice, does not offer the chaff of grains, does not offer the Samiṣṭayajus, does not cause the sacrificer to recite the mantra pertaining to (the pouring down of) the Praṇītā-goblet, (the sacrificer) does not stride the Viṣṇu-steps. The Adhvaryu, having turned by the right, moving to the west, having made the Patnīsaṁyāja offerings, having moved towards the east, having filled the Dhruvā-ladle, and having poured it back into the vessel of clarified butter, makes the Dīkṣāhuti-offerings each time taking a spoonful from the vessel of clarified butter with the formulas.

VI.4

"To the purpose, to the impulse to Agni svāhā; to wisdom, to thought, to Agni svāhā; to consecration, to penance to Agni svāhā; to Sarasvatī, to Pūṣan, to Agni svāhā."[1] Having taken four spoonfuls into the ladle, he makes the fifth offering by means of the ladle with the verse, "O you divine, vast, all-soothing waters, Dyāvā-pṛthivī and wide midregion, may Bṛhaspati rejoice in our oblation svāhā."[1] Having taken up another four spoonfuls, he offers the Pūrṇāhuti, the *audgrahaṇa*, with the verse, "Let every man choose the friendship of the god who leads. Everyman prays for wealth; let him choose glory that he may prosper, svāhā."[1] At this stage he pours the Pūrṇapātra within the altar.

After having brought (the things) along the front of the Āhavanīya, he hands over to the sacrificer the skin of black antelope, horn of black antelope, the garment, the girdle, the staff of Udumbara as the fifth and the turban as the sixth. The Pratiprasthātṛ gives to the sacrificer's wife, the net of grass, the head-dress, garment, girdle and a pin.

VI.5

(The Adhvaryu) spreads on the sacrificer's seat the skin of black antelope with its neck towards the east and hairy side upwards. (The sacrificer) touches together the white and black parts—the thumb on the white part and the finger on the black, with the formula, "You are the images of the Ṛk and the Sāman. I grasp you two. Do

1. cf. TS I 2.2.1

जान्वाच्याभिसर्पतीमां धियꣳ शिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳशिशाधि । ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावꣳ रुहेमेति । अथोपस्थं कृत्वा प्रदक्षिणं मेखलां पर्यस्यत्यूर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छेति । पाहि मा मा मा हिꣳसीरिति निष्टर्क्यं ग्रन्थिं ग्रथ्नाति । एतस्मिन्काले प्रतिप्रस्थाता योक्त्रेण पत्नीꣳ संनह्यत्याशासाना सौमनसꣳ सं त्वा नह्यामीति द्वाभ्याम् । अथ यजमानं वाससा प्रोर्णोति विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छेति । वसनस्यातीकाशेषु वाचयति नक्षत्राणां मातीकाशात्पाहीति । प्रतिकृष्य वसनस्यान्तान्प्रदक्षिणमुष्णीषेण शिरो वेष्टयति श्रिया ते शिरो वेष्टयामि श्रियै यशसे ब्रह्मवर्चसायेति । एतस्मिन्काले प्रतिप्रस्थाता पत्न्यै कुम्बकुरीरमध्यूहति तूष्णीम् । अथास्यैषा कृष्णविषाणा त्रिवलिर्वा पञ्चवलिर्वा शाण्या रज्ज्वा परितृण्णा मण्डचरवद्विग्रथिता । तां यजमानाय प्रयच्छतीन्द्रस्य योनिरसीति । मा मा हिꣳसीरिति यजमानः प्रतिगृह्णाति । तां वसनस्यान्तमायां दशायां बद्ध्वा तयान्तर्वेदि लोष्टमुद्धन्ति कृष्यै त्वा सुसस्याया इति । सुपिप्पलाभ्यस्त्वौषधीभ्य इति दक्षिणं गोदानं कण्डूयते । एतस्मिन्काले प्रतिप्रस्थाता पत्न्यै शङ्कुमाबध्नात्येतेन कण्डूयस्वेति । अथास्मा ऊर्ध्वाग्रमौदुम्बरं दण्डं प्रयच्छति मुखेन संमितꣳ सूपस्था देवो वनस्पतिरिति । ऊर्ध्वो मा पाह्योदृच इति यजमानः प्रतिगृह्णाति । अथैनं यज्ञस्यान्वारम्भं वाचयति स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्तरिक्षात्स्वाहा यज्ञं वातादारभ इति । अत्र मुष्टी करोति वाचं यच्छति । अथाहादीक्षिष्टायं ब्राह्मणो ऽसावित्थंगोत्रो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता

you protect me until the completion of the sacrifice."[1] Having bent the right knee, he moves upon it with the verse, "Do thou sharpen, O Varuṇa, this prayer of him who implores thee; sharpen his strength, his insight. May we mount that safe ship whereby we may pass over all our difficulties."[2] Having sat cross-legged, he moves around his cord towards the right with the formula, "Thou art the strength of Aṅgirases, soft as wool, grant me strength."[2] With the formula, "Do thou guard me, do not injure me," he ties a loose knot.

At this juncture the Pratiprasthātṛ ties the girdle round the waist of the sacrificer's wife with the two verses, "Beseeching favour, offspring, prosperity and (good) form, I, observing the vow in connection with Agni, gird myself for good action."[3] "I fasten thee with milk and clarified butter, I fasten thee (with) water and with plants; I fasten thee today with offspring; do thou who hast been consecrated, give us strength."[4] He covers the sacrificer with the garment with the formula, "Thou art the protection of Viṣṇu, the protection of the sacrificer; grant me protection."[5] With regard to the cavities of the garment he makes the sacrificer recite the formula, "Do thou guard me from the lustre of stars."[5] Folding the ends of the garment, he covers round his head with the turban with the formula, "I cover round thy head with glory for glory, honour and Brahman-splendour." At this juncture, the Pratiprasthātṛ sets the net of grass and head-work on the sacrificer's wife silently. This horn of black antelope intended for the sacrificer has three curves or five curves, is pierced with a string of *cannabis sativa* and tied round like a cord joining the angle to a pole.[6] He hands it over to the sacrificer with the formula, "Thou art the womb of Indra."[5] The sacrificer accepts it with the formula, "Do thou not injure me."[5] Having fastened it to the last fringe of the garment, he digs out a clod within the altar with the formula, "(I dig) thee for fruitful cultivation."[7] With the formula, "(I scratch) thee for plants bearing good fruit,"[7] he scratches the region of head above the right ear.

At this juncture, the Pratiprasthātṛ ties a pin for the sacrificer's wife saying "Do thou scratch with this." He hands over to him (the sacrificer) a staff of Udumbara with its tip upwards, as high as his mouth with the formula, "The divine tree is of good shoot."[7] The sacrificer receives it with the formula, "Being erect, do thou guard me until the completion (of the sacrifice)."[7] The Adhvaryu makes him recite

1. cf. TS I.2.2.1
2. cf TS I. 2,2.2
3. cf. TS I.I.10.1
4. cf. TS III.5.6.1
5. cf. TS I.2.2.2
6. cf. Bhavasvamin's bhāṣya : *lāṅgalapāśavad baddhā*
7. cf. TS I.2.2.3

तमिन्द्रायेन्द्राग्निभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यश्च सोमपेभ्यः प्रब्रूम इति । त्रिरुपाꣳश्वाह । देवेभ्य एवैनं प्राह । त्रिरुच्चैरुपनिष्क्रम्य । उभयेभ्य एवैनं देवमनुष्येभ्यः प्राहेति ब्राह्मणम् । अथैनꣳ सꣳशास्ति ॥ ५ ॥

दीक्षितोऽसि दीक्षितवादं वद सत्यमेव वद मानृतं मा स्मयिष्ठा मा कण्डूयता मापावृथा यदि स्मयासा अपिगृह्य स्मयासै यदि कण्डूयासै कृष्णविषाणया कण्डूयासै यदि वाचं विसृजेर्वैष्णवीमृचमनुद्रवतान्मा त्वान्यत्र दीक्षितविमितात्सूर्यो ऽभ्युदियान्माभिनिम्रुक्ताद्यानि देवतानामानि यथाख्यातं तान्याचक्ष्वाथ यान्यदेवतानामानि यथाख्यातं तान्याचक्षाण उपरिष्टाद्विचक्षणं धेहि चनसितवतीं विचक्षणवतीं वाचं वद कृष्णाजिनान्मा व्यवच्छेत्था दण्डाच्चेति । स एवमेवैतत्सर्वं करोति । अथोपसमिन्धन-वेलायामुत्तरेणाहवनीयं तिष्ठन्संप्रैषमाहाग्नीज्ज्योतिष्मतः कुरुत दीक्षित वाचं यच्छ पत्नि वाचं यच्छेति । संप्रेष्य वाचंयमयोर्व्रते दोहयतः । अथाध्वर्युः पूर्वया द्वारोपनिष्क्रम्य दोहयित्वैतेनैव यथेतमेत्य गार्हपत्ये ऽग्निहोत्रविधिं चेष्टित्वा तप्त्वोदगुद्वास्य शीतीकृत्वातच्य वानातच्य वोत्तरे शालाखण्डे शिक्य आसजति । अथ प्रतिप्रस्थाता दक्षिणया द्वारोपनिष्क्रम्य दोहयित्वैतेनैव यथेतमेत्य व्रतश्रपणे तप्त्वोदगुद्वास्य शीतीकृत्वातच्य वानातच्य वा दक्षिणे शालाखण्डे शिक्य आसजति । अथोदितेषु नक्षत्रेषु यजमानः कृष्णाजिनमासज्य पूर्वया द्वारोपनिष्क्रम्याग्रेण शालां तिष्ठन्भूर्भुवः सुवर्व्रतं कृणुत व्रतं कृणुतेति त्रिर्वाचं विसृजते । अथातिथीनामुपस्था-

the grasping formula, "Svāhā from the spirit, svāhā from Dyāvāpṛthivī, svāhā from wide midregion, svāhā I grasp the sacrifice from the wind."[7] At this stage (the sacrificer) closes his fists; he restrains speech. Now the Adhvaryu announces, "Consecrated has been this brāhmaṇa N.N., belonging to the gotra N.N., son of N.N., grandson of N.N. great grandson of N.N. We announce him to Indra, Indra-Agni, Vasus, Rudras, Ādityas, Viśve Devas, and the brāhmaṇas who have drunk Soma." Thrice he utters in a low tone. Thus, he announces to the gods. Having gone out, thrice loudly. "He announces both to the gods and to men."[8] So says the Brāhmaṇa. Then he instructs him.

VI.6

"You are consecrated. Speak befitting the conscerated. Speak truth alone; not untruth. Do not smile. Do not scratch yourself. Do not expose yourself. If you have to smile, smile (with you mouth) covered. If you have to scratch yourself, scratch with the horn of black antelope. If you have to release speech, follow it with a verse addressed to Viṣṇu. Let the sun not rise nor set while you are away from the apartment meant for the consecrated. Those words which denote the names of divinites, mention them as they may be. Those words which do not denote names of divinities, mentioning them as they are, utter the word *vicakṣaṇa* subsequently. Utter speech (preceded and succeeded respectively) by *canasita* and *vicakṣaṇa*. Do not become separate from the skin of black antelope and from the staff." He abides by all this.

At the time of inflaming the fires, standing to the north of the Āhavanīya, (the Adhvaryu) gives out the call; "Render the fires flagrant; O consecrated, do you restrain speech; O sacrificer's wife, do you restrain speech." After the call, the Vrata-milks of the two who have restrained speech are caused to be milked. The Adhvaryu, having gone out by the eastern door, having caused the milk to be milked, having returned by the passage by which he had gone, having gone through the procedure in respect of the Gārhapatya as at the Agnihotra rite, having boiled the milk, having taken it down towards the north, having allowed it to cool down, having it coagulated or not coagulated, hangs it in a loop in the northern part of the shed. The Pratiprasthātṛ, having gone out by the southern door, having caused the milk to be milked, having returned by the same passage by which he had gone, having boiled it on the fire intended for boiling, having taken it down towards the north, having allowed it to cool down, having it coagulated or not coagulated, hangs it in a loop in the southern part of the shed.

8. cf. TS VI.1.4.3

मेति। चनसितवतीं विचक्षणवतीं वाचं वदति। स यद्यु हामेध्यमुपाधिगच्छति तज्जपत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा हासीरिति। अथ यद्येनमभिवर्षत्युन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्येवं तत्र जपति। तस्यैते यजुषी परिप्लवे आ सꣳस्थायै भवतः। अथास्मै निपतः काले यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति। स यदि बहुतयमुपस्तीर्णं भवति कृष्णाजिनादेवानन्तर्हितः संविशति। अथ संवेशनयजुर्जपति ॥ ६ ॥

अग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि। गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददं इति। दक्षिणतः शय एतद्वै यजमानस्यायतनꣳ स्व एवायतने शये ऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शय इति ब्राह्मणम्। अथैषा पत्नी जघनेन गार्हपत्यꣳ संविशति तूष्णीम्। अथाध्वर्युर्मध्यरात्र आद्रुत्य प्रबुद्धयजुर्वाचयति त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्य इति। अथाप आचामति दैवीं धियं मनामहे सुमृडीकामभिष्टये। वर्चोधां यज्ञवाहसꣳ सुपारा नो असद्वश इति। अथास्मै कꣳसे वा चमसे वा निःषिच्य व्रतं प्रयच्छति। तद्दक्षिणतः परिश्रित्य व्रतयति ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नो ऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहेति। यजुषा यावन्मात्रं व्रतयित्वा तूष्णीं भूयो व्रतयति। एतस्मिन्काले प्रतिप्रस्थाता पत्न्यै पात्रे निःषिच्य व्रतं प्रयच्छति। तत्सा परिश्रित्य व्रतयति तूष्णीं। निर्णिज्य पात्रे प्रयच्छतः। अथ तथैव पुरा नक्षत्राणामन्तर्धानात्संप्रेष्य वाचंयमयोर्व्रते दोहयतः।

After the stars have arisen, the sacrificer, having suspended the skin of black antelope and having gone out by the eastern door, and standing in front of the shed, utters *Om bhūr bhuvaḥ svaḥ* and thrice says, "Do you procure *Vrata*-milk," and thus releases speech. Then he meets the guests. He utters speech preceded and succeeded respectively by *canasita* and *vicakṣaṇa*. If he comes across any impure object, he murmurs the formula, "My mind is not firm and my sight wretched; the sun is the most excellent of all luminaries, O consecration, do not abandon me."[1] If it rains upon him he murmurs the formula," (O waters) wetting, give me strength, give me vigour, give strength, do not ruin my consecration and my penance." These two formulas are to be murmured by him at such mishaps until the conclusion (of the sacrifice). At the time of lying down one spreads for him the skin of black antelope with its neck towards the east and hairy side upwards on the sacrificer's place. Even if many things are spread out, he (the sacrificer) lies down unseparated from (that is, directly upon) the skin of black antelope. He murmurs the formula for lying down.

VI.7

"O Agni, do thou be well awake, may we well rejoice. Guard us for prosperity; give us back to awakening."[1] "He lies down towards the south. This is the sacrificer's place. He lies down in his own place. He lies down turning towards the fire. He lies down turning towards the gods and sacrifice." So says the Brāhmaṇa. The sacrificer's wife lies down silently to the rear of the Gārhapatya. The Adhvaryu, having approached at midnight, makes the sacrificer recite the yajus pertaining to awakening, "O god Agni, thou art guardian of ordinance among the mortals; thou art worthy of being honoured in sacrifice."[1] The sacrificer sips water with the verse, "We meditate, for our help, upon the divine thought which is merciful, giving splendour and carrying the sacrifice. May it lead us safely according to our will."[1] (The Adhvaryu) gives him *vrata*-milk pouring it into a bronze-vessel or a goblet. Being curtained off, he consumes it towards the south with the formula, "May the gods who are born of mind, employing the mind, the wise, sons of the wise, guard us, protect us. Obeisance to them; svāhā to them."[1] Having consumed a little with the formula, he consumes more silently. At this time the Pratiprasthātṛ, pouring *vrata*-milk in a pot gives it over to the sacrificer's wife. Being curtained off she consumes it silently. They give over the pots having cleansed them. Similarly, prior to the disappearance of stars, (the Adhvaryu and Pratiprasthātṛ) giving calls, cause the *vrata*-milk to be milked.

1. cf. TS III.1.1.2

1. TS I. 2.3.1

अथोदित आदित्ये यजमानः कृष्णाजिनमासज्य पूर्वया द्वारोपनिष्क्रम्याग्रेण शालां तिष्ठन्भूर्भुवः सुवर्व्रतं कृणुत व्रतं कृणुतेति त्रिर्वाचं विसृजते। समानो वाचो विसर्गः समानꣳ संवेशनयजुः समानं प्रबुद्धयजुः समानमपामाचमनꣳ समानं व्रतनम्। अथ सनीहारान्प्रहिणोति। स यं मन्यते न मा प्रत्याख्यास्यतीति तं प्रथममभि प्रहिणोति विश्वे देवा अभि मामाववृत्रन्पूषा सन्या सोमो राधसा देवः सविता वसोर्वसुदावेति। आहरन्तं दृष्ट्वा जपति नानाहरन्तꣳ रास्वेयत्सोमा भूयो भर मा पृणन्पूर्त्या वि राधि माहमायुषेति। स यथारूपं प्रतिगृह्णाति॥ ७॥

चन्द्रमसीति हिरण्यम्। वस्त्रमसीति वासः। उस्रासीति गाम्। हयोऽसीत्यश्वम्। छागोऽसीति छागम्। मेषोऽसीति मेषम्। अथ यद्ब्राह्मणेनानादिष्टं भवति प्राजापत्यमसि मम भोगाय भवेत्येव तत्प्रतिगृह्णाति। ताः समुदायुत्य रक्षन्ति। तासां या नश्यति वा म्रियते वा वायवे त्वेति तामनुदिशति। याप्सु वा पाशे वा वरुणाय त्वेति ताम्। या सं वा शीर्यते गर्तं वा पतति निर्ऋत्यै त्वेति ताम्। यामहिर्वा व्याघ्रो वा हन्ति रुद्राय त्वेति ताम्। तासां तिस्रः पराच्यः। अथ येयं नष्टा यदि विन्देयुः कथꣳ स्यादिति। एतदनुदिष्टैव स्यादित्येतदेकम्। कमस्या अतः श्रेयाꣳसं प्रतिग्रहीतारं लभेत। दक्षिणाभिरेवैनाꣳ सह दद्यादित्येकम्। वायव्ययैवैनया यजेतेत्येतदपरम्॥ ८॥ द्वितीयः॥

अथातः प्रयाणस्यैव मीमाꣳसा। दीक्षितं वायोगक्षेमो विन्दत्यन्यत्र वा देवयजनाद्दीक्षते सꣳसृजन्ति व्रते। संबध्नन्ति व्रतदुघयोर्वत्सौ। आदधति यदाधेयं भवति नीडे गार्हपत्यं प्रउग आहवनीयम्। अपि वारण्योरग्नीन्समारोह्य बृहस्पतिवत्यर्चा प्रयाति भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्विति। अथ यद्येनं यान्तं व्रतनवेलोपा-

At sunrise the sacrificer, suspending the skin of black antelope, having gone out by the eastern door, standing in front of the shed, utters *bhūr bhuvaḥ suvaḥ* and thrice says, "Do you procure *vrata*-milk" and thus releases speech. The mantra for release of speech is similar, the formula for lying down is similar, the formula for getting up is similar, the formula for sipping water is similar, and the formula for consuming milk is similar. He then sends away the bringers of wealth. He first sends one to such a person about whom he thinks that he would not reject me, with the verse "All gods have turned towards me, Pūṣan with wealth, Soma, with bounty, god Savitṛ granting treasure."[1] Seeing one bringing wealth, not one who is not bringing, he murmurs "Give Soma this much, bring still more providing me with abundance; may I not be deprived of long life." He receives as the case may be.

VI.8

Gold with "Thou art brilliant (be for my use),"[1] piece of cloth with "Thou art piece of cloth;"[1] a cow with "Thou art a cow;"[1] a horse with "Thou art a horse;"[1] a goat with "Thou art a goat,"[1] a sheep with "Thou art a sheep;"[1] that which is not mentioned in the Brāhmaṇa, he receives with the formula, "Thou belongest to Prajāpati; do thou be for my use." Bringing together, they guard them. Out of them, which is lost or dies, he points "To Vāyu thee."[1] That which (dies) in water or while being in bond, (he points) "To Varuṇa thee."[1] That which perishes or falls in a pit (he points) "To Nirṛti thee."[1] That whom a serpent or tiger kills (he points out) "To Rudra thee."[1] Three out of these are gone for ever. If they regain one which was lost, what should be done ? It should remain as assigned. This is one view. What better receiver one can avail of? One should give it away together with the Dakṣiṇās. This is one view. One should offer her in a sacrifice to Vāyu. This is another view.

VI.9

Now the discussion about departure. If the initiated meets with absence of means of livelihood, or if he is initiated at a place other than the sacrificial place, the *Vrata*-milks (of the sacrificer and his wife) are hung together. The calves of the cows yielding *Vrata*-milk are fastened together. Whatever is to be loaded, is placed (in the bullock-cart), the Gārhapatya in the seat (of the cart), the Āhavanīya on the yoke, or having consigned the fires into the kindling woods, he moves with the verse addressed to Bṛhaspati: "Do thou go to better from the good, may Bṛhaspati be thy

1. TS I 2.3.2

1. TS. III.1.1.3

धिगच्छत्युत्तरतो ऽरणी निधाय दक्षिणतः परिश्रित्य व्रतयति । तूष्णीं तृणोदकायावस्यति । अथ यद्यपर्याणा अप उपाधिगच्छति तज्जपति देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं वो मावक्रमिषमच्छिन्नं तन्तुं पृथिव्या अनु गेषमिति । सं वा गाहते सं वा तरति । सेतुमेव कृत्वात्येतीति ब्राह्मणम् । अथ यत्र वत्स्यन्भवति तदवस्यत्यथेमव स्य वर आ पृथिव्या इति । अथादित्यमुद्यन्तमुपतिष्ठत आरे शत्रून्कृणुहि सर्ववीर इति । अथ यत्र यक्ष्यमाणो भवति तदवस्यत्येदमगन्म देवयजनं पृथिव्या इत्यान्तादनुवाकस्य ॥ ९ ॥

अथातः क्रयस्यैवोपवसथः पर्याप्लवते । स उपकल्पयते चन्द्रं च छागां च कृष्णबलक्ष्यावूर्णास्तुके उष्णीषं द्वे वाससी द्वे कृष्णाजिने सोमक्रयणीꣳ सैषारुणा पिङ्गलैकहायनी भवति सोमवाहनावनड्वाहौ सोमवाहनमनः प्रक्षालितमुद्धृतफलकꣳ रोहितं चर्मानडुहं द्वयमिध्माबर्हिः कार्ष्मर्यमयान्परिधीनाश्ववालं प्रस्तरमैक्षवी विधृती स्थालीं पद्धरणीमꣳशुग्रहणꣳ हिरण्यमौदुम्बरीꣳ राजासन्दीं तस्यै नाभिदघ्नाः पादा भवन्त्यरत्निमात्राणि शीर्षाण्यनूच्यानि । सा मौञ्जीभी रज्जुभिर्व्यूता भवत्येकसराभिः । मनाग्वर्षीयसीमिव सम्राडासन्दीं यदि प्रवर्ग्यवान्सोमो भवति । अथाध्वर्युरपररात्र आद्रुत्य सꣳशास्ति त्रिस्तनव्रतं दोहयतेति । प्रातरुदित आदित्ये विसृष्टायां वाच्यग्रेण शालां तिष्ठन्देवयजनमध्यवस्यति यदि पुरस्तादनध्यवसितं भवति । अथाहैहि यजमानेति । पूर्वया द्वारा शालां प्रपाद्य पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयादित्यं चरुं प्रायणीयामिष्टिं

forerunner."[1] If the hour of consuming *Vrata*-milk comes while he is passing, having deposited the two kindling woods towards the north, and having put an enclosure towards the south, he consumes the *Vrata*-milk. He makes a halt silently for (providing the oxen with) grass and water. If he meets with uncrossable waters, he murmurs the formula, "O divine waters, son of the waters, may I not travel upon the stream of yours which is worthy of oblation, mighty and most exhilarating. May I go along an unbroken thread of earth."[1] He either enters into the waters or crosses them (in a boat). "Having made a bridge, he passes beyond."[2] So the Brāhmaṇa says. He halts at the spot where he wants to camp with the formula, "Set one free on the chosen spot of the earth."[1] He prays to the rising sun, with the formula, "Do thou who art the bravest of all, drive away the enemies."[1] He settles down where he is going to perform the sacrifice with the formula, "We have come to the sacrificial place on earth which formerly all gods enjoyed," upto the end of the Anuvāka ("going through the rites with the Ṛk., the Sāman and the Yajus, may we rejoice with abundunce of wealth and with food.")[3]

VI.10

Now the day preceding the Soma-purchasing day comes up. He (the sacrificer) procures a piece of gold, a female goat, two tufts of wool, one black and the other white, a turban, two pieces of cloth, two skins of black antelope, a Soma-purchasing cow—she is ruddy, reddish brown and one year old, two oxen carrying the Soma, a Soma-carrying cart—washed up and with the plank lifted up, skin of a red ox, two sets of sacrificial grass and faggot, enclosing sticks of Kārṣmarya (*Gmelina arboria*), the Prastara of *Saccharum spontaneum*, two blades of sugarcane, an earthen vessel for holding earth below the foot of the cow, a piece of gold for holding Soma-shoots, a stool of Udumbara-wood (*Ficus glomerata*) for king Soma, its feet are as high as the navel—it has perpendicular heads as high as *aratni*; it is woven with one-stranded threads of *muñja* grass, a little higher Samrāḍāsandī if the Soma-sacrifice is characterised by the Pravargya rite. The Adhvaryu, having approached in the latter part of night, gives out the call, "Do you cause to be milked the *Vrata*-milk from three udders of the cow."

In the morning, after the sun has risen, after he has released speech, (the sacrificer) standing in front of the (Prāgvaṁśa) shed, enters the sacrificial place if he has not already entered. (The Adhvaryu) says, "Come O sacrificer." Having

1. TS I 2.3.3
2. TS VI 1.4.9
3. TS I 2.3.4

निर्वपति । हविष्कृता वाचं विसृज्य गार्हपत्य आज्यं विलाप्योत्पूयाहवनीये स्रुवाहुतिं जुहोति कविर्यज्ञस्य वितनोति पन्थां नाकस्य पृष्ठे अधि रोचने दिवः । येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान्स्वाहेति। अथोपनिष्क्रम्य संप्रैषमाह सोमविक्रयिन्सोमꣳ शोधयोपरवाणां काले रोहिते चर्मण्यानडुहे ऽपामन्ते ब्राह्मणो दक्षिणत आस्तां ता गावो दूरं मा गुर्यासु सोमक्रयणी च सोमवाहनौ चानड्वाहौ सोमवाहनमनः प्रक्षालयतोद्धृतफलकमिति । यथासंप्रैषं ते कुर्वन्ति । अथैतेनैव यथेतमेत्य। अथैतं चरुꣳ श्रपयित्वाभिघार्योदञ्चमुद्वास्य षड्ढोत्रा प्रायणीयमासादयति । समानं कर्मा प्रयाजेभ्यः । पञ्च प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सꣳस्रावेण पञ्च कृत्वो ध्रुवामभिघार्य चरुमभिघारयत्युपभृतमन्ततः । अथ चतुर आज्यस्य गृह्णान आह ॥ १० ॥

पथ्यायै स्वस्तय इत्युपाꣳश्वनुब्रूहीत्युच्चैः । अत्याक्रम्याश्राव्याह पथ्याꣳ स्वस्तिमित्युपाꣳशु यजेत्युच्चैः । वषट्कृते पूर्वार्धे जुहोति । अथ चतुर एवाज्यस्य गृह्णान आहाग्नय इति उपाꣳश्वनुब्रूहीत्युच्चैः । अत्याक्रम्याश्राव्याहाग्निमिति उपाꣳशु यजेति उच्चैर्वषट्कृते दक्षिणार्धे जुहोति । अथ चतुर एवाज्यस्य गृह्णान आह सोमायेत्युपाꣳश्वनुब्रूही–त्युच्चैः । अत्याक्रम्याश्राव्याह सोममित्युपाꣳशु यजेत्युच्चैः । वषट्कृते ऽपरार्धे जुहोति । अथ चतुर एवाज्यस्य गृह्णान आह सवित्र इत्युपाꣳश्वनुब्रूही–त्युच्चैः । अत्याक्रम्याश्राव्याह सवितारमित्युपाꣳशु यजेत्युच्चैः । वषट्कृत उत्तरार्धे जुहोति । अथोपस्तीर्य पूर्वार्धाच्चरोरवद्यन्नाहादित्या इत्युपाꣳश्वनुब्रूहीत्युच्चैः । पूर्वार्धादवदायापरार्धादवद्यत्यभिघारयति

made him enter the shed by the eastern door, having strewn the Pṛṣṭhyā line, having carried forth (Praṇītā) water, he pours out paddy for rice cooked for Aditi (for) the Prāyaṇīyā Iṣṭi. Having released speech with the call to the preparer of the oblation-material, having melted clarified butter over the Gārhapatya and having purified it, he offers a spoonful on the Āhavanīya with the verse, "The sage stretches the path of the sacrifice on the back of the vault above the light of the heaven along which thou carriest the oblation. Thou goest as messenger hence wisely, thence with more gain, svāhā."[1] Having gone out he gives out the call, "O Soma-seller, do thou sift the Soma; let a brāhmaṇa sit down towards the south with a water-jar placed near, at the spot for the (prospective) Uparava holes on the skin of a red bull; let the cattle not go away among whom are included the cow for purchase of Soma and two oxen carrying Soma; do you cleanse the Soma-carrying cart with its plank lifted up." They act as per the call. Having returned by the same route by which he had gone, having cooked the rice, having poured clarified butter over it and having taken the pot down towards the north, he places the Prāyaṇīya cooked rice (within the Vedi) with the Ṣaḍḍhotṛ formula.[2] The procedure upto the Prayāja-offerings is similar. Having made five Prayāja-offerings, having crossed towards the north, having dropped the remnants five times into the Dhruvā, he pours clarified butter over the cooked rice, lastly into the Upabhṛt. While taking four spoonfuls of clarified butter, he says (to the Hotṛ).

VI.11

(Loudly) "Do you recite the puronuvākyā (to himself) for Pathyā Svasti." Having crossed and having made to announce, he says (loudly), "Do you recite the yājyā (to himself) for Pathyā Svasti." At the Vaṣaṭ-utterance he makes the offering in the eastern half (of the fire). While taking four spoonfuls of clarified butter he says (loudly), "Do you recite the puronuvākyā (to himself) for Agni." Having crossed and having caused to announce, he says (loudly), "Do you recite the yājyā (to himself) for Agni." At the Vaṣaṭ-utterance he makes the offering in the southern half. While taking four spoonfuls of clarified butter, he says (loudly), "Do you recite the puronuvākyā (to himself) for Soma." Having crossed and having caused to announce, he says (loudly), "Do you recite the yājyā (to himself) for Soma." At the Vaṣaṭ-utterance he makes the offering in the rear half. While taking four spoonfuls of clarified butter he says (loudly), "Do you recite the puronuvākyā (to himself) for Savitṛ." Having crossed and having caused to announce, he says (loudly) "Do you recite the yājyā (to himself) for Savitr. "At the Vaṣaṭ-utterance he makes the offering

1. TS III.5.5.3
2. TĀ III.4

प्रत्यनक्ति। अत्याक्रम्याश्राव्याहादितिमित्युपांꣳशु यजेत्युच्चैः। वषट्कृते मध्ये जुहोति। अथ वै भवत्यदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो यद्ध वो दिव इति। अथोपस्तीर्योत्तरार्धाच्चरोरवद्यन्नाहाग्नये स्विष्टकृते ऽनुब्रूहीति। अथ वै भवत्यष्टावत्तः स्विष्टकृद्द्वादशावत्तेडा । द्विरभिघारयति न प्रत्यनक्ति । अथैतन्मेक्षणमधोऽधः स्रुचावाग्नीध्रायोत्प्रयच्छन्नाहा-तिवालयतादेव मानुप्रहार्षीरिति । अत्याक्रम्याश्राव्याहाग्निꣳ स्विष्टकृतं यजेति । वषट्कृत उत्तरार्धपूर्वार्धेऽतिहाय पूर्वा आहुतीर्जुहोति । अत्रैतन्मेक्षणमाहवनीये ऽतिवाल्याद्भिरभ्युक्ष्योत्तरतः सादयति । अथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा प्राशित्रमवदायेडाम-वद्यति । उपहूतायामिडायामग्नीध आदधाति षडवत्तम् । प्राश्नन्ति । मार्जयन्ते ॥ ११ ॥

अथ परिकर्मिणः सꣳशास्त्यनुच्छिष्टीकुर्वन्त एतं चरुं व्युद्धृत्य प्राश्नीताथैतां चरुस्थालीꣳ सक्षामकाषामेतन्मेक्षणमेतं वेदमेतद्बर्हिश्चतुष्टय-मुदयनीयाय निधत्तादिति। शंय्वन्तः प्रायणीयः संतिष्ठते। अत्रैतत्पूर्णपात्र-मन्तर्वेदि निनयति। अथैतद्ध्रुवाज्यमाप्याय्य स्रुचि चतुर्गृहीतं गृहीत्वा सूत्रेण हिरण्यं निष्टर्क्यं बद्ध्वा दर्भनाड्यां प्रग्रथ्य स्रुच्यवदधातीयं ते शुक्र

in the northern half. Having spread clarified butter (into the ladle), while taking portions of cooked rice from the eastern half, he says (loudly), "Do you recite the puronuvākyā (to himself) for Aditi." Having taken portions from the eastern half, he takes from the rear half. He pours clarified butter over the portion (taken up); smears the portion from which he took the oblation. Having crossed and having caused to announce, he says (loudly), "Do you recite the yājyā (to himself) for Aditi." At the Vaṣaṭ-utterance he makes the offering in the middle.

It is indeed said, "Having made an offering to Aditi, (the Adhvaryu) recites a verse addressed to the Maruts[1]—O Maruts, desirous of happiness, we invoke you (to come) from the heaven. Do you come to us."[2] Having spread clarified butter into the ladle, while taking portion from the northern half of the cooked rice, (the Adhvaryu) says (to the Hotṛ), "Do you recite the puronuvākyā for Sviṣṭakṛt Agni." It is indeed said, "The Sviṣṭakṛt oblation comprises eight portions, the Iḍā comprises twelve portions." (The Adhvaryu pours clarified butter twice, he does not besmear the cut up part of the oblation. Giving the corn-stirring stick to him from below the two ladles, he says to the Āgnīdhra, "Do thou move (the stick) beyond, do not throw (on the fire)." Having crossed and having caused to announce, he says (to the Hotṛ), "Do you recite the yājyā for Sviṣṭakṛt Agni." At the Vaṣaṭ-utterance he makes the offering in the eastern half of the northern half (of the fire) beyond the earlier offerings. At this stage (the Āgnīdhra) having moved over the Āhavanīya and having sprinkled it with water, places the corn-stirring stick towards the north. (The Adhvaryu), having crossed towards the north, having deposited the ladles at their places, and having cut up the Prāśitra-portion, takes up the Iḍā. After the Iḍā has been invoked, he gives to the Āgnīdhra (his portion) in six cuttings. (The relevant priests) consume (the Iḍā) and sprinkle water upon themselves.

VI.12

(The Adhvaryu) instructs his assistant: "Do you consume this rice, having scooped it out without having any remnant, then preserve for the Udayanīya sacrifce these four things (namely), this vessel of rice together with the scrapings, this corn-stirring stick, the Veda and this sacrificial grass." The Prāyaṇīya sacrifice comes to a conclusion at the end of the Śaṁyuvāka. (The sacrificer) pours down within the altar the Praṇītā-goblet. (The Adhvaryu) having swollen the clarified butter in the Dhruvā, having taken up four spoonfuls into the ladle, having tied a piece of gold with a loose knot of a thread, having strung it into darbha-blade, puts it down into the ladle with the formula, "O brilliant one, this is thy body. This is thy

1. cf TS VI. 1.5.3
2. TS I.5.11.4

तनूरिदं वर्चस्तया संभव भ्राजं गच्छेति । अत्रैतां दर्भनाडीः स्रुग्दण्ड उपसंगृह्याहवनीये जुहोत्यन्वारब्धे यजमाने जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय स्वाहेति । अपरं चतुर्गृहीतं गृहीत्वाथ याचति स्फ्यमुदपात्रं बर्हिर्हिरण्यमिति । एतत्समादायाहैहि यजमानेति । अन्वग्यजमानो ऽनूची पत्नी स्थालीं पद्धरणीमादाय पूर्वया द्वारोपनिष्क्रम्याग्रेण शालां तिष्ठन्यजमान-माज्यमवेक्षयति शुक्रमस्यमृतमसि वैश्वदेवꣳ हविरिति । अथैनꣳ हिरण्यमन्तर्धायादित्यमुदीक्षयति सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चितेति । अथैताꣳ सोमक्रयणीमग्रेण शालामुदीचीमतिवित्सयन्ति । तामनुमन्त्रयते चिदसि मनासीत्यान्तादनु-वाकस्य । अथाह दक्षिणस्येर्मस्य सप्तमं पदं जोषयध्वमिति । तस्यै षट्पदान्यनुनिक्रामति ॥ १२ ॥

वस्व्यसि रुद्रास्यदितिरस्यादित्यासि शुक्रासि चन्द्रासीति । सप्तमं पदमभिगृह्णाति बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिराचिकेत्विति । अथैतस्मिन्पदे हिरण्यं निधाय संपरिस्तीर्याभिजुहोति पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायाः पदे घृतवति स्वाहेति । अपोद्धृत्य हिरण्यꣳ स्फ्येन वा कृष्णविषाणया वा पदं परिलिखति परिलिखितꣳ

splendour. Be united with it. Attain brilliance."[1] Having suspended the darbha-blade on the handle of the ladle, he makes an offering on the Āhavanīya, while the sacrificer has contacted him, with the formula, "Thou art urging, grasped by mind, dear to Viṣṇu. May I attain the support of speech in that impulse of thine whose impulse is true, svāhā."[1]

Having taken up another four spoonfuls, (the Adhvaryu) asks for the wooden sword, a pot filled with water, sacrificial grass and a piece of gold. Having taken up these, he says, "Come, O sacrificer." The sacrificer follows him, and the sacrificer's wife having taken up the vessel containing the soil, follows him. Having gone out by the eastern door, (the Adhvaryu) standing in front of the (Prāgvaṁśa) shed, makes the sacrificer gaze at the clarified butter with the formula, "Thou art bright, thou art nector the offering to all gods."[1] Having held the piece of gold in between he causes the sacrificer to gaze at the sun with the formula, "I have mounted the eye of sun the pupil of the eye of Agni, when thou shining goest with thy steeds along with the wise."[1] The Soma-purchasing cow is driven in front of the shed towards the north. (The sacrificer) follows her with the formula, "Thou art thought, thou art mind," thus, upto the end of the Anuvāka (thou art meditation; thou art *dakṣiṇā* thou art holy; thou art supreme, thou art two-headed Aditi. Be thou going forward and backward for us. May Mitra fasten thee by foot. May Pūṣan guard the ways for Indra the overseer. May the mother give thee consent, thy father, thy brother who has sprung of the same womb, and thy companion in the herd. O goddess, do thou approach god Soma for the sake of Indra. May Rudra bring thee back along the path of Mitra. May the friend of Soma bring well being. Do thou come back together with wealth)."[2] Then (the Adhvaryu) says, "Do you take note of the seventh foot-print of the right forefoot (of the cow)." (The Adhvaryu) passes along her six foot-steps.

VI.13

With the formula, "Thou art Vasvī, thou art Rudrā; thou art Aditi; thou art Ādityā; thou art Śukrā; thou art Candrā."[1] He takes hold of (the soil of) the seventh foot-print with the formula, "May Bṛhaspati make thee rejoice in happiness; may Rudra perceive thee along with Vasus."[1] Having deposited a piece of gold on this (seventh) foot-print, and having strewn it around, he makes an offering on it with the formula, "I pour thee on the head of the earth, on the sacrificial place, on the abode of Iḍā which is full of clarified butter, svāhā."[1] Having taken away the piece of gold, he draws a line around (the foot-print) with the wooden sword or with the

1. TS I.2.4.1
2. TS I.2.4.2

1. TS I.2.5.1

रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामीति । अथैनत्स्फ्येनोपसंग्राहं यावत्मूतं पद्धरण्याꣳ संवपत्यस्मे रायो ऽस्मे राय इति त्रिः । त्वे राय इति यजमानाय प्रयच्छति । तोते राय इति यजमानः पत्न्यै । अथ पत्नीꣳ सोमक्रयण्या समीक्षयति सं देवि देव्योर्वश्या पश्यस्वेति । अथ पत्नी यजमानमीक्षते त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं विदेय तव संदृशीति । अथ यजमानः सोमक्रयणीमीक्षते माहꣳ रायस्पोषेण वि योषमिति । अथैनद्धिरण्यमद्भिः प्रक्षाल्य मध्यमायामङ्गुलौ बध्नीते । अथैनं पदाशयमद्भिरुपसृजति । उत्सृजन्ति सोमक्रयणीम् । नयन्ति पत्नीम् । नि पदं दधति ॥ १३ ॥ तृतीयः ॥

अथात्रैव तिष्ठन्याचति चन्द्रं च छागां च कृष्णबलक्ष्यावूर्णास्तुके उष्णीषं द्वे वाससी द्वे कृष्णाजिने सोमक्रयणीमिति । अथ पृच्छति सोमविक्रयिञ्छुद्धस्ते सोमा३ इति । शुद्ध इतीतरः प्रत्याह । सुविचितꣳ राजानं पुरस्ताद्भागाभिरुपतिष्ठत एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतादिति । अथैतद्रोहितं चर्मानडुहमुत्तरलोमास्तीर्य । अथैतद्द्विगुणं वासः प्राचीनदशमुत्तरार्धे चर्मण उपस्तृणाति । अथ हिरण्यवता पाणिना राजानमभिमृशत्यꣳशुना ते अꣳशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतो ऽमात्यो ऽसि शुक्रस्ते ग्रह इति । अथैनमतिच्छन्दसर्चा मिमीते । एकयैकयोत्सर्गं मिमीते । अयातयाम्नियायातयाम्नियैवैनं मिमीते । सर्वास्वङ्गुष्ठमुपनिगृह्णात्यभि त्यं देवꣳ सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं

horn of black antelope with the formula, "The Rakṣas is encircled; the evil spirits are encircled. Here do I cut out the neck of the Rakṣas. I cut out the neck of one who hates us and whom we hate."[1] Collecting it by means of the wooden sword he pours into the vessel for holding the soil of foot-print as much soil as is mixed with clarified butter with the formula, "Wealth be with us"[2] recited thrice. He hands it over to the sacrificer with the formula, "Wealth be with thee."[2] The sacrificer to his wife with the formula, "Wealth be thine."[2]

The Adhvaryu makes the Soma-purchasing cow gaze at the sacrificer's wife with the formula, "O goddess, gaze together with goddess Urvaśī."[2] The wife gazes at the sacrificer with the formula, "Let me attend on thee with Tvaṣṭṛ's aid; rich in seed and bearing seed, may I get a heroic son in thy presence."[2] The sacrificer gazes at the Soma-purchasing cow with the formula, "May I not be separated from the fullness of wealth."[2] Having washed the piece of gold with water, he fixes it on the middle finger. He pours water on the cavity of the foot-print. The Soma-purchasing cow is released. The sacrificer's wife should be led back. The soil of foot-print is preserved.

VI.14

Standing here only, he asks for the piece of gold, the she-goat, two tufts of wool—a black and a white one, the turban, the two pieces of cloth, two skins of black antelope and the Soma-purchasing cow. He enquires, "O Soma-seller, is thy Soma sifted?" "Sifted," says the other one. The sacrificer prays to the well-sifted Soma with the *purastādbhāga* formulas, "Do thou speak unto Soma, 'This is thy Gāyatra part.' Do thou speak unto Soma "This is thy Triṣṭubh part.' Do thou speak unto Soma for me: 'This is thy Jāgata part.' Do thou speak unto Soma for me; 'Do thou become the lord of Chandomas."[1] Having spread the red hide of a bull with hairy side upwards, (the Adhvaryu) spreads the folded piece of cloth with its fringes towards the north on the northern half of the skin. He touches King Soma with the hand equipped with gold with the formula, "Let thy shoot be mixed with shoot, joint with joint; may thy fragrance evoke the desire; may the firm juice cause excitement. Thou art a house-holder; thy libation is bright."[2]

He measures it (the Soma) with the Atichandas verse . He measures with one finger at a time leaving (a finger each time). He measures him with a fresh finger each time. In respect of all (fingers) he applies the thumb. (The verse in the Atichandas metre is) "I send my prayer to god Savitṛ within the two bowls, the wise,

2. TS I.2.5.2

1. TS III.1.2.1
2. TS I.2.6.1

मतिम् । ऊर्ध्वा यस्याममतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा सुवरिति । पञ्च कृत्वो यजुषा पञ्च कृत्वस्तूष्णीम् । दश कृत्वो मिमानोऽर्धवेलाः राज्ञो मिमीते । अथातिशिष्टः राजानं प्रजाभ्यस्त्वेत्युप-समूहति । समुच्चित्य वसनस्यान्तान्प्रदक्षिणमुष्णीषेणोपनह्यति प्राणाय त्वेति । व्यानाय त्वेत्यनुशृन्थति । अथोपरिष्टादङ्गुल्यावकाशं कृत्वा यजमानमवेक्षयति प्रजास्त्वमनु प्राणिहि प्रजास्त्वामनु प्राणन्त्विति । अथैनं चर्मणि निदधाति। तं ततः कौत्स आदत्ते । अद्भिरभ्युक्ष्य चर्मोदू-हति । अथोपोत्थाय पृच्छति सोमविक्रयिन्क्रय्यस्ते सोमा३ इति । क्रय्य इतीतरः प्रत्याह । मूजवता३ इति। मूजवतो हीतीतरः प्रत्याह । अथैनं गवा पणते गवा ते क्रीणानीति । क्रीतः सोम इत्याह सोमविक्रयी वयाःसि व्याचक्ष्वेति । एषा ते सोमक्रयणी चन्द्रं ते छागा ते वस्त्रं त इति । अथैनः हिरण्येन पणते ॥ १४ ॥

सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यवन्तमभिमातिषाहः शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन संयत्ते गोरित्युक्त्वास्मे चन्द्राणीति यजमानाय प्रयच्छति । अथैनं प्रतीचीनग्रीवयाजया पणते तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणामीति । अस्मे ते बन्धुरिति यजमानमीक्षते । मयि ते रायः श्रयन्तामित्यात्मानम् । अथैनां प्रदक्षिणमावर्त्याद्भिरभ्युक्ष्योदीचीमुत्सृजति। सैषा कौत्सस्य भवति । अथ कौत्साद्राजानमादत्ते मित्रो न एहि सुमित्रधा इति । तं यजमानस्योरौ दक्षिण आसादयतीन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तः स्योनः स्योनमिति । अथैनं प्रत्यपोर्णुते यजमानः । अद्भिरभ्युक्ष्य कौत्साय वा परिकर्मिणे वोष्णीषं प्रयच्छति । अथ यजमानः शुक्लयोर्णास्तु-कयाध्यस्यत्यस्मे ज्योतिरिति । अथैतां कृष्णामुपग्रश्नातीदमहः सर्पाणां दन्दशूकानां ग्रीवा उपग्रश्नामीति । तया सोमविक्रयिणं विध्यति सोमविक्रयिणि तम इति । अथ सोमक्रयणाननुदिशति स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान् रक्षध्वं मा वो

having true impulse the bestower of treasures, at whose impulse the resplendent light shines high. The golden-handed wise has measured the heaven with his form."[2] Five times with the formula, five times silently. Measuring ten times, he measures half the quantity of king Soma. He collects the remaining quantity of king Soma with the formula, "For progeny thee."[2] Having folded together the ends of the piece of cloth, he binds it with the turban by the right with the formula, "For Prāṇa thee."[2] Having caused a cavity above by means of a finger, he makes the sacrificer gaze (at it) with the formula, "Do thou breathe after the offspring; may the offspring breathe after thee."[2] He deposits it (the Soma) on the skin. One belonging to Kutsa gotra takes charge of it. The Adhvaryu lifts up the skin after having sprinkled it with water. Having stood up, he enquires, "O Soma-seller, is thy Soma to be purchased (by us)?" "It is for purchase," says the other. "Is it from the Mūjavat mountain?" "Indeed from the Mūjavat," says the other. Then he barters for a cow, "I purchase it for a cow." "The Soma has been purchased. Speak out the valuables." "This Soma-purchasing cow is thine. Gold is thine; the female goat is thine; piece of cloth is thine." Then he barters for gold.

VI.15

"I purchase thy Soma which is full of vigour, full of sap, full of strength and overcoming the enemy. I purchase thy bright (Soma) for bright (gold). The glittering for glittering; the immortal for immortal, to match thy cow." Having said this he gives (the gold) to the sacrificer saying, "Gold be with us."[1] Then he barters this (Soma) for the female goat with its neck towards the west with the formula, "Thou art the form of heat, the colour of Prajāpati, with thee who hast a thousandfold prosperity, with the least animal. I purchase (Soma)." He gazes at the sacrificer with the formula, "Thy kith and kin be with us."[1] At himself with the formula, "May thy wealth be with me."[1] Having turned the cow by the right and having sprinkled her with water, he leaves her towards the north. She belongs to the Kautsa. He takes up king Soma from the Kautsa with the formula, "Come to me as a friend, giving good friends."[1] He deposits him (Soma) on the right lap of the sacrificer with the formula, "Do thou enter upon the right lap of Indra, longing for one who longs you and favourable to one who is favourable to you."[1] The sacrificer uncovers it. Having sprinkled with water, the Adhvaryu gives away the turban either to the Kausta or a servant. He strikes at the sacrificer with the white tuft of wool with the formula, "Light be with us."[1] He ties up together the tuft of black wool with the formula, "Herewith do I tie up the necks of biting serpents."[2] With it he hits the Soma-seller saying "Darkness be with the Soma-seller."[1] He points at the articles for

1. TS I.2.7.1
2. TS VI.1.10.4

दभन्निति । अथैनमादायोपोत्तिष्ठत्युदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अन्विति । दक्षिणत एतत्सोमवाहनमनः प्रागीषं योग्यकृतमुपस्थितं भवति । तदभिप्रैत्युर्वन्तरिक्षमन्विहीति । तस्य नीडे कृष्णाजिनमास्तृणात्यदित्याः सदो ऽसीति । अदित्याः सद आसीदेति कृष्णाजिने राजानम् । अथैनमुपतिष्ठते ऽस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानीति । अथैनं वाससा परितनोति वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्नियासु हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्राविति । अथोदु त्यं जातवेदसमिति सौर्यर्चा कृष्णाजिनं पुरस्तात्प्रत्यानह्यति । अथ सोमवाहनावानीयमानौ प्रतिमन्त्रयत उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनाविति । तयोर्दक्षिणं पूर्वं युनक्ति वरुणस्य स्कम्भनमसीति । वरुणस्य स्कम्भसर्जनमसीति शम्यामवगूहति । प्रत्यस्तो वरुणस्य पाश इति योक्त्रम् । एतयैवावृतोत्तरमनड्वाहं युनक्ति । अथ दक्षिणामीषामन्वारभ्य संप्रैषमाह ॥ १५ ॥

सोमाय क्रीताय प्रोह्यमाणायानुब्रूहि सुब्रह्मण्य सुब्रह्मण्यामाह्वय मा तु त्वमाह्वा यजमान आह्वास्यतीति । यदा यजमानस्त्रिरुपाꣳश्वाह्वयते ऽथैष सुब्रह्मण्यो ऽन्तरेणेषे तिष्ठन्पलाशशाखां धारयन्सुब्रह्मण्यामाह्वयति सुब्रह्मण्योꣳ सुब्रह्मण्योमिति त्रिः । त्रिरुक्तायां प्रच्यावयन्ति प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि मा त्वा परिपरी विदन्मा वा परिपन्थिनो विदन्मा त्वा वृका अघायवो मा गन्धर्वो विश्वावसुरादघच्छ्येनो भूत्वा परापत यजमानस्य नो गृहे देवैः सꣳस्कृतमिति । प्रदक्षिणꣳ राजानं

which Soma was purchased with the formula, "O Svāna, Bhrāja, Aṅghāri, Bambhāri, Hasta, Suhasta and Kṛśānu, these are the articles for which Soma has been bought. Guard them; let them not fail you."[3]

Taking him (Soma, the Adhvaryu) stands up with the formula, "I have arisen following the immortals with life, good life, with the sap of plants, with the force of rains."[4] The Soma-carrying cart with its pole pointing towards the east and provided with a yoke, stands towards the south. He approaches it with the formula, "Go along the wide midregion."[4] He spreads skin of black antelope in his seat with the formula, "Thou art the seat of Aditi."[4] (He deposits) king Soma on the skin of black antelope with the formula, "Do thou sit on the seat of Aditi."[4] He prays to him with the verse, "The bull has supported the heaven and the midregion, has measured the width of the earth. He, the overruler, governed all worlds. All these are Varuṇa's ordinances."[4] He enfolds him with a piece of cloth with the verse, "Varuṇa has expanded the midregion over the woods, swiftness in horses, milk in cows, will in hearts, the fire among the settlers, the sun in the heaven and Soma on the mountain."[4] With the verse addressed to Sūrya, "The beams hold up god Jātavedas the sun, so that all might see,"[4] he unfolds the skin of black antelope from the front. He recites with reference to the Soma-carrying bulls being brought, the formula, "Come hither O bulls, you who bear the yoke, not shedding tears, not killing our heroic progeny, and inciting the priests."[4] He first yokes the southern side bull with the formula, "Thou art the support of Varuṇa."[4] He fixes the yoke-pin with the formula, "Thou art the prop of the support of Varuṇa."[4] The yokehalter with the formula, "Varuṇa's noose is tied."[4] With this very procedure he yokes the northern side bull. Touching the southern pole he gives out the call.

VI.16

"Do you (O Hotṛ) recite verses for the Soma which has been purchased being carried forth. O Subrahmaṇya, do thou invoke Subrahmaṇyā. Do thou, however, not invoke (until) the sacrificer invokes." When the sacrificer invokes three times in a low voice, then the Subrahmaṇya, standing between the two poles and holding a twig of *Butea frondosa* invokes Subrahmaṇyā by saying *subrahmaṇyom subrahmaṇyom* three times. After (the first verse) has been recited thrice by (the Hotṛ) they cause the cart to move with the formula, "O lord of the earth, do thou move forward towards all abodes. Let no opponent find thee; let no robber find thee; let not the wicked wolves find thee; let not Viśvāvasu Gandharva injure thee. Do thou become an eagle and fly away towards the house of the sacrificer which has been

3. TS I.2.7.2
4. TS I.2.8.1

परिवहन्ति । अथैतावञ्जसोपसंक्रामतो ऽध्वर्युश्च यजमानश्च यजमानस्य स्वस्त्ययन्यस्यपि पन्थामगस्महि स्वस्तिगामनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वस्विति । अथाग्रेण शालां तिष्ठन्नोह्यमानꣳ राजानं प्रतिमन्त्रयते नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसतेति । अथैतत्सोमवाहनमनो ऽग्रेण शालामुदगीषमुपस्थापयन्ति । तदुपस्तभ्नोति वरुणस्य स्कम्भनमसीति । वरुणस्य स्कम्भसर्जनमसीति शम्यामुद्वृहति। उन्मुक्तो वरुणस्य पाश इति योक्त्रम् । अथ वै भवति विमुक्तो ऽन्यो ऽनड्वान्भवत्यविमुक्तो ऽन्यो ऽथातिथ्यं गृह्णाति यज्ञस्य संतत्यै पत्न्यन्वारभत इति ब्राह्मणम् । अथाहैहि यजमानेति । पूर्वया द्वारा शालां प्रपाद्य पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयातिथ्यं निर्वपत्यन्वारब्धायां पत्न्याम् । अथ देवस्य त्वा सवितुः प्रसव इति प्रतिपदं कृत्वा ॥ १६ ॥

अग्नेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामीति । एतामेव प्रतिपदं कृत्वा सोमस्यातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामीति । एतामेव प्रतिपदं कृत्वातिथेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामीति । एतामेव प्रतिपदं कृत्वाग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा जुष्टं निर्वपामीति । एतामेव प्रतिपदं कृत्वा श्येनाय त्वा सोमभृते विष्णवे त्वा जुष्टं निर्वपामीति । पञ्च कृत्वो यजुषा । हविष्कृता वाचं विसृज्यैतयैवावृतोत्तरमनड्वाहं वि-मुञ्चति । अथैते ब्राह्मणाश्चत्वार आसन्दीमाददते । अथ यजमानो नीडाद्राजानमादत्ते या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु

accomplished by gods. Thou art the producer of happiness for the sacrificer."[1] King Soma is turned around by the right. The Adhvaryu and the sacrificer step up straight on (towards the Prāgvaṁśa shed) with the formula, "We have stridden the path which leads to happiness and which is secure by which one keeps off all his enemies and obtains wealth."[1]

Standing in front of the (Prāgvaṁśa) shed, the Adhvaryu recites with reference to king Soma being carried the verse, "Homage to the brightness of Mitra and Varuṇa. Do you pay homage to the god. Do you praise Sūrya the far-seeing, god-born light, son of heaven."[1] The Soma-carrying cart is made to stand in front of the (Prāgvaṁśa) shed with its poles pointing towards the north. (The Adhvaryu) supports it with the formula, "Thou art the support of Varuṇa."[1] He lifts up the yoke with the formula, "Thou art the prop of Varuṇa's support."[1] The yoke-halter with the formula, "Varuṇa's noose is loosened."[1] It is indeed said, "While one ox is removed, the other not removed, the Adhvaryu pours out oblation-material for the Ātithyeṣṭi for the continuity of the sacrifice. The sacrificer's wife holds contact (at the pouring)." So says the Brāhmaṇa[2] (The Adhvaryu) says, "Come O sacrificer." Having caused the sacrificer to enter (the shed) by the eastern door, having strewn the Pṛṣthyā line and having carried forth Praṇītā waters, he pours out (paddy) for the Ātithyeṣṭi while the sacrificer's wife has maintained contact. Having made a beginning with the formula, "In the impulse of god Savitṛ.

VI.17

(The Adhvaryu pours out paddy) with the formula, "Thou art the guest-offering of Agni; I pour out the dear oblation for Viṣṇu thee."[1] Having made a similar beginning (he pours with the formula), "Thou art the guest-offering for Soma; I pour out the dear oblation for Viṣṇu thee."[1] Having made a similar beginning, (he pours out with the formula) "Thou art the guest-offering for the guest; I pour out the dear oblation for Viṣṇu thee."[1] Having made a similar beginning (he pours out with the formula) "For Agni the giver of wealth thee; I pour out dear oblation for Viṣṇu thee."[1] Having made a similar beginning (he pours out with the formula), "For Soma-carrying eagle thee; I pour the dear oblation for Viṣṇu thee."[1] Five times (he pours out) to the accompaniment of the (relevant) yajus. Having released speech with the call to the preparer of the oblation-material, he removes the other ox with a similar procedure. Four brāhmaṇas

1. TS I.2.9.1
2. TS VI.2.1.1

1. TS I.2.10.1

यज्ञमिति । पूर्व एवासन्द्या प्रतिपद्यन्ते । अन्वग्राज्ञा यजमानो ऽन्वक्छूद्र उदपात्रेण । पूर्वया द्वारा शालां प्रपादयति गयस्फानः प्रतरणः सुवीरो ऽवीरहा प्रचरा सोम दुर्यानिति । अथैतामासन्दीमग्रेणाहवनीयं पर्याहृत्य दक्षिणतो निदधति । तस्यां कृष्णाजिनमास्तृणात्यदित्याः सदोऽसीति । अदित्याः सद आसीदेति कृष्णाजिने राजानम् । अथैनमुपतिष्ठते वरुणो ऽसि धृतव्रतो वारुणमसीति । समुच्चित्य कृष्णाजिनस्यान्तान्स्पन्द्यया विग्रथ्य वꣳशे प्रग्रथ्नाति शंयोर्देवानाꣳ सख्यादिति । अथापरावासन्दीपा- दावन्तरेण ब्राह्मणो ऽभिषिञ्चति शूद्रः प्रक्षालयति मा देवानामपसꣳश्छित्स्म- हीति । अथैनं वारुण्यर्चा परिचरति तत्त्वा यामि ब्रह्मणा वन्दमान इति । अथैनꣳ सꣳशास्ति मा राजानं चाहवनीयं चान्तरेण कश्चन संचारीन्मैनꣳ सायुधो मा सदण्डो मा सच्छत्रो मा सोष्णीषो मा साधस्पाद्यो ऽनुप्रपादी- दिति । अथास्मै मधुपर्कं च गां च प्राहुः । तामध्वर्युर्विशास्ति ॥ १७ ॥ चतुर्थः ॥

श्रपयन्त्येतमातिथ्यं वैष्णवं नवकपालम् । तेन सह मदन्तीरधिश्र- यति । शिल्पवदेतदिध्माबर्हिरातिथ्यस्य भवति । कार्ष्मर्यमयैः परिधि- भिराश्ववालेन प्रस्तरेणैक्षवीभ्यां विधृतीभ्यां तेन शिल्पवत् । त्वचं पुरोडाशस्य ग्राहयित्वा श्रपयित्वाभिवास्य प्राडेत्याप्येभ्यो निनीय स्तम्बयजुर्हरति । इदमेव प्रसिद्धं पौरोडाशिकं त्रिर्यजुषा तूष्णीं चतुर्थम् ।

take up the stool. The sacrificer takes up Soma from the seat with the verse, "Thy splendours which they worship with oblations may all these surround the sacrificer."[1] (The brāhmaṇas) first enter (the shed) together with the stool. Following them the sacrificer together with the Soma. Following him the Śūdra together with a pot full of water. (The sacrificer) carries the Soma into the shed by the eastern door with the verse, "Increasing the family-wealth, impeller, rich in heroes, not killing our heroes, O Soma, enter the dwellings."[1] Having brought around the stool along the front of the Āhavanīya, they keep it towards the south with the formula, "Thou art the seat of Aditi."[1] (The Adhvaryu) spreads on it the skin of black antelope with the formula, "Do thou sit on the seat of Aditi."[1] King Soma on the skin of black antelope.

(The sacrificer) prays to him with the formula, "Thou art Varuṇa, the possessor of ordinances. Thou belongest to Varuṇa."[2] Having collected together the ends of the skin of black antelope and having fastened them with a cord, the Adhvaryu ties it to the heaven with the formula, "From the beneficent friendship with gods." In between the two rear legs of the stool a brāhmaṇa sprinkles water (over the Soma) and the Śūdra cleanses with the formula, "May we not be deprived of friendship with gods"[2] (recited by the Adhvaryu). He then worships him with the verse addressed to Varuṇa, "Praying to thee with the divine song, I come to thee. The sacrificer rules that (favour of thine) through oblations. Without getting angry, O Varuṇa, do thou know of this (divine song). Praised widely, do thou not steal away our life."[3] Then he gives instructions with regard to him (Soma): "Let nobody pass between king Soma and Āhavanīya, whoever enters (the shed), let him not enter with any instrument, staff, umbrella, turban or footwear." Madhuparka worship and a cow are offered to him (Soma). The Adhvaryu gives suitable instructions in respect of her.

VI.18

The cake on nine potsherds for Viṣṇu pertaining to the Ātithya-oblation is baked. Along with it one boils water. The sacrificial grass and faggot for the Ātithyeṣṭi is specific. It is said to be specific for the reason of the enclosing sticks of *Gmelina arborea,* the Prastra of *Saccharum spontaneum* and the two separating blades of sugarcane. Having allowed the cake to catch skin, having put on fire, having covered (with embers and ashes), having gone forward, and having poured down the wash-water for the Āpyas, the Adhvaryu carries Stambayajus. (The rite) is

2. TS I.2.10.2
3. TS II. 1.11.6

पूर्वं परिग्राहं परिगृह्णाति । करणं जपति । उद्घ्नन्ति । उद्धतादाग्नीध्र-स्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथोत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढ्याज्येनोदेहीति । आहृतासु प्रोक्षणीषूदस्य स्फ्यं मार्जयित्वेध्मा-बर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङुद्द्रुत्य स्रुवं च स्रुचश्च संमार्ष्टि । आज्येनोदेति । आज्यं च प्रोक्षणीश्चोत्पूय प्रसिद्धं चतुर्गृहीतानि वा पञ्चगृहीतानि वाज्यानि गृहीत्वा प्रोक्षणीभिरुपोत्तिष्ठति । इध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तादाश्ववालं प्रस्तरं गृह्णाति । पञ्चविधं बर्हिं स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य कार्ष्मर्यमयान्परिधीन्परिदधाति । ऊर्ध्वे समिधावादधाति । ऐक्षवी विधृती तिरश्ची सादयति । विधृत्योराश्ववालं प्रस्तरम् । प्रस्तरे जुहूम् । बर्हिषीतरे । एता असदन्निति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यङ्ङुद्द्रुत्याथैतं पुरोडाशमुपस्तीर्णाभिघारितमुद्वास्य चतुर्होत्रातिथ्यमासादयति । अत्र संभारान्व्याचष्टे । अथ निर्मन्थ्यस्यावृता निर्मन्थ्येन चरति । प्रहृत्याभिहुत्याथेध्मात्समिधमाददान आहाग्नये समिध्यमानायानुब्रूहीति । अभ्यादधातीध्मम् । न समिधं परिशिनष्टि । वेदेनोपवाजयति । अनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संमृष्टे स्रुग्भ्यामुत्तरम् । अथासꣳस्पर्शयन्स्रुचावुदङ्ङत्याक्रम्य जुह्वा ध्रुवाꣳ समज्य सादयित्वा स्रुचौ प्रवरं प्रवृणीते । प्रसिद्धꣳ होतारं वृणीते । सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावादायात्याक्रम्याश्राव्याह समिधो

prescribed in the Paurodāśika Brāhmaṇa.[1] (The Adhvaryu carries the Stambayajus) three times with the formula and the fourth time silently. He does the first tracing of the altar. He murmurs the Karaṇa-formula. He digs out the altar. From the dug out region the Āgnīdhra carries (grass with earth) three times. When the Āgnīdhra carries thrice, the Adhvaryu, having done the second tracing, having levelled and having struck the wooden sword across, gives out the call, "Do thou put down the Prokṣaṇī ladle, put down in sacrificial grass and faggot, do thou cleanse the spoons and ladles and come up with the clarified butter." After the Prokṣaṇī-waters have been brought, having thrown the wooden sword, having sprinkled (upon himself), having put down the sacrificial grass and faggot, having turned by the right and having moved to the rear, he cleanses the spoon and ladles. He comes up with the clarified butter. Having purified the clarified butter and the Prokṣaṇi-waters, having taken up clarified butter in four spoonfuls or five spoonfuls, he stands up taking up Prokṣaṇī-waters. He sprinkles the faggot; sprinkles the altar; sprinkles the sacrificial grass. Having sprinkled the sacrificial grass held (within the altar) and having poured down water (on the knot of the grass), he takes from the front side the Prastara of *saccharum spontaneum*). Having spread the sacrificial grass in five rows, having moved eastwards with the Prastara in his hand, he lays down the enclosing sticks of *Gmelina arborea.* He keeps erect two fire-sticks. He places across two separating blades of sugarcane the Prastara of *Saccharum spontaneum* upon the separating blades. The Juhū ladle on the Prastara. The other two ladles upon the sacrificial grass. Having touched them all together with the formula, "These have sat down in the world of good action, protect them, O Viṣṇu, protect the sacrifice; protect the lord of sacrifice, protect me the leader of sacrifice,"[2] having turned by the right and moving to the rear, having taken down the cake by first spreading and then pouring clarified butter, the Adhvaryu deposits the Ātithya oblation reciting the Caturhotṛ formula. Here he pronounces the Sambhārayajus formula.[3]

He goes through the churning with the procedure for churning.[4] Having put (the churned out fire into the Āhavanīya) and having made an offering, while taking a fire-stick from the faggot he says (to the Hotṛ), "Do you recite verses for the fire being enkindled." He puts the faggot (one by one); he does not keep back a fire-stick. He fans (the fire) by means of the Veda. After the Sāmidhenī verses have been recited (by the Hotṛ) one by one, he pours the Āghāra-line by means of the spoon. After (the Āhavanīya) has been cleansed (by means of the wooden sword) thrice,

1. First Praśna of the Prājāpatyakāṇḍa according to the Kāṇḍānukrama of TS II.6.4; BaudhŚS I.11.
2. TS I.1.11.2
3. TĀ III.8
4. cf. BaudhŚS IV.5

यजेति । वषट्कृते जुहोति । यज यजेति । चतुर्थं यक्ष्यन्नत्रैतदौपभृतमाज्यꣳ सर्वश एव जुह्वाꣳ समानयते । पञ्च प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य संꣳस्रावेण ध्रुवामभिघार्य पुरोडाशमभिघारयति नोपभृतम् । अथाग्नये सोमायेत्याज्यभा-गाभ्यां चरति । उपाꣳशु हविषा चरति विष्णवे ऽनुब्रूहि विष्णुं यजेति । अथ स्विष्टकृता चरति । इडान्त आतिथ्यः संतिष्ठते । अत्रैतत्पूर्णपात्रमन्तर्वेदि निनयति । अत्रैतद्ध्रुवाज्यमाप्याय्य कꣳसं वा चमसं वा याचति । तमन्तर्वेदि निधाय तस्मिन्नेतत्तानूनप्त्रं निगृह्णाति ॥ १८ ॥

आपतये त्वा गृह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वा गृह्णामि शाक्वराय त्वा गृह्णामि शक्मन्नोजिष्ठाय त्वा गृह्णामीति । स यावन्त ऋत्विजस्त एनत्समवमृशन्त्यनाधृष्टमस्यनाधृष्यं देवानामोजो ऽभिशस्तिपा अनभिशस्तेन्यमिति । यजमानमतिवाचयत्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुपगेषꣳ सुविते मा धा इति । स यावन्त ऋत्विजस्तेषूपहवमिष्ट्वा यजमान एव त्रिरवजिघ्रति प्रजापतौ त्वा मनसि जुहोमीति । अथैनदद्भिरभ्युन्नीयोत्तरतः सिञ्चति । अथाहाग्नीन्मदन्त्यापा३ इति । मदन्ति देवीरमृता ऋतावृध इति । ताभिराद्रवेति । अथ मदन्तीरुप-स्पृश्योपोत्थाय विस्रस्य हिरण्यमवधाय राजानमाप्याययन्त्यꣳशुरꣳशुस्ते देव सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय

he pours down the posterior Āghāra by means of two ladles. Without letting the two ladles touch each other, having crossed towards the north, having anointed the Dhruvā with the Juhū, having put down the two ladles, he chooses the Pravara. He chooses the Hotṛ as prescribed.[5] The Hotṛ sits down. The Adhvaryu awaits the impulse (by the Hotṛ). Being impelled, having taken up the two ladles, having crossed and having caused to announce, he says (to the Hotṛ), "Do you recite the yājyā for Samidhs." At the Vaṣaṭ-utterance he makes the offering. (He gives two subsequent calls as) "Do you recite the yājyā," "Do you recite the yājyā." When going to give the fourth yājyā-call, he brings the entire quantity of clarified butter from the Upabhṛt ladle into the Juhū. Having offerred five Prayājas, having crossed towards the north, having put a drop into the Dhruvā, he pours clarified butter over the cake, not into the Upabhṛt. He offers the two Ājyabhāgas respectively to Agni and Soma. He offers the principal oblation in a low voice: "Do you recite the puronuvākyā for Viṣṇu: Do you recite the yājyā for Viṣṇu." He offers the Sviṣṭakṛt-oblation. The Ātithya sacrifice is concluded with the Iḍā. He pours down the Praṇītā goblet within the altar. Having swollen the clarified water into the Dhruvā, he asks for a bronze-vessel or a wooden goblet. Having kept it within the altar, he takes up this Tānūnaptra (clarified butter from the Dhruvā):

VI.19

(With the formula), "I take thee for one who rushes on; I take thee for one who rushes around; I take thee for Tanūnaptṛ; I take thee for the mighty; I take thee for the mightiest strength."[1] As many priests as there are, they touch it together with the formula, "Thou art unapproached, the unapproachable, the unconquerable vigour of gods, protecting from the imprecations, impervious to imprecations."[1] He makes the sacrificer recite the formula, "May the guardian of consecration approve of my consecration; may the Lord of consecration approve of my consecration; the lord of penance my penance. May I quickly attain the truth; keep me in welfare."[1] As many priests as there are, having sought their consent, the sacrificer himself licks it thrice with the formula, "I offer thee unto Prajāpatī, unto the intellect."[2] Having mixed it with water, he scatters it towards the north.

He enquires: "O Agnīdh, are the waters boiling ?" (He replies), "The divine, immortal, rejoicing in the divine law; they are boiling." "Come up with them," (says the Adhvaryu). Having touched the hot water, having stood, having untied (the bundle of Soma), having placed a piece of gold into it; the priests swell king Soma

5. cf. BaudhŚS I.15

1. TS I.2.10.2
2. TS III.1.2.2

प्यायस्वेति । यजमानमतिवाचयत्याप्यायय सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेति । अथाप उपस्पृश्य यथायतनमुपविशन्ति । अथाध्वर्युर्वाजवतीभ्याꣳ स्रुचौ व्यूहति । विधृतीभ्यां प्रस्तरꣳ समुल्लुप्याप्रतिशृणꣳस्त्रेधानक्ति । न प्रस्तरायाश्रावयति । न बर्हिरनुप्रहरति । तं दक्षिणार्धे वेद्यै निधाय तस्मिन्दक्षिणोत्तरिणो निह्नुवत एष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति । परिधिषु शकलानुपसंगृह्णाति । प्रस्तरे बर्हिर्यावन्मात्रꣳ स्पन्द्यया विग्रथ्याहवनीये ऽतिवाल्याद्भिरभ्युक्ष्योत्तरतः सादयति । अथ यजमानमवान्तरदीक्षामुपनयत्यग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि या तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानीति । अथैनꣳ सꣳशास्ति संतरां मेखलाꣳ समायच्छस्व संतरां मुष्टी कुरुष्व तप्तव्रत एधि मदन्तीभिर्मार्जयस्वोत्पूर्वं व्रतनꣳ सृज या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहेति । एतेनातो ऽधि व्रतयेति । स एवमेवैतत्सर्वं करोति । ॥ १९ ॥

अथ प्रवर्ग्यस्यावृता प्रवर्ग्येण चरति । अथ स्फ्यमाददान आहाग्नीन्मदन्तीरधिश्रय हविरधिश्रयैह्युपसीदेति । एतास्वेव मदन्तीषु भूयसीरप आनयति । आज्यमधिश्रयति । तद्धविः । अथैतस्यैव बर्हिष स्तीर्णस्य पर्यवलोपꣳ स्तम्बयजुर्हरति । इदमेव प्रसिद्धं पौरोडाशिकं त्रिर्यजुषा तूष्णीं चतुर्थम् । पूर्वं परिग्राहं परिगृह्णाति । करणं जपति ।

with the formula, "O god Soma, may every shoot of thee swell for Indra who gains the invaluable wealth. May Indra swell for thee; do thou swell for Indra,"[3] He makes the sacrificer recite the formula, "Cause thy friends to swell with gift and wisdom. O god Soma; may I attain the pressing happily."[3] Having touched water, they take their seats.

The Adhvaryu separates the two ladles with the two Vājavatī verses.[4] Having seized the Prastara together with the two separating blades, he besmears it at three places without bruising it. He does not cause to announce in connection with the Prastara.[4] He does not throw the Barhis into the fire. Having kept it (the Prastara) into the southern half of the altar, the priests (respectively) pay homage with their palms, the right one being upwards, with the formula, "Riches are exceedingly desired for food, for prosperity. Be right to the speakers of right; obeisance to the heaven; obeisance to the earth."[3] He keeps pieces of wood upon the enclosing sticks. Having tied a few blades of sacrificial grass upon the Prastara with a cord, having moved it over the Āhavanīya and having sprinkled it with water, he keeps it towards the north. He then initiates the sacrificer into intermediate consecration with the formula, "O Agni, the lord of vows, thou art the lord of vows, let this body of mine be in thee, let this body of thine be in me. O lord of vows, let the vows of us who are the holders of vows be together."[3] He then gives instructions to him (the sacrificer), "Do you tighten the girdle round the waist, close the fists tightly; take hot milk; sprinkle yourself with hot water; give up the earlier formula used for taking Vrata milk. Hereafter consume milk with the formula, "O Agni do thou guard us with thy Rudra form. For that form of thine, svāhā." He (the sacrificer) abides by all this.

VI.20

(The Adhvaryu) performs the Pravargya rite with the procedure for Pravargya. Taking up the wooden sword, he says (to the Āgnīdhra); "O Agnīdh, do thou boil the water; put the oblation on fire, come and be by my side." (The Āgnīdhra) adds water to that very hot water, puts clarified butter on fire. It is the oblation. He carries the Stambayajus taken out of the same spread out sacrificial grass. The rite is well established in the Paurodāśika Brāhmaṇa.[1] (He carries stambayajus) thrice with the relevant yajus and the fourth time silently. He does the first tracing (of the altar). He murmurs the Karaṇa-formula. The Āgnīdhra carries (grass and earth)

3. TS. I.2.11.1
4. cf. BaudhŚS I.19

1. cf. BaudhŚS VI.18

उद्धन्ति । उद्धतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथोत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह मदन्तीरासादयेध्मा-बर्हिरुपसादय स्रुवं च स्रुचौ च संमृड्ढि हविषोदेहीति । आहृतासु मदन्तीषूदस्य स्फ्यं मार्जयित्वेध्माबर्हिरुपसाद्य प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य स्रुवं च स्रुचौ च संमार्ष्टि । हविषोदेति । हविश्च मदन्तीश्चोत्पूयाष्टौ कृत्वो जुह्वां गृह्णीते । चतुरुपभृति । आज्यस्थाल्यां तृतीयामुत्प्रदाय मदन्तीभिरुपोत्तिष्ठति । इध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तादाश्ववालं प्रस्तरं गृह्णाति । एकविधं बर्हि स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य कार्ष्मर्यमयान्परिधीन्परिदधाति । ऊर्ध्वे समिधावादधाति । ऐक्षवी विधृती तिरश्ची सादयति । विधृत्योराश्ववालं प्रस्तरम् । प्रस्तरे जुहूम् । बर्हिषीतरे । एते असदतामिति समभिमृश्य प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य जघनेन गार्हपत्यमुपविश्य देवपत्नीर्व्याचष्टे। अथैतेनैव यथेतमेत्याथेध्मात्समिधमाददान आहाग्नये समिध्यमाना-यानुब्रूहीति । अभ्यादधातीध्मꣳ सकृद्वा त्रिर्वा । न समिधं परिशिनष्टि । वेदेनोपवाजयति । अनूक्तासु सामिधेनीषु स्रुवेणाघारमाघारयति । संमृष्टे न स्रुग्भ्यामुत्तरम् । अथ प्रवरं प्रवृणीते । अथाश्रावयत्यो श्रावयास्तु श्रौषट् सीद होतरित्येतावान्प्रवरः । सीदति होता । प्रसवमाकाङ्क्षति । प्रसूतः स्रुचावाददान आह ॥ २० ॥

अग्नय इति । उपाꣳश्वनुब्रूहीत्युच्चैः । अत्याक्रम्याश्राव्याहाग्निमिति । उपाꣳशु यजेत्युच्चैः । वषट्कृते पूर्वार्धे ऽर्धवेलां जुहोति । अथात्रैव

three times from the dug out region. When the Āgnīdhra carries three times, then (the Adhvaryu), having done the second tracing, having levelled, having held the wooden sword across, gives out the call, "Keep down the hot water, put down the sacrificial grass and faggot, cleanse the spoon and the two ladles and come up with the oblation." After the hot water has been brought in, having thrown the wooden sword, having sprinkled (upon himself), having put down the sacrificial grass and faggot, having turned by the right and having moved towards the west, he cleanses the spoons and ladles. Comes up with the oblation. Having purified the oblation and hot water, he takes up clarified butter into the Juhū eight times; four times into the Upabhṛt. Having poured back into the vessel for clarified butter (first having drawn from the same) and having deemed it as the third (ladle), he stands up with hot water. He sprinkles the faggot; sprinkles the altar; sprinkles the sacrificial grass. Having sprinkled the sacrificial grass (held within the altar) and having poured (water over its knot), he takes up the Prastara of *Saccharum spontaneum* from the front. Having spread the grass in a single row, taking the Prastara in his hand, having moved eastwards, he lays down the enclosing sticks of *Gmelina arborea.* He keeps erect two fire-sticks. He places across two separating blades of sugarcane. The Prastara of *Saccharum spontaneum* upon the separating blades. The Juhū on the Prastara. The other two ladles on the sacrificial grass. Having touched them together with the verse, "These (two) have sat down ..."[2], having turned by the right, having moved towards the west and having sat down to the rear of the Gārhapatya, he recites the Devapatnī formulas.[3]

Having come back by the way by which he had gone, taking a fire-stick from the faggot, he says (to the Hotṛ), "Do you recite verses for the fire being enkindled." He puts the faggot once or in three parts. He does not keep back a fire-stick. He fans (the fire) by means of the Veda. After the Sāmidhenī verses have been recited one by one, he pours an Āghāra-line by means of the spoon. After (the Āhavanīya) has been cleansed, he does not pour the second line by means of the two ladles. Then he chooses the Pravara. He causes to announce, "Do thou announce," "Let it be heard," "Seat yourself O Hotṛ." This much is the Pravara. The Hotṛ sits down. (The Adhvaryu) awaits the impulse (by the Hotṛ). Impelled, taking the ladles, he says (to the Hotṛ):

VI.21

(loudly) "Do you recite the puronuvākyā (in a low tone) for Agni." Having crossed and having caused to announce he says, (loudly) "Do you recite the yājyā

2. TS I.1.11.2 in a modified form
3. TĀ III.9

तिष्ठन्नाह सोमायेत्युपाꣳश्वनुब्रूहीत्युच्चैः । आश्राव्याह सोममित्युपाꣳशु यजेत्युच्चैः । वषट्कृते मध्ये जुहोति । अथ समानयमान आह विष्णव इत्युपाꣳश्वनुब्रूहीत्युच्चैः । आश्राव्याह विष्णुमित्युपाꣳशु यजेत्युच्चैः । वषट्कृते पश्चात्सर्वं जुहोति । अथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वाथाहाग्नीन्मदन्त्यापा३ इति । मदन्ति देवीरमृता ऋतावृध इति । ताभिराद्रवेति । अथ मदन्तीरुपस्पृश्योपोत्थाय विस्रस्य हिरण्यमवधाय राजानमाप्याययन्त्यꣳशुरꣳशुस्ते देव सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेति । यजमानमतिवाचयति । आप्यायय सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेति । अथाप उपस्पृश्य यथायतनमुपविशन्ति । अथाध्वर्युर्वाजवतीभ्याꣳ स्रुचौ व्यूहति। विधृतीभ्यां प्रस्तरꣳ समुल्लुप्याप्रतिशृणꣳस्त्रेधानक्ति । न प्रस्तरायाश्रावयति। न बर्हिरनुप्रहरति । तं दक्षिणार्धे वेद्यै निधाय तस्मिन्दक्षिणोत्तरिणो निह्नुवत एष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति । सव्ये पाणौ प्रस्तरꣳ समावृत्याज्यस्थाल्याः स्रुवेणोपहत्य प्रथमामुपसदं जुहोति या ते अग्ने ऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीꣳ स्वाहेति । परिधिषु शकलानुपसंगृह्णाति प्रस्तरे बर्हिर्यावन्मात्रꣳ स्पन्द्यया विग्रथ्याहवनीये ऽतिवाल्याद्भिरभ्युक्ष्योत्तरतः सादयति ।अथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय त्रिस्तनव्रतं प्रयच्छतेति । आह्वयति सुब्रह्मण्यः सुब्रह्मण्याम् । त्रिस्तनव्रतं प्रयच्छति । अथापराह्ण आपराह्णिकीभ्यां

(in a low tone) for Agni." At the Vaṣaṭ-utterance he offers half the quantity in the eastern half. Standing here only he says (loudly) "Do you recite the puronuvākyā (in a low tone) for Soma." Having caused to announce he says (loudly), "Do you recite the yājyā (in a low tone) for Soma." At the Vaṣaṭ-utterance he makes the offering in the middle. While taking clarified butter from the Upabhṛt into the (Juhū) he says (loudly) "Do you recite the puronuvākyā (in a low tone) for Viṣṇu." Having caused to announce he says (loudly) "Do you recite the yājyā (in a low tone) for Viṣṇu." At theVaṣaṭ-utterance he offers the entire quantity into three parts. Having crossed towards the north and having deposited the ladles in their places, he says, "O Agnīdh, are the waters boiling?" (The latter says), "The divine, immortal, rejoicing in the divine law, they are boiling," "Do thou come up with them." Having touched the hot water, having stood, having untied (the bunch of Soma), having placed a piece of gold into it, the priests swell king Soma with the formula, "O god Soma, may every shoot of thee swell for Indra who gains the invaluable wealth. May Indra swell for thee; do thou swell for Indra."[1] He makes the sacrificer recite the formula, "Cause thy friends to swell with gift and wisdom. O god Soma, may I attain the pressing happily."[1] Having touched water, they take their seats.

The Adhvaryu separates the two ladles with the two Vājavatī verses.[2] Having seized the Prastara together with the two separating blades, he besmears it at three places without bruising it. He does not cause to announce in connection with the Prastara.[2] He does not throw the Barhis into the fire. Having kept it into the southern half of the altar the priests pay homage with their palms, the right one being upwards, with the formula, "The riches are exceedingly desired for food, for prosperity. Be right to the speakers of right. Obeisance to the heaven, obeisance to the earth."[1] Having placed the Prastara into the left hand, having struck clarified butter from the vessel of clarified butter by means of the spoon, he offers the first Upasad with the formula, "That form of thine, O Agni, which rests in iron, the highest that dwells in the depth—by that speech I have driven away harsh speech; I have driven away angry speech, svāhā."[3] He keeps piece of wood upon the enclosing sticks. Having tied a few blades of sacrifical grass upon the Prastara with a cord, having moved it over the Āhavanīya and having sprinkled it with water, he keeps it towards the north. Having gone out, he gives the call, "O Subrahmaṇya, do thou invoke Subrahmaṇyā; give (to the sacrificer) Vrata-milk derived from three udders of the cow." The Subrahmaṇya invokes Subrahmaṇyā. One gives (to the

1. TS. I.2.11.1
2. cf. BaudhŚS I.19
3. TS I.2.11.2

प्रवर्ग्योपसद्भ्यां प्रचरति । तयोः समानी चर्यैतावदेव नाना । सव्योत्तरिणो निह्नुवते । अथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय त्रिस्तनव्रतं दोहयतेति । आह्वयति सुब्रह्मण्यः सुब्रह्मण्याम् । त्रिस्तनव्रतं दोहयति । तदर्धरात्रे प्रयच्छति ॥ २१ ॥ पञ्चमः ॥

अथाध्वर्युरपररात्र आद्रुत्य सꣳशास्ति द्विस्तनव्रतं दोहयतेति । प्रातरुदित आदित्ये विसृष्टायां वाचि मध्यमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति। रजाशयामत्र जुहोति । अथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय द्विस्तनव्रतं प्रयच्छतेति । आह्वयति सुब्रह्मण्यः सुब्रह्मण्याम् । द्विस्तनव्रतं प्रयच्छति । स आहवनीयादेवाग्रे षट् प्राचः प्रक्रमान्प्रकामति । तच्छङ्कुं निहन्ति । स शालामुखीयः शङ्कुः । शालामुखीयाच्छङ्कोः षट्त्रिꣳशत्प्राचः प्रक्रमान्प्रक्रामति । तच्छङ्कुं निहन्ति । स यूपावटीयः शङ्कुः । शालामुखीयाच्छङ्कोः पञ्चदश दक्षिणा प्रक्रमान्प्रक्रामति पञ्चदशोदीचः । तच्छङ्कू निहन्ति । ते श्रोणी । यूपावटीयाच्छङ्कोर्द्वादश दक्षिणा प्रक्रमान्प्रक्रामति द्वादशोदीचः । तच्छङ्कू निहन्ति । तावꣳसौ । अथैनामक्ष्णया मानेन प्रमाय समन्तꣳ स्पन्द्यया परितनोति । पृष्ठ्यामातनोति । यूपावटीयाच्छङ्कोरनुस्पन्द्यं द्वादश प्रत्यञ्चि क्षुद्रपदानि प्रक्रामति । तच्छङ्कुं निहन्ति । स मध्यम औत्तरवेदिकः शङ्कुः । मध्यमादौत्तरवेदिकाच्छङ्कोः पञ्च दक्षिणा क्षुद्रपदानि प्रक्रामति पञ्चोदञ्चि । तच्छङ्कू निहन्ति । ते श्रोणी । यूपावटीयाच्छङ्कोश्चत्वारि दक्षिणा क्षुद्रपदानि प्रक्रामति चत्वार्युदञ्चि । तच्छङ्कू निहन्ति । तावꣳसौ। अथैनामक्ष्णया मानेन प्रमाय समन्तꣳ स्पन्द्यया परितनोति । पृष्ठ्यामात- नोति । मध्यमादौत्तरवेदिकाच्छङ्कोरनुस्पन्द्यꣳ षट् प्रतीचः प्रक्रमान्प्रक्रामति

sacrificer) Vrata-milk derived from three udders of the cow. In the afternoon the Adhvaryu performs the afternoon Pravargya and Upasad. Their procedure is similar; this much is different: (the priests) pay homage by means of the palms with the left one upwards. Having gone out (the Adhvaryu) gives out the call, "O Subrahmaṇya, do thou invoke Subrahmaṇyā; do you cause the Vrata-milk to be milked from three udders." The Subrahmaṇya invokes Subrahmaṇyā. One causes the Vrata-milk to be milked from three udders. He gives it (to the sacrificer) at midnight.

VI.22

Having come up in the latter part of night, the Adhvaryu gives out the call, "Do you cause the Vrata-milk to be milked from two udders (of the cow)." In the morning after the sun has risen, and speech has been released, the Adhvaryu goes through the rites of middle Pravargya and Upasad. Here he makes the *rajāśayā* offering.[1] Having gone out, he gives out the call, "O Subrahmaṇya, do thou invoke Subrahmaṇyā, do you give (to the sacrificer) Vrata-milk obtained from two udders (of the cow)." Subrahmaṇya invokes Subrahmaṇyā. One gives (to the sacrificer) Vrata-milk obtained from two udders.

(The Adhvaryu) first strides six steps from the Āhavanīya towards the east. There he fixes a pin. That is the Śālāmukhīya[2] pin. From the Śālāmukhīya pin he strides thirty six steps towards the east. There he fixes a pin. That is the Yūpāvaṭīya pin.[3] From the Śālāmukhīya pin he strides fifteen steps towards the south; fifteen towards the north, there he fixes pins. These two are the buttocks. From the Yūpāvaṭīya pin he strides twelve steps towards the south; twelve towards the north. He fixes pins there. They are the shoulders. Having measured it (the Mahāvedi) by a diagonal measure, he stretches a cord around on all sides. He stretches the Pṛṣṭhyā line. From the Yūpāvaṭīya pin he strides twelve feet towards the west along the Pṛṣṭhyā. He fixes a pin there. That is the central pin pertaining to the Uttaravedi. From the central pin he strides five feet towards the south; five towards the north. He fixes pins there. They are the buttocks. From the Yūpāvaṭīya pin he strides four feet towards the south, four towards the north. He fixes two pins there. They are the shoulders. Having measured it (the Mahāvedi) by a diagonal measure, he stretches out a cord round it on all sides. He stretches the Pṛṣṭhyā line. From the central pin

1. The Upasad-offering with the formula, *yā te agne rajāśayā*....TS I.2.11.2.
2. The Āhavanīya fire in the Prāgvaṁśa shed takes the name Śālāmukhīya after that Āhavanīya fire is carried forth on the Uttaravedi in the Mahāvedi.
3. Yūpāvaṭīya pin denotes the spot where a hole is dug out for erecting the sacrificial post.

दक्षिणा सप्तमम् । तत्स्फ्यं निदधाति । स उपरवाणां कालः । अथ महावेद्या उत्तरादꣳसीयाच्छङ्कोर्वेद्यन्तेन द्वादश प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं त्रयोदशम् । तदाग्नीध्र उपसीदति । स उत्करस्य कालः । अथोपरवाणां कालात्स्तम्बयजुर्हरति ॥ २२ ॥

इदमेव प्रसिद्धं पौरोडाशिकम् । त्रिर्यजुषा तूष्णीं चतुर्थम् । पूर्वं परिग्राहं परिगृह्णाति । करणं जपतीमां नराः कृणुत वेदिमेत्य वसुमतीꣳ रुद्रवतीमादित्यवतीं विश्वदेव्यावतीं वर्ष्मन्दिवो नाभा पृथिव्या यथायं यजमानो न रिष्येदिति । उद्धन्ति । उद्धतादाग्नीध्रस्त्रिर्हरति । यदाग्नीध्रस्त्रिर्हरत्यथाग्रेण शालां तिष्ठन्संप्रैषमाह वेदिकारा वेदिं कल्पयत प्रस्थलानि भिन्दत प्रति निम्नान्पूरयत किꣳशारूणि निरस्यत प्राचीमुदीचीं प्रणवां निस्तिष्ठतेति । यथासंप्रैषं ते कुर्वन्ति । अथ महावेद्या उत्तरादꣳसीयाच्छङ्कोर्वेद्यन्तेन त्रीन्प्रतीचः प्रक्रमान्प्रक्रामत्युदञ्चं चतुर्थम् । तच्चात्वालस्यावृता चात्वालं परिलिखति । उत्तरवेदेरावृतोत्तरवेदिं निवपति । उत्तरनाभिमुत्साद्याथैनां प्रतिच्छाद्यापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति । अथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय द्विस्तनव्रतं दोहयतेति । आह्वयति सुब्रह्मण्यः सुब्रह्मण्याम् । द्विस्तनव्रतं दोहयति । तदर्धरात्रे प्रयच्छति ॥ २३ ॥ षष्ठः ॥

अथाध्वर्युरपररात्र आद्रुत्य सꣳशास्त्येकस्तनव्रतं दोहयतेति । प्रातरुदित आदित्ये विसृष्टायां वाच्युत्तमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति । हराशयामत्र जुहोति । अथोपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वयार्धस्तनव्रतं

pertaining to the Uttaravedi he strides six steps towards the west along the cord. A seventh step towards the south. He places the wooden sword there. That is the spot for the Uparava holes. From the pin on the northern shoulder of the Mahāvedī he strides twelve steps towards the west along the border of the Mahāvedi; a thirteenth step towards the north. The Āgnīdhra sits there. That is the spot for the rubbish-heap. He carries Stambayajus from the spot for the Uparava holes.

VI.23

The rite is prescribed in the Pauroḍāśika Brāhmaṇa.[1] (He carries Stambayajus) three times with the relevant formula and the fourth time silently. He does the first tracing of the altar. He murmurs the Karaṇa-formula: "O men, do you come and prepare this altar occupied by the Vasus, Rudras, Ādityas and Viśve Devas at the height of the heaven, on the navel of the earth so that this sacrificer may not be injured."[2] He digs up. The Āgnīdhra carries three times (grass and earth) from the dug up spot. When the Āgnīdhra carries three times, the Adhvaryu standing in front of the shed gives out the call, "O workers of the altar, do you prepare the altar, break up the heights, fill in the depths, remove the beards of corn, render it slopy towards the north-east." They do according to the call.

From the pin at the northern shoulder of the Mahāvedi, he strides three steps towards the west along the border and a fourth towards the north. Here he draws around the Cātvāla following the procedure of the Cātvāla.[3] He raises the Uttaravedi following the procedure for the Uttaravedi.[3] Having carved out the Uttaranābhi and having covered it,[3] he goes through the rites of the afternoon Pravargya and Upasad. Having gone out he gives out the call, "O Subrahmaṇya, do thou invoke Subrahmaṇyā; do you cause the Vrata-milk to be obtained from two udders." The Subrahmaṇya invokes Subrahmaṇyā. One causes the Vrata-milk to be milked from two uddrs. He gives it (to the sacrificer) at midnight.

VI.24

The Adhvaryu, having approached in the latter part of night, gives the instruction, "Do you cause the Vrata-milk to be milked from one udder (of the cow)." In the morning, after the sun has risen and speech has been released, he goes through the last Pravargya and Upasad. Here he makes the *harāśayā* offering.[1]

1. cf. Footnote to BaudhŚS VI.18
2. cf. TBr. III.7.7.13
3. cf. BaudhŚS IV.2

1. The Upasad-offering with the formula, *yā te agne harāśayā....* TS I.2.11.2.

प्रयच्छतेति । आह्वयति सुब्रह्मण्यः सुब्रह्मण्याम् । अर्धस्तनव्रतं प्रयच्छति । अथ तदानीमेवापराह्णिकी प्रवर्ग्योपसदौ समस्योपनिष्क्रम्य संप्रैषमाह सुब्रह्मण्य सुब्रह्मण्यामाह्वय प्रतिप्रस्थातः प्रवर्ग्यस्यावृता प्रवर्ग्यꣳ संसादयोद्वासनायेति । त्रेधैतत्पदं कुर्वन्ति । गार्हपत्ये तृतीयमुपयमनीषु तृतीयं नि तृतीयं दधति । अथ प्रवर्ग्यस्यावृता प्रवर्ग्यमुद्वासयति । अग्नेरावृताग्निं प्रणयति । अग्निवत्युत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चꣳ स्फ्यꣳ स्तब्ध्वा संप्रैषमाह प्रोक्षणीरासादयेध्माबर्हिरुपसादयेत्येतावान्संप्रैषः । अत्रैवैतद्बर्हिरनुस्पन्द्यꣳ स्तृणाति सकृदेव । एतदेवेध्माबर्हिरग्नीषोमीयाय पशवे परिशयीतेत्येक आहुः । अथास्यैते अनसी प्रक्षालिते प्रपन्ने योग्यकृते अभितः शालां तिष्ठतः । तयोर्दक्षिणं वर्षीय उत्तरꣳ ह्रसीयः । उद्धृतफलकं दक्षिणमनुद्धृतफलकमुत्तरम् । तयोर्यदक्षे बद्धं तदवस्यति । अथैने अन्तर्वेद्यभ्यववर्तयन्ति । अथाग्रेण शालामरत्निमात्रमभित स्पन्द्याꣳ स्थापयित्वा । अथैने प्रोक्षति वैष्णवी विष्णवे शुन्धेथामिति । अथाहैहि यजमानेति । पूर्वया द्वारा शालां प्रपाद्य गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा शालामुखीये सावित्रं जुहोत्यन्वारब्धे यजमाने युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहेति । अपरं चतुर्गृहीतं गृहीत्वाथ याचत्याज्यस्थालीꣳ सस्रुवाꣳ स्फ्यमुदपात्रं बर्हिर्हिरण्यमिति । एतत्समादायाहैहि यजमानेति । अन्वग्यजमानो ऽनूची पत्नी पदतृतीयमादाय पूर्वया द्वारोपनिष्क्रम्य दक्षिणस्य हविर्धानस्य पश्चादक्षमुपसृप्य दक्षिणस्यां वर्तन्याꣳस्फ्येनोद्धृत्यावोक्ष्य हिरण्यं निधाय संपरिस्तीर्याभिजुहोतीदं विष्णुर्विचक्रमे त्रेधा

Having gone out, he gives the call, "O Subrahmaṇya, do thou invoke Subrahmaṇyā; do you give (to the sacrificer) half of the Vrata-milk obtained from one udder." The Subrahmaṇya invokes Subrahmaṇyā. One gives half of the Vrata-milk obtained from one udder. At that very time, having hastened with the afternoon Pravargya and Upasad and having gone out, he gives out the call, "O Subrahmaṇya, do thou invoke Subrahmaṇyā; O Pratiprasthātṛ, do you collect the Pravargya-implements for disposal, following the procedure for the Pravargya." (The soil of) the foot-print (of the cow) is divided into three parts: one part into the Gārhapatya fire-place, one in the soil in the supporting ladle, one is preserved. He disposes of the Pravargya-implements following the procedure laid down in the Pravargya-rite.[2]

He carries forth the fire following the procedure of carrying forth of fire.[3] After having done the second tracing (of the altar) when it is equipped with fire, having levelled, having held the wooden sword across, (the Adhvaryu) gives the call, "Do you keep the Prokṣaṇī-water, put down the sacrificial grass and faggot." This much is the call. Here he spreads the sacrificial grass along the cord only once. This sacrificial grass and faggot lies for the Agnī-ṣomīya animal. So say some teachers. The two carts, washed out, brought in and provided with a yoke, stand on the two sides of the shed. The southern one of the two is higher and the northern-one is shorter. The southern one with its plank lifted; the northern one with its plank not lifted up. He loosens (the cord) which is tied to their axles. They are brought in within the altar. Having stayed them on both sides of the cord one *aratni* away from the shed, he sprinkles them with the formula, "You two belonging to Viṣṇu, be purified for Viṣṇu." Then he says, "Come, O sacrificer." Having caused him to enter the shed by the eastern door, having melted clarified butter over the Gārhapatya, having purified it, and having taken four spoonfuls into the ladle, he makes an offering to Savitṛ on the Śālāmukhīya, while the sacrificer has contacted him, with the verse, "The priests of the mighty wise priest yoke their mind, yoke their thoughts. He alone who knows the path ordains their priestly functions. The praise of god Savitṛ is great,[4] svāhā."

Having taken up another four spoonfuls, he asks for the vessel for clarified butter together with the spoon, wooden sword, pot filled with water, sacrificial grass and a piece of gold. Having taken this, he says, "Come O sacrificer." The sacrificer following him, the sacrificer's wife following him taking up a third part of soil of the footprint. Having gone out by the eastern door, having approached the spot to the rear of the axle of the southern Havirdhāna cart, having dug up by means of the wooden sword on the southern track, having sprinkled water with downward palm;

2. cf. BaudhŚS IX. 13 ff
3. cf. BaudhŚS IV.3
4. TS I.2.13.1

निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहेति । अथैतेषां पदपाꣳसूनामर्धान्पत्न्यञ्जलावावपति । अथैनान्सꣳस्रावेणाभिघारयति । सा प्राचोत्तानेन पाणिना दक्षिणमक्षधुरमुपानक्त्या नो वीरो जायतां कर्मण्यो यꣳ सर्वे अनुजीवाम यो बहूनामसद्वशीति । अपरं चतुर्गृहीतं गृहीत्वोत्तरस्य हविर्धानस्य पश्चादक्षमुपसृप्योत्तरस्यां वर्तन्याꣳ स्फ्येनोद्धत्यावोक्ष्य हिरण्यं निधाय संपरिस्तीर्याभिजुहोतीरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे यशस्ये । व्यस्कभ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः स्वाहेति । अत्रैतान्पदपाꣳसून्सर्वश एव पत्न्यञ्जलावावपति । अथैनान्सꣳस्रावेणाभिघारयति । सा प्राचोत्तानेनैव पाणिनोत्तरमक्षधुरमुपानक्ति । समान उपाञ्जनः । अथैतानि शस्त्राणि प्रतिप्रस्थात्र उत्प्रयच्छति । नयन्ति पत्नीꣳ ह्वयन्ति होतारम् । अथैने संपरिगृह्य संप्रैषमाह ॥ २४ ॥

हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीति । त्रिरुक्तायां प्रवर्तयन्ति प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जीह्वरतमिति । अथ यद्यक्ष उत्सर्जति सुवाग्देव दुर्याꣳ आवदेत्येव तत्र जपति । अथैतावञ्जसोपसंक्रामतो ऽध्वर्युश्च प्रतिप्रस्थाता च । उत्तरेण हविर्धाने परीत्य पूर्वावुपातीत्य मध्यमादौत्तरवेदिकाच्छङ्कोरनुस्पन्द्यं त्रीन्प्रतीचः प्रक्रमान्प्रक्रामतः । तदेनयोर्नभ्यस्थयोश्चुबुके रमयतो ऽत्र रमेथां वर्ष्मन्पृथिव्या इति । अथ दिवो वा विष्णवुत वा पृथिव्या इत्याशीर्पदयर्चाध्वर्युर्दक्षिणस्य हविर्धानस्य

having placed a piece of gold, and having strewn grass around it; the Adhvaryu makes an offering with the verse, "Viṣṇu has traversed this, he has set his foot at three places; all is gathered in its dust, svāhā."[4] He pours half of the dust of the footprint in the folded palms of the sacrificer's wife. He pours over it drops of clarified butter in the ladle. She anoints the southern end of the axle by means of the palm turned upwards and pointing towards the east with the formula, "May a heroic active son be born to us on whom we all shall depend, who shall control many."[5] Having taken up another four spoonfuls, having moved towards the west of the axle of the northern Havirdhāna-cart, having struck with the wooden sword on the northern track, having sprinkled water, having placed a piece of gold and having strewn it around; he makes an offering with the verse, "O heaven and earth, do you become possessors of food, cattle and good grains, and glorious for the sacrificer. Viṣṇu fixed you separately and held you on both sides by means of his rays, svāhā."[6] At this stage he pours down the entire soil of the foot-print within the joined palms of the sacrificer's wife. He spreads drops of clarified butter over it. She besmears the northern axle-end by means of the palm turned upwards and pointing towards the east. The formula for besmearing is the same.[7] He hands over all the implements to the Pratiprasthātṛ. The sacrificer's wife is led (towards her apartment). The Hotṛ is called. Touching the two (Havirdhāna-carts) together, he gives out the call.

VI.25

"Do you recite the verses for the two Havirdhāna-carts being moved." When the (first) verse has been recited thrice, they move (the carts) with the Adhvaryu reciting the verse, "Do you (O carts), move towards the east, furnishing the sacrifice. Do you lead the sacrifice upwards (towards the gods). Do not stumble."[1] If the axle creaks, he should murmur the formula, "Speak O god, good speech about the residence."[2] The Adhvaryu and Pratiprasthātṛ go forward straight. Having gone round along the north[3] and having traversed towards the east (of the respective carts), they step three steps towards the west (from the spots) along the cord touching the middle pin pertaining to the Uttaravedi. At these points they station those planks of the wheels of the two carts out of which the navels of the carts

5. TS I.2.13.5
6. TS I.2.13.2
7. See *supra*

1. TS I.2.13.2
2. TS I.2.13.1
3. Respectively of the two carts

दक्षिणतो मेथीं निहन्ति । अथैनाꣳ स्पन्द्यया सूपनिबद्धामुपनिबध्नाति विष्णोर्नु कं वीर्याणि प्रवोचमिति । एवमेव प्रतिप्रस्थातोत्तरस्य हविर्धानस्योत्तरतो मेथीं निहन्ति । अथैनाꣳ स्पन्द्यया सूपनिबद्धामुपनि-बध्नाति। एतेनैव मन्त्रेण । अथाध्वर्युर्दक्षिणस्य हविर्धानस्य चुबुकात्प्राञ्चमरत्निं मीत्वा लोके न्यस्य गर्तं खानयति । अथ दक्षिणाद्युगान्तात्प्राञ्चं बाहुं मीत्वा लोके न्यस्य गर्तं खानयति । तावुभावुत्तरेणान्यं गर्तं खानयति । एवमेव प्रतिप्रस्थातोत्तरतस्त्रीन्गर्तान्खानयति । एवमपरतः । तेषु प्राचीनकर्णा स्थूणा उच्छ्रयन्ति । तासूदञ्चौ वꣳशौ प्रोहन्ति । अध्यस्यन्ति पुरस्ताद्रराटीं विष्णो रराटमसीति । विष्णोः पृष्ठमसीति मध्यमं छदिरधिनिदधाति । विष्णो श्न्यप्त्रे स्थ इति ये अभितो भवतः । दक्षिणतश्चोत्तरतश्च परिश्रयन्ति। प्राचीं च प्रतीचीं च द्वारौ कुर्वन्ति । अथ दक्षिणे द्वार्बाहौ कुशहस्तमुपनिगृह्य दर्भणं प्रवयति दर्भणे स्पन्द्यां विष्णोः स्यूरसीति । विष्णोर्ध्रुवमसीति ग्रन्थिं करोति । तं तदानीमेव विस्रस्याहाकुर्वन्तो ग्रन्थीन्हस्तकौशलैर्निस्तिष्ठतेति। एवमेवोत्तरं द्वार्बाहुम् । एवमपरे द्वार्बाहू निस्तिष्ठति । अथैनदभिमृशति वैष्णवमसि विष्णवे त्वेति । अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य शालामुखीयाच्छङ्कोरनुस्पन्द्यꣳ षट् प्राचः प्रक्रमान्प्रक्रामति दक्षिणा सप्तमम् । तदभ्रिं निदधाति । स औदुम्बर्यै कालः । औदुम्बर्यै कालादभ्रि-मादत्ते ॥ २५ ॥

have been prepared, with the formula, "Do you stand here on the height of the earth."[1] The Adhvaryu fixes a pin towards the south of the southern Havirdhāna cart with the verse known as *āśīrpadā*, "Do you, O Viṣṇu, fill in my hands with many kinds of wealth from the heaven or from the earth, from the Maharloka or the midregion. Grant me wealth from the right hand and the left one."[1] He ties it well with a cord (to the cart) with the verse, "I shall proclaim the heroic deeds of Viṣṇu who measured out the earthly regions, who supported the upper abode, traversing the space of three steps, the wide-going."[1] Similarly the Pratiprasthātṛ fixes a pin, towards the north of the northern cart. He ties it well with a cord (to the cart) with the same verse.

The Adhvaryu, having measured one *aratni* from the (resting) plank of southern Havirdhāna-cart and having placed a clod,[4] causes a hole to be dug. Then having measured one arm towards the east from the southern yoke-end and having placed a clod,[4] he causes a hole to be dug. He causes another hole to be dug between these two. Similarly the Pratiprasthātṛ causes three holes to be dug towards the north. Similarly towards the west. In these (holes) poles with their forked tops pointing towards the east are raised. On those (posts) two bamboos pointing towards the north are fixed. Towards the east they put up a frontlet with the formula, "Thou art the forehead of Viṣṇu."[5] With the formula, "Thou art the back of Viṣṇu,"[5] the Adhvaryu places over the middle roof. With the formula, "You are the mouth-corners of Viṣṇu"[5] (he places) those which are on both sides. They enclose (the structure) towards the south and north. Two doors are made—one towards the east and the other towards the west. Having fixed a handful of Kuśa-grass on the southern post of the (eastern) door, he insinuates a poker, and a thread into the poker with the formula, "Thou art the thread of Visnu."[5] He ties a knot with the formula, "Thou art a fixed point of Viṣṇu."[5] Having loosened it the Adhvaryu says, "Do you decorate (the door-post) with hand-skill without tying any knots." In the same way northern door-post. In the same way he decorates the posts of the rear door. He then touches (the structure) with the formula, "Thou beliongst to Viṣṇu; for Viṣṇu thee."[5] The Adhvaryu, having turned by the right and hastening to the west, steps six eastward steps along the cord from the pin related to the Śālāmukhīya fire-place, and the seventh step towards the south. He keeps the hoe there. That is the spot for the post of Udumbara (*Ficus glomerata*). From the spot for the Udumbara post, he takes up the hoe.

4. The text has *loke nyasya*. The word *loke* needs to be emended as *lokam*. Bhavasvāmin explains *loṣṭam pātayitvā*.
5. TS I.2.13.3

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददं इति । आदायाभिमन्त्रयते ऽभ्रिरसि नारिरसीति । तयौदुम्बर्या अवटं परिलिखति परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामीति । अथोद्गातारमाहोद्गातरेहीममौदुम्बर्या अवटं खन प्राक् पुरीषमुद्वपतादिति । तꣳ स खनति वा खानयति वा । सो ऽत एव सदो विमिमीते । यथा त्रीणि छदीꣳषि तिर्यञ्च्येवं प्राक्शः । यथा त्रीणि छदीꣳष्यन्वञ्च्येवमुदक्शः । अपि वा यथा द्वौ भागावुदक् स्पन्द्यायै स्यातामेको दक्षिणत इति । तस्य त्रीञ्छ्रेणिगर्तान्खानयति । सोऽत एव प्राङ् द्रुत्वा दक्षिणस्य हविर्धानस्य पुरो ऽक्षमुपरवान्विमिमीते प्रादेशमुखान्प्रादेशान्तस्पादान् । अथोन्नेतारमाहोन्नेतरेहीमानुपरवान्खन प्रादेशमुखान्प्रादेशान्तस्पादान्बाहुमात्रानवाचो ऽसंभिन्दन्नुपरिष्टादधस्तात्संतृण्णानिति । तान्स खनति वा खानयति वा । अथैषां पुरीषं दक्षिणस्य हविर्धानस्याग्रेणोपस्तम्भनं निवपति । तं चतुरश्रं खरं करोति । अथैनꣳ सिकताभिराभ्राशिनं करोति। अथोपरवाणां कालादभ्रिमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददं इति । आदायाभिमन्त्रयते ऽभ्रिरसि नारिरसीति । तया यूपावटं परिलिखति यथान्तर्वेद्यर्धꣳ स्याद्बहिर्वेद्यर्धं परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामीति । अथाग्नीध्रमाहाग्नीदेहीमं यूपावटं खनोपरसंमितं प्राक् पुरीषमुद्वपताच्चतुरङ्गुलेनोपरमतिखनतादिति । तꣳ स खनति वा खानयति वा । यावदेवात्राध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थातौदुम्बरीꣳ स्थूणां यजमानेन संमायाधस्तात्परिवासयत्यच्छिन्नो रायः सुवीर इति । अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य

VI.26

(With the formula) "I take up (thee) under the impulse of god Savitṛ with the arms of Aśvins with the hands of Pūṣan." Having taken it up, he recites over it the formula, "Thou art the hoe; thou art not an enemy."[1] By means of it he draws around a line for the hole with the formula, "The Rakṣas is marked around, the evil spirits are marked around; here do I cut off the neck of the Rakṣas who hates us and whom we hate; here do I cut off the neck of the Rakṣas."[1] He then says to the Udgātṛ, "Do you come O Udgātṛ; do you dig out the hole for the Udumbara-post; take out the soil towards the east." He himself digs or makes one dig. At this point (the Adhvaryu) measures the Sadas hall. Towards the east (it should be so extensive that there would be) three roofs crosswise. So extensive towards the north that lengthwise there would be three roofs. Alternately there would be two parts towards the north, one towards the south. For it he gets holes dug out in three rows.

At this point, having moved towards the east, he measures Uparava-holes in front of the axle of the southern Havirdhāna-cart with openings of one span and with a distance of one span. He says to the Unnetṛ, "Come O Unnetṛ, do thou dig out these Uparavas having openings of one span each, having distance inbetween of one span each, one hand deep, not joined on the surface but hollowed out below. He digs them or gets dug. He pours down their soil in front of the support of the southern Havirdhāna-cart. He makes a four-cornered mound out of it. He renders it bright by means of sand. From the spot of the Uparavas he takes up the hoe with the formula, "I take (thee) under the impulse of god Savitṛ, with the arms of Aśvins, with the hands of Pūṣan." Having taken it up, he recited over the formula, "Thou art a hoe; thou art not an enemy."[1] With it he marks around the hole for the sacrificial post in such a way that it would be half within the Vedi and half outside the Vedi, with the formula, "The Rakṣas is marked around; evil spirits are marked around. Here do I cut off the neck of the Rakṣas who hates us and whom we hate. Here do I cut off the neck of the Rakṣas."[1] He says to the Āgnīdhra, "O Agnīdh, do thou come, do thou dig up this hole for the sacrificial post as deep as the bottom of the post; do thou pour out the soil towards the east; do thou dig out as deep as the bottom and four aṅgulas above." He digs out the hole or gets it dug out.

While the Adhvaryu acts here, the Pratiprasthātṛ, having measured the Udumbara post equal to (the height of) the sacrificer, cuts it at the lower part with the formula, "May the wealth consisting of brave sons be uninterrupted."[2] The Adhvaryu, having turned by the right and having hastened to the west, asks for Prokṣaṇī water mixed with barly-grains, a handful of sacrificial grass, vessel of

1. TS I.3.41
2. TS I.3.9.2

याचति यवमतीः प्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीः सस्रुवां मैत्रावरुणदण्डः हिरण्यमुदपात्रमिति । एतत्समादायाहैहि यजमानेति । औदुम्बर्येषा स्थूणा प्रक्षालिता प्रपन्ना प्रागवटादुपशेते । तां परस्तादर्वाचीं प्रोक्षति ॥ २६ ॥

दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति । अवटे ऽपो ऽवनयति शुन्धतां लोकः पितृषदन इति । यवान्प्रस्कन्दयति यवो ऽसि यवयास्मद्द्वेषो यवयारातीरिति । बर्हिर्हस्तं व्यतिषज्यावस्तृणाति पितृणाः सदनमसीति। अथैनद्धिरण्यमन्तर्धाय स्रुवाहुत्याभिजुहोति पितृभ्यः स्वाहेति । अथैनामुच्छ्रयत्युद्दिवः स्तभानान्तरिक्षं पृण पृथिवीं दृःहेति । अथैनां प्राचीनकर्णां मिनोति द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणयोर्ध्रुवेण धर्मणेति । अथैनां प्रदक्षिणं पुरीषेण पर्यूहति ब्रह्मवनिं त्वा क्षत्रवनिः सुप्रजावनिः रायस्पोषवनिं पर्यूहामीति । मैत्रावरुणदण्डेन सःहन्ति ब्रह्म दृःह क्षत्रं दृःह प्रजां दृःह रायस्पोषं दृःहेति । अन्यूनमनतिरिक्तं परिन्यस्योदपात्रमुपनिनीय । अथास्यै विशाखे हिरण्यं निधाय स्रुवाहुत्याभिजुहोति घृतेन द्यावापृथिवी आपृणेथाः स्वाहेति । आन्तमन्ववस्रावयति । आन्तमेव यजमानं तेजसानक्तीति ब्राह्मणम् । अथैनामुद्गातृभ्यः प्राहुः । तस्यां तच्चेष्टन्ति यत्ते विदुः । एतस्या उच्छ्रयणमनु प्राचीनकर्णा स्थूणा उच्छ्रयन्ति । तासूदीचो वःशान्प्रोहन्ति । अध्यस्यन्ति मध्यमं छदिरिन्द्रस्य सदो ऽसीति । विश्वजनस्य छायेति ये अभितो भव- तः । नवच्छदि तेजस्कामस्य मिनुयादिति । त्रीणित्रीण्येव सर्वाणि भवन्ति । दक्षिणान्युत्तराणि करोति । स दक्षिणानि दक्षिणान्येवोत्तराणि करोति । अन्तर्वर्तान्करोति व्यावृत्त्या इति । सन्धिषु तृणवर्तान्प्रत्यस्यति।

clarified butter together with the spoon, the staff for the Maitrāvaruṇa, a piece of gold and a pot full of water. Having taken this up, he says, "Come O sacrificer." This Udumbara-post, cleansed, and got ready, lies down to the east of the hole. He sprinkles water over it from the top downwards.

VI.27

(With the formula) "For heaven thee, for midregion thee, for earth thee."[1] He pours water into the hole with the formula, "May the region for seating the Pitṛs be purified."[1] He scatters barley-grains (into the hole) with the formula, "Thou art a barley-grain; do thou drive away the enemy from us; do thou drive away the evil spirits."[1] He spreads the handful of sacrificial grass, held crosswise, with the formula, "Thou art the seat of Pitṛs."[1] He offers a spoonful through a piece of gold with the formula, "Svāhā to Pitṛs." He erects it with the formula, "Supporting the heaven, do thou fill in the midregion; strengthen the earth."[1] He fixes it with its wood-knot turned towards the east with the formula, "May Dyutāna, the son of Maruts, fix thee with the firm law of Mitra and Varuṇa."[2] He surrounds it with the soil by the right with the formula, "I pile around thee, the winner of Brahmanhood, the winner of Kṣatriyahood, the winner of good progeny, and the winner of abundance of wealth."[2] He praises it with the staff of the Maitrāvaruṇa with the formula. "Do thou strengthen the Brahman, do thou strengthen Kṣatra, do thou strengthen progeny, do thou strengthen the abundance of wealth."[2] Having put around (the soil) not more not less, having poured a potful of water, and having placed a piece of gold within its two prongs, he offers a spoonful with the formula, "Be you, O heaven and earth, filled with clarified butter, svāhā."[2] "He causes it to flow up to the bottom. He thereby besmears the sacrificer with splendour." So says the Brāhmaṇa.[3] (The erection of) the Udumbara-post is announced to the Upagātṛs. They act with regard to it what they know.

Following the erection of this (post), the post (of the hall) are erected with their wood-knots turned towards the east. Bamboos are placed upon them with their tops pointing towards the north. The middle roof is set up with the formula, "Thou art the seat of Indra."[2] The two (roofs) which are on both sides with the formula, "Thou art the shade of Viśvajana."[2] "One should set up (the Sadas) with nine roofs."[3] The roofs on all sides are three each. "He makes the southern ones resting upon (the middle ones)."[3] He makes all the southern roofs resting upon

1. TS. I.3.6.1
2. TS. I.3.1.2
3. cf. TS. VI.2.10.5

ते ऽन्तर्वर्ता: । अथैनत्परिश्रयन्ति परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतो वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय इति । दक्षिणतश्चोत्तरतश्च परिश्रयन्ति। प्राचीं च प्रतीचीं च द्वारौ कुर्वन्ति । अथ दक्षिणे द्वार्बाहौ कुशहस्तमुपनिगृह्य दर्भणं प्रवयति दर्भणे स्पन्द्यामिन्द्रस्य स्यूरसीति । इन्द्रस्य ध्रुवमसीति ग्रन्थिं करोति । तं तदानीमेव विस्रस्याहाकुर्वन्तो ग्रन्थीन्हस्त-कौशलैर्निस्तिष्ठतेति । एवमेवोत्तरं द्वार्बाहुम् । एवमपरे द्वार्बाहू निस्तिष्ठति। अथैनदभिमृशत्यैन्द्रमसीन्द्राय त्वेति । अथ महावेद्या उत्तरादꣳसीया-च्छङ्कोर्वेद्यन्तेनाष्टादश प्रतीच: प्रक्रमान्प्रक्रामति । तदाग्नीध्रागारं विमिमीते यथान्तर्वेद्यर्धꣳ स्याद्बहिर्वेद्यर्धम् । अथैनत्समुच्छ्रित्य परिश्रयन्ति । तस्य दक्षिणां द्वारं कुर्वन्ति । आग्नीध्रागारस्य पार्श्वमानी पञ्चारत्नि: । एतेन मार्जालीयो व्याख्यात: । तस्योदीचीं द्वारं कुर्वन्ति ॥ २७ ॥ सप्तम: ॥

अथात्रैव तिष्ठन्याचत्यभ्रिं यवमती: प्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीꣳ सस्रुवामधिषवणं चर्माधिषवणे फलके षट् छङ्कून्ग्रावाणꣳ हिरण्यमुदपात्रमिति । एतत्समादायाहैहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य दक्षिणस्य हविर्धानस्य नीड एतच्चर्मोत्सादयति । पुरो ऽक्षमितराणि सꣳसादयन्ति । अथोपरवाणां कालादभ्रिमादत्ते देवस्य त्वा सवितु: प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति । आदायाभिमन्त्रयते ऽभ्रिरसि नारिरसीति । तयोपरवान्परिलिखति पूर्वयोर्दक्षिणमेवाग्रे परिलिखितꣳ रक्ष: परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा

(the middle ones). "He provides fillings of gaps with grass for discrimination."[4] On the joints he puts fillings of grass. They are called the *antarvartas.* This (hall) is enclosed with the verse, "May these songs, O rich in praise, encompass thee; may the favours be favourable to thee."[2] They enclose it towards the south and north. They provide doors towards the east and the west. After having fixed a handful of Kuśa-grass on the southern post of the (eastern) door, he insinuates a poker, and a thread into the poker with the formula, "Thou art the thread of Viṣṇu.[5] He ties a knot with the formula, "Thou art a fixed point of Viṣṇu."[5] Having loosened it, the Adhvaryu says, "Do you decorate (the door - post) with the handskill without tying any knots." In the same way the northern posts. In the same way he decorates the posts of the western door. He then touches (the structure) with the formula, "Thou belongst to Indra, for Indra thee."

He strides eighteen steps towards the west along the border of the Mahāvedi from pin for the northern shoulder of Mahāvedi. There he prepares Āgnīdhra's chamber in such a way that it would be half within the Vedi and half without. Having piled it up, they enclose it; a door is left to it towards the south. Each side of, the Āgnīdhra's chamber is five *aratnis.* The Mārjālīya (mound) is explained hereby. A door is left to it towards the north.

VI.28

Standing here only, (the Adhvaryu) asks for the hoe, Prokṣaṇī-water mixed with barley-grains, a handful sacrificial grass, the vessel for clarified butter together with the spoon, the skin for pressing (Soma), two planks for pressing, six pins, a stone, a piece of gold, and a pot full of water. Having taken this up, he says, "Come O sacrificer." Having made him enter the Havirdhāna shed by the eastern door, he spreads the skin in the seat of the southern Havirdhāna cart. All other implements are placed in front of the axle. Then from the place assigned to the Uparavas he takes the hoe with the formula, "I take (thee) under the impulse of god Savitṛ, with the arms of Aśvins, with the hands of Pūṣan." Having taken it up, he recites over it the formula, "Thou art a hoe, thou art not an enemy."[1] With it he marks around the Uparavas—first the southern one of the two eastern ones with the formula, "The Rakṣas is marked around; the evil spirits are marked around. Here do I cut off the neck of the Rakṣas who hates us and whom we hate; here do I cut off the neck of the Rakṣas."[1] In this way all (Uparavas) one by one. He digs with the formula. "I dig

4. cf. TS. VI.2,10,7
5. TS. I.2.13.3
6. TS. I.3.1.2

1. TS. I.3.1.1

अपिकृन्तामीति सर्वानेवानुपूर्वम् । खनति रक्षोहणो वलगहनो वैष्णवान्खनामीति सर्वानेवानुपूर्वम् । अथैभ्यः पाꣳसूनुद्वपतीदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखानेदमेनमधरं करोमि यो नः समानो यो ऽसमानो ऽरातीयति गायत्रेण छन्दसेति । अवबाढो वलग इति यजमानस्याधस्पदं पाꣳसूनुद्वपति पूर्वयोर्दक्षिणात् । त्रैष्टुभेन छन्दसेत्यपरयोर्दक्षिणात् । जागतेन छन्दसेत्यपरयोरुत्तरात् । आनुष्टुभेन छन्दसेति पूर्वयोरुत्तरात् । अत्रैतान्पदपाꣳसूनसञ्चरे परावपति । अत्र यं यजमानो द्वेष्टि तं मनसा ध्यायति । अथाप उपस्पृश्याथैनानवमृशतो ऽध्वर्युश्च यजमानश्च पूर्वयोर्दक्षिणमेवाध्वर्युरवमृशत्युत्तरं यजमानः । अथ यजमानः पृच्छत्यध्वर्यो किमत्रेति । भद्रमिति । तन्नौ सहेति । अथाध्वर्युः पृच्छति यजमान किमत्रेति । भद्रमिति । तन्नौ सहेति । यमेवाध्वर्युः प्रजहाति तं यजमानो ऽवमृशति । दक्षिणयोरपरमेवाध्वर्युरवमृशति पूर्वं यजमानः । अध्वर्युरत्र पृच्छति । अथ यजमानः । अपरयोरुत्तरमेवाध्वर्युरवमृशति दक्षिणं यजमानः । यजमानो ऽत्र पृच्छति । अथाध्वर्युः । उत्तरयोः पूर्वमेवाध्वर्युरवमृशत्यपरं यजमानः । अध्वर्युरत्र पृच्छति । अथ यजमानः । यजमानः प्रथमः । पृच्छति यजमान उत्तमः । अथैनानभिमृशति विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासां नाष्ट्राणाꣳ हन्तेति सर्वानेवानुपूर्वम् । अथैनानद्भिः प्रोक्षति रक्षोहणो वलगहनः प्रोक्षामि वैष्णवानिति सर्वानेवानुपूर्वम् । अथैष्वपो ऽवनयति रक्षोहणो वलगहनो ऽवनयामि वैष्णवानिति सर्वेष्वेवानुपूर्वम्। अथैषु यवान्प्रस्कन्दयति यवो ऽसि यवयास्मद्द्वेषो यवयारातीरिति

(the Uparavas) dispelling the Rakṣas, dispelling the magical substance, and belonging to Viṣṇu."[2] In this way all (Uparavas) one by one. He takes out the soil from them with the formula, "Here do I cast out the magical substance which an equal or an unequal has buried against us. With the Gāyatrī metre I here put him down who, equal or unequal, is hostile to us."[2] With the formula, "The magical substance is driven away, he puts the soil of the southern one out of the two eastern ones under the feet of the sacrificer. With the formula (modified as) "With the Triṣṭubh metre" (he takes out the soil) from the southern one of the rear two. With the formula (modified as) "With the Jagatī metre" (he takes out the soil) from the northern one of the rear two. With the formula (modified as) "With Anuṣṭubh metre (he takes out soil) from the northern one of the eastern two. He discards the soil under the sacrificer's feet on a nontraversable spot. Here the sacrificer meditates upon him whom he hates.

Having touched water, the Adhvaryu and the sacrificer touch each other's hands from below—the Adhvaryu in the southern one of the eastern two, the sacrificer in the northern one. The sacrificer asks, "O Adhvaryu, what is here?" "Auspicious," "(Let it be) for us together." Now the Adhvaryu asks, "O sacrificer, what is here?" "Auspicious." "(Let it be) for us together." The sacrificer puts his hand into that one which the Adhvaryu leaves. The Adhvaryu puts his hand into that one which the Adhvaryu leaves. The Advaryu puts his hand into the rear one of the two southern ones; the sacrificer the front one. Here the Adhvaryu asks first, then the sacrificer. The Adhvaryu puts his hand into the northern one of the rear two, the sacrificer the southern one. Here the sacrficer asks first, then the Adhvaryu. The Adhvaryu puts his hand into the eastern one of the two northern ones; the sacrificer the rear one. Here the Adhvaryu asks first, then the sacrificer. The sacrificer asks first; the sacrificer asks the last. Then the Adhvaryu touches all of them (the Uparavas) one by one with the formulas, "Thou art Virāṭ, killer of enemies," "Thou art Samrāṭ, killer of enemies," "Thou art Svarāṭ, killer of evils;" "Thou art Viśvārāṭ, killer of all destroyers."[2] He sprinkles them with water with the formula, "I sprinkle all (the Uparavas) smiting the Rakṣas, smiting the magical substance and belonging to Viṣṇu"[3] one by one. He pours water into all one by one with the formula, "I pour water (into the Uparavas smiting the Rakṣas, omitting the magical substance and belonging to Viṣṇu."[3] He scatters barley-grains into all one by one with the formula, "Thou art barley-grain; drive away our haters, drive away evil spirits."[3] "he spreads sacrificial grass into all of them one by one with the formula. "I spread down sacrifical grass (into the Uparavas) smiting the Rakṣas, smiting the magical substance and belonging to Viṣṇu."[3] Having held a piece of gold in between, he

2. TS. I.3.2.1
3. TS. I.3.2.2

सर्वेष्वेवानुपूर्वम्। अथैनान्बर्हिषावस्तृणाति रक्षोहणो वलगहनो ऽवस्तृणामि वैष्णवानिति सर्वानिवानुपूर्वम् । अथैनान्हिरण्यमन्तर्धाय स्रुवाहुत्याभिजुहोति रक्षोहणो वलगहनो ऽभिजुहोमि वैष्णवान्स्वाहेति सर्वानिवानुपूर्वम्। अथास्यैते फलके दीर्घसोमे संतृण्णे भवतो ऽसंतृण्णे एकाहे । ते सꣳस्पृष्टे उपदधाति रक्षोहणौ वलगहनावुपदधामि वैष्णवी इति। अथैने शङ्कुभिः परिणिहन्ति द्वाभ्यां पुरस्ताद्द्वाभ्यां पश्चाद्द्वाभ्यामभितो ऽनवसर्पणाय । अथैने प्रदक्षिणं पुरीषेण पर्यूहति रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी इति । अथैने बर्हिषा परिस्तृणाति रक्षोहणौ वलगहनौ परिस्तृणामि वैष्णवी इति । अथैने अभिमृशति रक्षोहणौ वलगहनौ वैष्णवी इति । अथैतच्चर्म फलकयोः प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यज्ञ प्रतितिष्ठेति वा तूष्णीं वा। तिरश्चर्मन्फलके ग्राव्णोद्वादयति ॥ २८ ॥

बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वदेति। नीड एतच्चर्मोत्सादयति। ग्रावसु ग्रावाणमप्यर्जति। अथ दक्षिणस्य हविर्धानस्याग्रेणोपस्तम्भनं बर्हिर्मुष्टिमुपनिबध्नाति स्तोत्रेभ्यः । अथ याचति स्फ्यमुदपात्रं चात्वालात्पुरीषꣳ सिकता इति। एतत्समादायाहैहि यजमानेति। आग्नीध्रं द्रुत्वा स्फ्येनोद्धत्यावोक्ष्य चात्वालात्पुरीषꣳ सिकता इति निवपति विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा मा हिꣳसीरिति । तं परिमण्डलं धिष्णियं करोति । अथैनꣳ सिकताभिराभ्राशिनं करोति । अथान्तःसदसं धिष्णियान्निवपति होतुः प्रथमं वह्निरसि हव्यवाहन इति। श्वात्रो ऽसि प्रचेता इति दक्षिणतो मैत्रावरुणस्य । तुथोऽसि विश्ववेदा

wwoffers a spoonful of clarified butter into all of them one by one with the formula, "I make an offering (into the Uparavas) smiting the Rakṣas, smiting the magical substance and belonging to Viṣṇu, svāhā."[3]

Now his two boards are fastened together by a perforation in a Soma-sacrifice going on for a long time, and not fastened in a one-day sacrifice. He arrarges them touching each other with the formula, "I arrange (the boards) smiting the Rakṣas, smiting the magical substance and belonging to Viṣṇu."[3] He fixes them round by means of pins—two in front and two in the rear for the purpose of non-stirring on both sides. Then he covers them around with soil by the right with the formula, "I cover around (the boards) smiting the Rakṣas, smiting the magical substance and belonging to Viṣṇu."[3] He strews them around with sacrificial grass with the formula, "I strew around (the boards) smiting the Rakṣas, smiting the magical substance and belonging to Viṣṇu."[3] He touches them with the formula, "(The two boards) smiting Rakṣas, smiting the magical substance and belonging to Viṣṇu."[3] He spreads the skin over the boards with the neck towards the east and hairy side upwards with the verse, "O sacrifice, do thou, very gracious, be firm in thy favour. May the riches enter thee on all sides. Giving long life to the sacrificer, do thou anoint the worshipper with ambrosia."[4] Or silently. He makes the two boards sound by means of a stone across the skin.

VI.29

(With the formula) "Thou art big, a big stone; do thou make a big sound for Indra."[1] He transposes the skin to the seat (of the southern Havirdhāna cart). He inserts the stone among stones. In front of the support of the southern Havirdhāna cart he fastens a handful of sacrificial grass for the purpose of the Stotras. Then he asks for the wooden sword, a pot full of water, soil from Cātvāla and sand. Having taken this up, he says, "Come O sacrificer." Having hastened to the Āgnīdhra chamber, having dug up with the wooden sword and having sprinkled water, he pours the soil from the Cātvāla and sand with the formula, "Thou art the expanding, the carrier; O Agni, guard me, with thy dreadful countenance; content me; do not injure me."[2] He makes it a round mound. He makes it shining with sand.

Then he prepares mounds within the Sadas—first the Hotṛ's with the formula, "Thou art the bearer, the carrier of oblation;"[2] Maitrāvaruṇa's towards the south with the formula, "Thou art savoury the wise,"[2] the Brāhmaṇācchaṁsin's towards the north with the formula, "Thou art Tutha, the all-knower,"[2] the Potṛ's towards

4. TBr. II.5.8.12

1. TS. I.3.2.2
2. TS. I.3.3.1

इत्युत्तरतो ब्राह्मणाच्छꣳसिनः । उशिगसि कविरित्युत्तरतः पोतुः । अङ्घारिरसि बम्भारिरित्युत्तरतो नेष्टुः । अवस्युरसि दुवस्वानित्युत्तरतो ऽच्छावाकस्य । अथ दक्षिणे वेद्यन्ते मार्जालीयं धिष्णियं निवपति शुन्ध्यूरसि मार्जालीय इति । सर्वेष्वेव रौद्रमनुवर्तयति । आग्नीध्रे ऽन्ततो निवपत्युदक्सꣳस्थताया इति । अष्टौ न्यवाप्सीदिति । अथाष्टावनुदिशति। सम्राडसि कृशानुरित्याहवनीयमुपतिष्ठते । परिषद्यो ऽसि पवमान इत्यास्तावम् । प्रतक्कासि नभस्वानिति चात्वालम् । असंमृष्टो ऽसि हव्यसूद इति पशुश्रपणम् । अथ सदसो द्वारि तिष्ठन्नौदुम्बरीमुपतिष्ठत ऋतधामासि सुवर्ज्योतिरिति । ब्रह्मज्योतिरसि सुवर्धामेति ब्रह्मसदनम् । अथात्रैव तिष्ठन्गार्हपत्यमुपतिष्ठते ऽजो ऽस्येकपादिति । अहिरसि बुध्निय इति यं प्रहास्यन्तो भवन्ति ॥ २९ ॥

अथात्रैव तिष्ठन्संप्रैषमाह स्तृणीत बर्हिः प्र व्रतं यच्छत समपिव्रतान्ह्वयध्वमास्तावं बहुलꣳ स्तृणीत सदोहविर्धाने बहुले स्तृणीतोन्नेतर्ग्राव्णो वायव्यानि द्रोणकलशे दशापवित्रे समवधाय पत्नीशाले सꣳसादयाग्नीदाज्यमधिश्रय प्रतिप्रस्थातः स्रुचः संमृड्ढ्याज्येनोदेहि पृषदाज्याय दध्याहरेति । यथासंप्रैषं ते कुर्वन्ति । अथ दक्षिणे वेद्यन्ते बर्हिर्मुष्टिꣳ स्तृणाति देवबर्हिरूर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य

the north with the formula, "Thou art Uśij, the wise,"[2] the Neṣṭr's towards the north with the formula, "Thou art Aṅghāri, Bambhāri,"[2] the Acchāvāka's towards the north with the formula, "Thou art the seeker of help, the worshipper;"[2] towards the southern end of the Mahāvedi he prepares the Mārjālīya mound with the formula, "Thou art a purifier, the Mārjālīya."[2] To all these formulas he joins the Raudra portion (*raudreṇānīkena* "with thy dreadful countenance ..."). Finally he prepares a mound in the Āgnīdhra's chamber for the conclusion towards the north. He prepared eight (mounds). Then (the sacrificer) points to eight (spots). He prays to the Āhavanīya with the formula, "Thou art the overlord, Kṛśānu."[2] To the Āstāva[3] with the formula, "Thou art the purifying round which men sit;[2] to the Cātvāla with the formula, "Thou art the impetuous, the cloudy;[2] to the fire for cooking the flesh of the animal with the formula, "Thou art the untouched the preparer of the oblation."[2]

Standing at the door of the Sadas, he prays to the Udumbara-post with the formula, "Thou art having the cosmic order for thy abode, light of the sun,"[2] to the seat of Brahman with the formula, "Thou art having Brahman for thy brilliance, the abode of sun."[2] Standing here only, he prays to the Gārhapatya with the formula, "Thou art the one-footed goat."[2] To the fire which is going to be left over,[4] he prays with the formula, "Thou art Ahi Budhniya."[5]

VI.30

Standing here only, (the Adhvaryu) gives out the call, "Spread the sacrificial grass, give Vrata-milk (to the sacrificer), call out the relatives, spread thickly sacrificial grass on the Āstava, spread thickly sacrificial grass in the Havirdhāna shed and the Sadas; O Unnetṛ, do thou keep in the chamber of the sacrificer's wife the pressing stone, the Vāyavya cups and the Droṇakalaśa with the fringe and woollen filter placed in it; O Āgnīdhra, do thou melt the clarified butter over the fire; O Pratiprasthātṛ, do thou cleanse the ladles, come up with the clarified butter and fetch curds for the Pṛṣadājya." They act according to the call. The Adhvaryu spreads a bundle of sacrificial grass at the southern end of the Mahāvedi with the formula,

3. The place to the north of the Havirdhāna shed where the Sāman-chanters sit while chanting the Bahiṣpavamāna stotra.
4. After the prayer to the Brahmasadana, the Bhār ŚS XII.15.8 adds a prayer to the Sadas with a formula (*purīsyo'si viśvavyacāḥ*) borrowed from MS I.2.12 cf MānŚS II 2.4.8 Āp ŚS XI.15.1, also prescribes a prayer to the Sadas for which it employs a different formula *purīsyo'si viśvabharāḥ* (borrowed from LāṭŚS according to W. Caland, *Śrautasūtra des Āpastamba* II. p.223).
5. The old Gārhapatya fire which will be known as Prājahita.

इति । तां बहुलां पुरस्तात्प्रत्यञ्च स्तृणन्तो यन्ति । अथान्तःशालं पृषदाज्यवन्त्याज्यानि गृहीत्वा परिकर्मिभ्य उत्प्रदाय ब्रह्मणे राजानमुत्प्रयच्छति । तं ब्रह्मादायोत्तरतस्तिष्ठति । उत्तरतस्तिष्ठन्नग्निमन्वानयत्युदग्रे तिष्ठानु मामुदेहि विश्वैर्देवैर्यज्ञियैः संविदानः । सुवर्गे लोके यजमानꣳ हि धेहि मास्यै हास्था आहुत्यै यामुपेम इति । अथाभ्यादधातीध्मं प्रणयनीयम् । उपोपयमनीः कल्पयन्ति चात्वालात् । समन्वारब्धेष्वपिव्रतेषु संप्रच्छन्नेषु गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा शालामुखीये वैसर्जनानि जुहोति त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्यो ऽन्यकृतेभ्य उरु यन्तासि वरूथꣳ स्वाहेति । स्रुवेणामुं प्रस्कन्दयति जुषाणो अप्तुराज्यस्य वेतु स्वाहेति । अपरं चतुर्गृहीतं गृहीत्वा संप्रैषमाहाग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहीति । त्रिरुक्तायामुद्यच्छन्ते । होतुर्वशं यन्ति । अथ वै भवति प्राञ्चमग्निं प्रहरन्त्युत्पत्नीमानयन्त्यन्वनाꣳसि प्रवर्तयन्तीति । यदस्यात्र शस्त्रं भवति पूर्वं तेनाग्निमन्ववस्यन्ति । अथाग्निप्रथमाः प्रतिपद्यन्ते ऽन्वग्राज्ञा चाज्यैश्चान्वग्ग्राव्णो वायव्यानि । पूर्वया द्वारोपनिष्क्रामन्त्ययं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन् । अयं शत्रूञ्जयतु जर्हृषाणो ऽयं वाजं जयतु वाजसाताविति । उत्तरेण सदः परीत्याग्नीध्रागारे ऽग्निं निधाय नयवत्यर्चाग्नीध्रे जुहोति । अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम स्वाहेति । अत्रैवैतद्ग्रावोवायव्यꣳ समुपसाद्योपातियन्ति राज्ञा चाज्यैश्च । आहवनीये स्रुवाहुतिं जुहोत्युरु विष्णो विक्रमस्वोरु क्षयाय नः कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहेति ॥ ३० ॥

"O sacrificial grass for the gods, soft as wool, I spread thee, offering a good seat to the Gods."[1] They go on spreading the Mahāvedī profusely from east to west.

Having taken up within the Prāgvaṁśa shed the ladles filled with clarified butter together with Pṛṣadājya and having handed them over to the attendants, (the Adhvaryu) hands over king Soma to the Brahman. Taking him, the Brahman stands towards the north. Standing towards the north, the Adhvaryu puts a part of the Gārhapatya into the Āhavanīya with the verse, "Rise up, O Agni, follow me, united with all gods worthy of sacrifice. Do you lead the sacrificer to heaven; do not abandon this oblation which we are offering."[2] He keeps on the fire the faggot to be carried forward. Supporting earth is procured from the Cātavala. While the sacrificer's relatives, with a canopy over their heads, have contacted one to the other, the Adhvaryu, having melted clarified butter over the Gārhapatya, having purified it and having taken four spoonfuls in the ladle, makes Vaisarjana offerings on the Śālāmukhīya fire with the formula, "O Soma, thou art the giver of wide protection from hostility brought about by ourselves or by others, svāhā."[3] He drops a drop by means of the spoon with the formula, "May the active one gladly partake of the clarified butter, svāhā."[3] Having taken up another four spoonfuls, he gives out the call, "Do you (O Hotṛ) recite verses for the fire and Soma being carried forward." After (the first verse) has been recited thrice, they lift up (the fire). They move in pursuance of the Hotṛ. It is indeed said, "They carry the fire forward, they get the sacrificer's wife come over, they cause the carts to move."[4] Whatever implement he has here, with that they adhere to the front fire (= Śālāmukhīya).

With the fire in the forefront, they move forward, with the Soma and the ladles of clarified butter following and with the pressing stones and Vāyavya wooden cups following them. They go out by the eastern door with the verse, "May Agni here make room for us, breaking the enemies; may he go ahead; rejoicing, may he conquer the enemies; may he wins booty in the contest for booty."[3] Having moved around along the north of the Sadas, and having placed the fire in the Āgnīdhra-chamber, he makes an offering on the Āgnīdhra-fire with the verse containing the word *naya*, "O Agni, lead us by a fair path to wealth, O god, knowing all the ways. Drive from us the sin that leads astray; we shall pay deep homage to thee, svāhā."[5] Having placed here only the pressing stones and Vāyavya wooden cups, they move forward with the king Soma and ladle filled with clarified butter. The Adhvaryu offers a spoonful on the Āhavanīya with the verse, "O Viṣṇu, step widely; give us broad space for dwelling in. Do thou who hast clarified butter as the birth-place, drink the clarified butter as the birth-place, drink the clarified butter; lengthen (the years of) the lord of sacrifice, svāhā."[3]

1. TS. I.1.11.1
2. This verse has not been traced so far in Vedic texts.
3. TS I.3.4.1
4. cf. TS. VI.3.2.3
5. TS. I.4.43.2

अथ प्रोक्षणीभिरुपोत्तिष्ठति । इध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तादाश्ववालं प्रस्तरं गृह्णाति । पञ्चविधं बर्हि स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य कार्ष्मर्यमयान्परिधीन्परिदधाति । ऊर्ध्वे समिधावादधाति । ऐक्षवी विधृती तिरश्ची सादयति । विधृत्योराश्ववालं प्रस्तरम् । प्रस्तरे जुहूम् । बर्हिषीतरा । एता असदन्निति समभिमृश्याथाप उपस्पृश्य ब्रह्मणो राजानमादाय पूर्वया द्वारा हविर्धानं प्रपादयति सोमो जिगाति गातुविद्देवानामेति निष्कृतमृतस्य योनिमासदमिति । अथ दक्षिणस्य हविर्धानस्य नीडे कृष्णाजिनमास्तृणात्यदित्याः सदो ऽसीति । अदित्याः सद आसीदेति कृष्णाजिने राजानम् । अथैनं देवताभ्यः संप्रयच्छत्येष वो देव सवितः सोमस्तꣳ रक्षध्वं मा वो दभदिति । संप्रदायोपतिष्ठत एतत्त्वꣳ सोम देवो देवानुपागा इदमहं मनुष्यो मनुष्यान्सह प्रजया सह रायस्पोषेणेति । नमो देवेभ्य इति प्राञ्चमञ्जलिं करोति । स्वधा पितृभ्य इति दक्षिणा न्यचति । अथोपनिष्क्रामतीदमहं निर्वरुणस्य पाशादिति । अथाहवनीयमुपतिष्ठते सुवरभिविख्येषं वैश्वानरं ज्योतिरिति । अथ यजमानमवान्तरदीक्षां विसर्जयत्यग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूस्त्वय्यभूदियꣳ सा मयि या तव तनूर्मय्यभूदेषा सा त्वयि यथायथं नौ व्रतपते व्रतिनोर्व्रतानीति । अथैनꣳ सꣳशास्ति स्रस्नीष्व मेखलां प्र मुष्टी सारय मैत्रावरुणाय दण्डं प्रयच्छ यजमान इति त्वाचक्षतां नामग्राहं ते पितृभिः पितामहैः प्रपितामहैः पुत्रैः पौत्रैः सुब्रह्मण्यः सुब्रह्मण्यामाह्वयत्विति । स एवमेवैतत्सर्वं करोति । अथ यूपाहुतिꣳ हुत्वा यूपं यजुषा करोति । यूपावटं यजुषा करोति । तदेतद्यूपावटान्तम् ॥ ३१ ॥ अष्टमः ॥

VI.31

(The Adhvaryu) rises together with the Prokṣaṇī-water; he sprinkles the faggot, sprinkles the Vedi; sprinkles the sacrificial grass. Having sprinkled the sacrificial grass kept (within the Vedi) and having poured water (upon its knot), he takes out the Prastara of *aśvavāla* grass (*Saccharum sponteneum*) from the front. Having spread the sacrificial grass in five rows, the Adhvaryu with the Prastara in his hand, having moved forward, lays down the enclosing sticks of Kārṣmarya (*Gmelina arborea.*) He keeps two fire-sticks erect. He places crosswise the two separating blades of sugarcane. The Prastara of *Aśvavāla* on the two separating blades. The Juhū on the Prastara. Other blades upon the sacrificial grass. Having touched them all together with the formula, "These have sat down in the place of good action, protect them, O Viṣṇu, protect the sacrifice, protect the lord of sacrifice, protect me the leader of sacrifice,"[1] having touched water and having taken up king Soma from the Brahman, he leads him into the Havirdhāna shed by the eastern door with the verse, "Soma who knows the way goes; he goes to the abode of gods to sit on the birth-place of cosmic order."[2] He spreads a skin of black antelope on the seat of the southern Havirdhāna cart with the formula, "Thou art the seat of Aditi."[3] He places king Soma on the skin of black antelope with the formula, "Do thou sit on the seat of Aditi."[3] He gives him away to the gods with the formula, "This O god Savitṛ, is thy Soma, do thou guard him; let him not escape thee."[3] Having given away, he prays to him with the formula, "O Soma, thou, god, hast gone to the gods. Here I, man, have gone to men with offspring, with increase of wealth."[3] He joins his palms facing the east. He bends them down towards the south with the formula, "Svadhā to Pitṛs."[3]

He goes out with the formula, "Here may I be free from Varuṇa's bond."[3] He prays to the Āhavanīya with the formula, "May I gaze at the sun, the light of Vaiśvānara."[3] He makes the sacrificer release the intemediate consecretion with the formula, "O Agni, lord of vows, thou art the lord of vows. May my body that has been in thee be here in me, may thy body which has been in me, be there in thee. O lord of vows, let the vows of us, the observers of vows, be as before."[4] Then he instructs him (the sacrificer) "Do you loosen the girdle, spread out your fists, hand over the staff to the Maitrāvaruṇa; let people address you with the appellation "sacrificer," let Subrahmaṇya invoke Subrahamaṇyā pronouncing thy name together with the father, grandfather, great grandfather, sons and grandsons." He (the sacrificer) acts accordingly. Having offered the offering pertaining to the sacrificial post, (the Adhvaryu) prepares the sacrificial post to the accompaniment of the relevant formulas. He digs the hole for the post with yajus. This rite goes up to the digging of the hole for the post.

1. TS. I.1.11.2
2. TS. I.3.4.1
3. TS. I.3.4.2
4. TS. I.3.4.3

अथ यूपस्यावृता यूपमुच्छ्रयति । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा वपाश्रपणी अनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते । अथ यो वीडितः कुम्भस्तं याचति । तमादायान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य यत्रापस्तद्यन्ति । नान्तमा वहन्तीरत्येति । न स्थावराणां गृह्णाति । प्रतीपं तिष्ठन्गृह्णाति । छायायै चातपतश्च संधौ गृह्णाति हविष्मतीरिमा आपो हविष्मान्देवो अध्वरो हविष्माꣳ आविवासति हविष्माꣳ अस्तु सूर्य इति । अथैना आदाय प्रदक्षिणमावृत्य सव्ये ऽꣳसे निधायैतेनैव यथेतमेत्योत्तरेणाग्नीध्रीयं परीत्योत्तरेण सदः परीत्य पूर्वया द्वारा शालां प्रपाद्य जघनेन गार्हपत्यमौपसदायां वेद्याꣳ सꣳस्पृष्टाः सादयत्यग्नेर्वो ऽपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनीः सुम्ने मा धत्तेति । अथ पशुपुरोडाशं निर्वपति। इडान्तः पशुपुरोडाशः संतिष्ठते । पत्नीसंयाजान्तः पशुः । हृदयशूलान्त इत्येके ॥ ३२ ॥ नवमः ॥

अथ वसतीवरीः परिहरिष्यन्नाह व्यपक्रामत मा वो ऽभिपरिहारिषमिति। यजमानायतने यजमान उपविशति । जघनेन गार्हपत्यं पत्नी । अथैना आदाय दक्षिणया द्वारोपनिर्हृत्य सव्ये ऽꣳसे निधाय दक्षिणेन सदः परीत्य दक्षिणेन मार्जालीयं धिष्णियं पर्याहृत्य दक्षिणतो यूपेन सꣳस्पृष्टाः सादयतीन्द्राग्नियोर्भागधेयी स्थेति । अथैना आदायोदङ्ङावृत्य दक्षिणे ऽꣳसे निधायैतेनैव यथेतमेत्य जघनेन गार्हपत्यमौपसदायां वेद्याꣳ सꣳस्पृष्टाः

VI.32

(The Adhvaryu) raises the sacrificial post with the procedure for the post. After having gone through the procedure for the post ending with (the fixing of) the *svaru*, he formally dedicates the animal to Agni-Soma. Having gone through the procedure of offering the omentum in the established manner, having thrown into the fire the two forks of omentum and having moved together, they sprinkle themselves near the Cātavāla. Then (the Adhvaryu) asks for a pitcher which is strong. Taking it up and having gone out from between the Cātavāla and rubbish heap, they go to that place where they come across waters. One does not cross over those flowing waters which are the nearest. One does not take water from that which is stagnant. He takes water standing against the current. He takes water from the spot marked by the conjunction of shade and light with the verse, "These waters are possessed of oblation, god is possessed of oblation; the sacrifice possessed of oblation serves (the gods). May Sūrya be possessed of oblation."[1] Having taken them, having turned by the right, having held (the pitcher) on the left shoulder, having returned by the same route by which he had gone, having gone around along the north of the Āgnīdhrīya fire, having gone round along the north of the the Sadas, having entered it into the (Prāgvaṁśa shed) by the eastern door, he places those waters to the rear of the (new) Gārhapatya in the altar employed for the Upasad sacrifice and touching it, with the formula, "O gracious waters, I set you for favour in the seat of Agni whose house is unharmed. Do you hold me in favour."[1] He offers the Paśupuroḍāśa. The Paśupuroḍśa sacrifice comes to an end with the (rite of) Iḍā. The animal-sacrifice comes to an end with the Patnīsaṁyāja offerings. Somc teachers say that it ends with the (discarding of) the heart-spike.

VI.33

While going to carry round the Vasatīvarī waters, (the Adhvaryu) says, "Do you disperse, let me not carry (the waters) around you." The sacrificer sits in the sacrificer's seat; the wife to the rear of the Gārhapatya. Having taken the waters, having taken them out by the southern door, having held on the left shoulder, having gone round along the south of the Sadas, having brought them around the south of the Mārjālīya mound, he places them to the south of the sacrificial post and touching it with the formula, "You are the portions of Indra-Agni."[1] Having taken them, having turned towards the north, having held them on the right shoulder and having come back by the same route by which he had gone, he places them to

1. TS. 1.3.12.1

1. TS. I.3.12.1

सादयति मित्रावरुणयोर्भागधेयी स्थेति । अथैना आदाय पूर्वया द्वारोपनिर्हृत्य दक्षिण एवाꣳसे निधायोत्तरेण सदः परीत्योत्तरेणाग्नीध्रीयं धिष्णियं पर्याहृत्योत्तरतो यूपेन सꣳस्पृष्टाः सादयति विश्वेषां देवानां भागधेयी स्थेति। अथैना आदाय प्रदक्षिणमावृत्य सव्ये ऽꣳसे निधायैतेनैव यथेतमेत्य जघनेनाग्नीध्रीयं धिष्णियꣳ सꣳस्पृष्टाः सादयति यज्ञे जागृतेति ॥ ३३ ॥

अथ पयाꣳसि विशास्ति या सम्राड्धुक् तस्यै दधिघर्माय दधि कुरुत या यजमानस्य तस्या आमिक्षायै या पत्न्यै तस्या आशिरे पयश्च सक्तूꣳश्च कुरुत शृतातङ्क्यमादित्यग्रहाय दधि कुरुत पुरोडाशीयानि पिष्टानि कुरुत धाना हारियोजनीः कुरुत चतुरो ऽम्भृणास्त्रीनुदचनानयुज एकधनाꣳस्त्र्यवमानेकादशपरमाꣳश्चतस्रो रशनाश्चतस्रो वपाश्रपणीर्द्वयमिध्माबर्हिरौदुम्बरान्महापरिधीन्कुरुत सुब्रह्मण्यः सुब्रह्मण्यामाह्वयत्विति । यथासंप्रैष ते कुर्वन्ति । अथैतानम्भृणानायातयति । उत्तरस्य हविर्धानस्य नीड आधवनीयम् । प्रउगे पूतभृतम् । तयोः समान उदचनः । आग्नीध्र एकꣳ सोदचनम् । मार्जालीय एकꣳ सोदचनम् । आग्नीध्र एताꣳ रात्रिं यजमानः संविशति । हविर्धाने राजानं गोपायन्ति ॥ ३४ ॥ दशमः ॥

॥ इति षष्ठः प्रश्नः ॥

the rear of the (now) Gārhapatya in the altar pertaining to the Upasads and touching it with the formula, "You are the portions of Mitra-Varuṇa."[1] Having taken them up, having gone out by the eastern door, having held the waters on the right shoulder itself, having gone round along the north of the Sadas, having carried along the north of the Āgnīdhrīya mound, he places them to the north of the sacrificial post and touching it with the formula, "You are the portions of Viśve Devas."[1] Having taken them up, having turned by the right, having held them on the left shoulder, and having come back along the same route by which he had gone, he places them to the rear of the Āgnīdhrīya mound and touching it with the formula, "Do you keep awake in the sacrifice."[1]

VI.34

(The Adhvaryu) gives instructions concerning the milks (and other oblations etc.): "Do you prepare curds for Dadhigharma (out of the milk) of the cow yielding milk for Pravargya, for Āmikṣā from the milk of the one belonging to the sacrificer; do you procure milk for mixing (with Soma) and for mixture with barley-flour from the milk of the cow of the sacrificer's wife; prepare curds from milk coagulated when hot for the Āditya cup; prepare flours for cakes, prepare parched barley for the Hāriyojana cup, procure four pitchers, three drawing spoons, Ekadhana pitchers in odd numbers—three in minimum and eleven maximum, four cords, four omentum forks, two sets of sacrificial grass and faggot, and big enclosing sticks of Udumbara; may the Subrahmaṇya invoke Subrahmaṇyā." They act as per instructions. He causes the pitchers to be brought in—the Ādhavanīya pitcher on the seat of the northern Havirdhāna cart, the Pūtabhṛt pitcher on the poles for the yoke, a common scooping spoon for them, one pitcher together with the scooping spoon in the Āgnīdhra-chamber. One pitcher together with the scooping spoon on the Mārjālīya mound. The sacrificer lies down in the Āgnīdhra chamber during this night. King Soma is guarded in the Havirdhāna shed.

CHAPTER VI ENDS.

अथातो महारात्र एव बुध्यन्ते । संबोधयन्त्येतानृत्विजो ऽध्वर्युः होतारं ब्रह्माणमुद्गातारं प्रतिप्रस्थातारं प्रस्तोतारं प्रशास्तारं ब्राह्मणाच्छंसिनमच्छावाकं नेष्टारं पोतारः सदस्यमुन्नेतारमाग्नीध्रं ग्रावस्तुतः सुब्रह्मण्यं प्रतिहर्तारं ये चान्ये परिकर्मिणो भवन्ति । ते हस्तपादान्प्रक्षाल्याग्नीध्रे यजमानमुपसंगच्छन्ते । अथाध्वर्युर्हस्तौ संमृशते कर्मणे वां देवेभ्यः शकेयमिति । अथात्रैव तिष्ठन्संप्रैषमाहोन्नेतर्ग्राव्णो वायव्यानि द्रोणकलशे दशापवित्रे समवधाय दक्षिणस्य हविर्धानस्य पुरो ऽक्षः सःसादयाग्नीदाज्यमधिश्रय प्रतिप्रस्थातः स्रुचः संमृड्ढ्याज्येनोदेहि पृषदाज्याय दध्याहरेति । यथासंप्रैषं ते कुर्वन्ति । अथाध्वर्युराग्नेय्यर्चाग्नीध्रमभिमृशत्यग्निर्मूर्धा दिव इति । वैष्णव्या हविर्धानं विष्णो त्वं नो अन्तम इति । आग्नेय्या स्रुचो ऽयमग्निः सहस्रिण इति । वायव्यया वायव्यानि वायो शतः हरीणामिति । ऐन्द्र्या सद इन्द्रं विश्वा अवीवृधन्निति । अथ पृषदाज्यवन्त्याज्यानि गृहीत्वा प्रोक्षणीभिरुपोत्तिष्ठति । इध्मं प्रोक्षति । वेदिं प्रोक्षति । बर्हिः प्रोक्षति । बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तात्प्रस्तरं गृह्णाति । एकविधं बर्हि स्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्यौदुम्बरान्महापरिधीन्परिदधाति नित्येन परिधानेन । अथैनान्योगेन युनक्ति । युनज्मि ते पृथिवीं ज्योतिषा सहेति मध्यमम् । युनज्मि वायुमन्तरिक्षेण ते सहेति दक्षिणम् । युनज्मि वाचः सह सूर्येण त इत्युत्तरम् । अथ स्रुचः सन्ना अभिमृशति युनज्मि तिस्रो विपृचः सूर्यस्य त इति । अथाप उपस्पृश्याहैहि यजमानेति। पूर्वया द्वारा

CHAPTER - VII

MORNING PRESSING

VII. 1

They wake up at early dawn itself. They awaken these priests—Adhvaryu, Hotṛ, Brahman, Udgātṛ, Pratiprasthātṛ, Prastotṛ, Brāhmaṇācchaṁsin, Acchāvāka, Neṣṭṛ, Potṛ, Sadasya, Unnetṛ Āgnīdhra, Grāvastut, Subrahmaṇya, Pratihartṛ and other assistants. Having washed their hands and feet they approach the sacrificer in the Āgnīdhra-chamber. The Adhvaryu rubs his hands with the formula, "May I be able (to perform the rites) for the gods through you."[1] Standing here only he gives out the call, "O Unnetṛ, do thou place in front of the axle of the southern Havirdhāna cart the pressing stones, the Vāyavya wooden cups and the Droṇakalaśa, putting into it the woollen fringe and filter. O Agnīdh, do thou keep the clarified butter on fire. O Pratiprasthātṛ, do thou cleanse the ladles, come up with the clarified butter and bring curds for the Pṛṣadājya." They act according to the call. The Adhvaryu touches the Āgnīdhra chamber with the verse addressed to Agnī, "Agni is the head of the heaven, the height, lord of the earth. He quietens the seed of waters."[2] The Havirdhāna shed with the verse addressed to Viṣṇu, "O conquering Viṣṇu, do thou, nearest to us, grant us shelter. The sweet flowing streams milk out for thee the unceasing spring."[3] The ladles with the verse addressed to Agni, "This Agni, lord of hundredfold and thousandfold food, the head, the wise—(may he grant) wealth."[4] The Sadas with the verse addressed to Indra, "All praises have promoted Indra, wide as ocean, the best of charioteers, lord of food and good lord."[5]

Having taken up (ladles filled with) clarified butter together with Pṛṣadājya, he stands up taking the Prokṣaṇī-waters. He sprinkles the faggot; sprinkles the Vedi; sprinkles the sacrificial grass. Having sprinkled the sacrificial grass held (erect), having poured down (water over the knot), he takes out the Prastara from the front. Having spread the sacrificial grass in a single row, with the Prastara in his hand, having moved forward, he lays around big enclosing sticks of Udumbara with the usual formula for laying around.[6] He joins them with each of the Yoga formulas; the middle one with the formula, "I join the earth thy (form) with Agni," the southern one with the formula, "I join thy (form) the midregion with Vāyu," the northern one with the formula, "I join thy (form) speech with Sūrya."[7] He touches the ladles

1. TS.I.1.4.1
2. TS.I.5.5.1
3. TS.III.1.10.2
4. TS.II.6.11.1
5. TS.IV.6.11.4
6. cf. BaudhŚS I.13
7. TS.III.1.6.1,2

हविर्धानं प्रपाद्याथैतच्चर्म फलकयोः प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यज्ञ प्रतितिष्ठेति वा तूष्णीं वा । तस्मिन्संमुखान्ग्राव्णः कृत्वा दक्षिणस्य हविर्धानस्यान्तरेणेषे राजानमुपावहरति हृदे त्वा मनसे त्वा सोम राजन्नेह्यवरोहेति द्वाभ्याम् । अथैनमुद्गातृभ्यः प्राहुः । तस्मिंस्तच्चेष्टन्ति यत्ते विदुः । अथाप उपस्पृश्याहैहि यजमानेति । आग्नीध्रं द्रुत्वा स्रुचि चतुर्गृहीतं गृहीत्वा पञ्चहोतारं मनसानुद्रुत्याग्नीध्रे जुहोति । अन्वारब्धे यजमाने स्वाहेति । अपरं चतुर्गृहीतं गृहीत्वाग्नीध्र एवासन्यां जुहोति । आसन्यान्मा मन्त्रात्पाहि कस्याश्चिदभिशस्त्याः स्वाहेति । अथाहवनीये घृतानुषिक्तꣳ शकलमभ्यादधाति तूष्णीम् । अथात्रैव तिष्ठन्संप्रैषमाह ॥ १ ॥

प्रातर्यावभ्यो देवेभ्यो होतरनुब्रूहि ब्रह्मन्वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्यामाह्वयाग्नीत्सवनीयान्निर्वप प्रतिप्रस्थातः खरे पात्राणि युङ्ग्धीति। यथासंप्रैषं ते कुर्वन्ति । प्रतिपद्यत एष होता प्रातरनुवाकम् । यच्छति ब्रह्मा वाचम् । आह्वयति सुब्रह्मण्यः सुब्रह्मण्याम् । तस्यामाहूतायां ब्रह्मा वाचं विसृजते । निर्वपत्येष आग्नीध्र ऐन्द्रानेकादशकपालान्सवनीयान् । तेषां व्रीहिष्वेव हविष्कृतमुद्वादयति । उपोद्यच्छन्ते यवान् । अथ प्रतिप्रस्थाता खरे पात्राणि युनक्ति । पूर्वार्थे खरस्य दक्षिणाशिरसमुपांशुसवनं निदधाति दक्षिणत उपांशुपात्रमुत्तरतो ऽन्तर्यामपात्रमुपसंस्पृष्टे । असंस्पृष्टे

which have been placed, with the formula, "I join the three separated (ladles) by means of thee the Sūrya."[7] Having touched water, he says, "Come O sacrificer." Having carried the skin into the Havirdhāna shed by the eastern door, he spreads it on the two boards with its neck towards the east and with the hairy side upwards with the verse, "O sacrifice, do thou, very gracious be firm in thy favour. May the riches enter thee on all sides. Giving long life to the sacrificer, do thou anoint the worshipper with ambrosia,"[8] or silently. Having placed upon it the pressing stones facing each other, he brings down king Soma upon them through the poles of the southern Havirdhāna cart with the two formulas, "For heart thee, for intellect thee, for heaven thee, for the sun thee; raise aloft the sacrifice, carry the invokings unto the gods in the heaven—O king Soma, come hither, descend, do not fear, do not tremble, let me not injure thee, do thou descend upon the offspring, let the offspring descend upon thee."[9] This (the Soma) is announced to the Udgātṛs. They deal with it as they know. Having touched water, he says, "Come, O sacrificer." Having hastened to the Āgnīdhra chamber, having taken up four spoonfuls in the ladle, having mentally gone over the Pañcahotṛ formula, he makes an offering on the Āgnīdhra fire with *svāhā* while the sacrificer has contacted him. Having taken up another four spoonfuls, he makes an *āsanyā* offering on the Āgnīdhra fire itself with the formula, "Do thou guard me from oral speech, from every imprecation, *svāhā*."[10] He silently puts on the Āhavanīya a piece of wood sprinkled with ghee. Standing here only he gives out the call:

VII.2

O Hotṛ, do you recite verses for the gods coming in the morning, O Brahman, do you restrain speech; O Subrahmaṇya, do thou invoke Subrahmaṇyā; O Agnīdh, do thou pour out grains for Savanīya-oblations; O Pratiprasthātṛ, do you arrange the (Soma) vessels on the mound." They act as per the call. The Hotṛ commences the recitation of the Prātaranuvāka. The Brahman restrains speech. The Subrahmaṇya invokes the Subrahmaṇyā. After the invocation has been done, the Brahman releases speech. The Āgnīdhra pours grains for the cake on eleven potsherds (and other oblations) for Indra. Out of the oblations (the Adhvaryu) gives a call to the preparer of oblations only in respect of paddy. Barley-grains are taken away.

The Pratiprasthātṛ arranges the (Soma-) vessels on the mound. He keeps the Upāṁśusavana stone with its head towards the south in the eastern half of the mound. The Upāṁśu-cup towards the south and the Antaryāma-cup to the

8. TS.II.5.8.12
9. TS.I.3.13.1
10. TS.III.1.7.1

अभिचरतः । पश्चाद्द्विदेवत्यपात्राण्यन्वञ्चयैन्द्रवायवपात्रं मैत्रा-वरुणपात्रमाश्विनपात्रम् । पश्चाच्छुक्रामन्थिनोः प्रबाहुग्दक्षिणꣳ शुक्रपात्रमुत्तरं मन्थिपात्रम् । अग्रेण मन्थिपात्रमृतुपात्रे । पश्चादाग्रयणस्थालीम् । दक्षिणस्यां खरश्रोण्यामादित्यस्थालीꣳ सोपशयाम् । उत्तरस्यां खरश्रोण्यामुक्थ्यस्थालीꣳ सोपशयाम् । उत्तरस्य हविर्धानस्याग्रेणोपस्तम्भनमनुपोप्ते ध्रुवस्थालीम् । अन्तरेण पूतभृदाधवनीयौ चमसान् । दक्षिणस्य हविर्धानस्य पश्चादक्षं द्रोणकलशं दशापवित्रे इति निदधाति । अथैनान्यभिमृशत्यग्निर्देवता गायत्री छन्द उपाꣳशोः पात्रमसीति दशभिर्दश । अथाध्वर्युः सं वा विशति कर्माणि वानुप्रेक्षमाण आस्ते ॥ २ ॥

अथ यत्र होतुरभिजानात्यभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः । अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवमिति तत्प्रचरण्याꣳ स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः । शृणोत ग्रावाणो विदुषो नु यज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहेति । अपरं चतुर्गृहीतं गृहीत्वा बर्हिरादाय संप्रैषमाहाप इष्य होतर्मैत्रावरुणस्य चमसाध्वर्यवाद्रवैकधनिन एत नेष्टः पत्नीमुदानयाग्नीद्धोतृचमसेन च मा वसतीवरीभिश्च चात्वाले प्रत्युपलम्बस्वेति । यथासंप्रैषं ते कुर्वन्ति । आनयति नेष्टा पत्नीं पान्नेजनं कलशमादाय प्रेह्युदेहीत्येतेन निगदेन । अथैनां पूर्वया द्वारोपनिष्क्रमय्योत्तरेण सदः परीत्योत्तरेणाग्नीध्रीयं धिष्णियं पर्याणीयान्तरेण चात्वालोत्करा-वुदङ्ङुपनिष्क्रम्य यत्रापस्तद्यन्ति । अथाप्सु बर्हिः प्रास्याभिजुहोति

north—both touching (the stone). They should be not touching in the sacrifice of one who wants to exorcise. To the west the Dvidevatya cups one by one—the Aindravāyava cup, the Maitrāvaruṇa cup and the Āśvina cup. To the west the Śukra and the Manthin cups in a line—the Śukra cup towards the south and the Manthin cup towards the north. Two Ṛtu-cups in front of the Manthin cup. The Āgrayaṇa vessel to the west. On the southern buttock of the mound the Āditya vessel together with the related cup. On the northern buttock of the mound Ukthya-vessel together with the related cup. The Dhruva-vessel on an uncovered place in front of the supporting pole of the northern Havirdhāna-cart. The goblets between the Pūtabhṛt and Ādhvanīya jars. He places the Droṇakalaśa, the fringe and woollen filter to the rear of the axle of the southern Havirdhāna-cart. He touches the (above-mentioned) ten utensils with ten formulas beginning with "Agni is the divinity, Gāyatrī is the metre; thou art the utensil of Upāṁśu offering."[1] The Adhvaryu either lies down or keeps an eye on the happenings.

VII.3

When he listens to the Hotṛ reciting the verse, "The dawn has appeared with white cattle, fire has been laid down at the proper time; O Aśvins, possessing great wealth and providing marvellous aids, your immortal chariot is yoked. O sweet ones, do you listen to my invocation,"[1] (the Adhvaryu), having taken up four spoonfuls in the ladle in use, makes an offering on the Āhavanīya while the sacrificer has contacted him, with the verse, "May Agni (kindled) with a fire-stick listen to my call. May the waters and the divine Dhiṣaṇās listen; listen, O pressing stones, who you have known the sacrifice; may god Savitṛ listen to my call, svāhā."[2] Having taken up another four spoonfuls and having taken up sacrificial grass, he gives out the call, "O Hotṛ, do you summon the waters, O Camasādhvaryu of Maitrāvaruṇa, hurry up (with the goblet), O carriers of the Ekadhana pitchers, hurry up; O Neṣṭṛ, do thou lead the sacrificer's wife; O Unnetṛ, do thou wait for me at the Cātvāla together with the Vasatīvarī water and the Hotṛ's goblet." They act according to the call. The Neṣṭṛ leads the sacrificer's wife taking the *pānnejana* vessel with the *nigada*-formula, "Go forth, come up towards the water which is dear to the sacrifice, may Agni lead thy head; may Aditi give thee the middle part; You are one who is released by Rudra, Yuvan by name. Do not injure me."[3] Having led

I. TS.III.1.6.2

1. RV.V.75.9
2. TS.I.3.11.1
3. TS.III.5.6.2

देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं देवेभ्यो देवत्रा धत्त शुक्रꣳ शुक्रपेभ्यो येषां भाग स्थ स्वाहेति । मैत्रावरुणचमसेनाहुतिम-पप्लावयति कार्षिरस्यपापां मृध्रमिति । बर्हिषी अन्तर्धायोन्नयति समुद्रस्य वो ऽक्षित्या उन्नय इति । अथैकधनान्गृह्णातीन्द्राय वो जुष्टान्गृह्णामीति वा तूष्णीं वा । अथ पन्नेजनीर्गृह्णाति वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः पन्नेजनीर्गृह्णामीति । ताः पत्न्यै संप्रदायोदायन्त्यन्यारब्धे यजमाने । एतेनैव यथेतमेत्य चात्वाले होतृचमसं च मैत्रावरुणचमसं च सꣳस्पर्श्य वसतीवरीर्व्यानयति । पूरयति होतृचमसम्। अप्तुं मैत्रावरुणचमसे प्रस्कन्दयति । अथ होतृचमसं वसतीवरीर्मैत्रा-वरुणचमसमिति त्रयꣳ संनिधाय प्रतिस्तोमं प्रचरण्या समनक्ति सं ज्योतिषा ज्योतिरङ्क्ताꣳ सꣳ शुक्राः शुक्रेण सꣳ हविषा हविः सं यज्ञपतिराशिषेति । अथैषा पत्न्येतेनैव यथेतमेत्य जघनेन गार्हपत्यमौपसदायां वेद्याꣳ संस्पृष्टाः सादयति तूष्णीम् ॥ ३ ॥

अथाध्वर्युर्होतुरुत्काशमेति । होताध्वर्युं पृच्छत्यध्वर्यो ऽवेरपा३ इति । उतेमनन्नमुरुतेमाः पश्येतीतरः प्रत्याह । अथ यद्यग्निष्टोमो जुहोति यमग्ने पृत्सु मर्त्यमावो वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहेति । अथ यद्युक्थ्य एतेनैव यजुषा मध्यमे परिधौ निमार्ष्टि । अथ यद्यतिरात्र एतदेव यजुर्वदन्प्रपद्यते । यज्ञक्रतूनां व्यावृत्त्या इति ब्राह्मणम् । अथैता

her out by the eastern door, having led around along the north of the Sadas, having led around along the north of the Āgnīdhrīya mound and having gone out between the Cātvāla and the rubbish-heap, they go to the place where there is water.

Having put sacrificial grass on the water, the Adhvaryu makes an offering with the formula, "O divine waters, child of the waters, do you keep with the gods that wave which serves as an oblation, mighty, most exhilerating, brilliant, for the gods drinkers of the bright (Soma) whose part you are, svāhā."[4] He drives away the oblation with the Maitrāvaruṇa's goblet with the formula, "Thou art drawer, draw away the enemy of water."[4] Having held two darbha-blades in between, he takes up water with the formula, "I take thee for the imperishableness of the ocean."[4] He fills in the Ekadhana pitchers with the formula, "I take you dear to Indra," or silently. Then he takes water in the *pānnejana* vessel with the formula, "I take *pannejana* waters for Vasus, Rudras, Ādityas and Viśve Devas, O *pannejana* waters, I take you for the sacrifice."[4] Having handed them over to the sacrificer's wife, they come up while the sacrificer has contacted (the Adhvaryu). Having come back by the same route by which they had gone, having held together the Hotṛ's goblet and the Maitrāvaruṇa's goblet over the Cātvāla, the Adhvaryu pours the Vasatīvarī waters into both of them. He fills in the Hotṛ's goblet. He puts a drop from it into the Maitrāvaruṇa'a goblet. Having placed together the Hotṛ's goblet, Vasatīvarī waters and the Maitrāvaruṇa's goblet, he anoints them with the ladle in use as many times as the Stomas[5] with the formula, "May the brilliance be anointed with brilliance; may the Śukra (Somas) with Śukra, the oblation with oblation; the lord of sacrifice with blessing."[6] The wife, having come back by the route by which she had gone, places silently the *pannejana*-water to the west of the Gārhapatya in the altar related to the Upasad sacrifice and touching it.

VII.4

The Adhvaryu goes within the Hotṛ's sight. The Hotṛ asks the Adhvaryu, "O Adhvaryu, have you got water?" "Yes, indeed, they have come to me; have a look at them." So replies the other. If it is the Agniṣṭoma, he makes an offering with the verse, "O Agni, may that mortal whom thou hast strengthened in the contest for booty, win abiding prosperity whom thou hast helped in the battles, svāhā."[1] If it is the Ukthya sacrifice, he cleanses the wipping on the middle enclosing stick with this

4. TS.I.3.13.2
5. Four times in the Jyotiṣṭoma sacrifice because four stomas are employed in chanting Sāmans in this sacrifice—Trivṛt, Pañcadaśa, Saptadasa and Ekaviṁśa.
6. cf. TS.I.1.12.1

1. TS.I.3.13.2

होतृचमसीया दक्षिणस्य हविर्धानस्यान्तरेणेषे उपातिहृत्य नीड उत्सादयति। अथोदुब्ज्याधवनीयः सर्वश एव मैत्रावरुणचमसीयाः पर्यस्यति। तृतीयं वसतीवरीणामवनयति। तृतीयमेकधनानाम्। पुरो ऽक्षं वसतीवरीः सादयति। पश्चादक्षमेकधनान्। अथान्तरेण हविर्धाने उपविश्यौदुम्बरं पात्रं चतुःस्रक्ति याचति। तस्मिन्बर्हिषी अन्तर्धाय प्राजापत्यं दधिग्रहं गृह्णात्युपयामगृहीतो ऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधे रातं देवेभ्यो ऽग्निजिह्वेभ्यस्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्य इति। अपोद्धृत्य बर्हिषी अथैनमादायोपोत्तिष्ठति दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति। पूर्वया द्वारोपनिष्क्रामत्यपेन्द्र द्विषतो मनो ऽप जिज्यासतो जह्यप यो नो ऽरातीयति तं जहीति। एत्याहवनीये जुहाति। अन्वारब्धे यजमाने प्राणाय त्वापानाय त्वा व्यानाय त्वा सते त्वासते त्वाद्भ्यस्त्वौषधीभ्यो विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा अख्खिवद्रा अजायन्त तस्मै त्वा प्रजापतये विभूदाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि स्वाहेति। अथास्य संक्षालनमन्तःपरिधि निनयति। धेनुवरं वानड्डुद्वरं वा दद्यादिति ह स्माह बौधायनः। द्वादश पष्ठौहीरिति। आश्नीगविः। ऋषभमिति कात्यः। मणिकुण्डलमिति राथीतरः॥ ४॥ प्रथमः॥

अथैता होतृचमसीया दक्षिणस्य हविर्धानस्यान्तरेणेषे उपावहृत्य चर्मणि निदधाति। तासु निग्राभ्यासु यजमानं वाचयति निग्राभ्या स्थ देवश्रुत आयुर्मे तर्पयतेति प्रतिपद्य गणा मे मा वितृषन्नित्यातः। ता यजमानाय संप्रदायाथैतेषां ग्राव्णां यः सुजन्तुरिव तमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद इति। आदायाभिमन्त्रयते

verse. If it is the Atirātra, he enters reciting this verse for the distinction of sacrifice." So says the Brāhmaṇa.[2] He deposits the water in the Hotṛ's goblet, bringing in the goblet through the poles of the southern Havirdhāna cart. Having kept the Ādhvanīya pitcher with the upside upwards, he pours into it the entire quantity of water from the Maitrāvaruṇa's goblet. He pours into it (also) the third part of Vasatīvarī water, the third part from the Ekadhana pitchers. He places the Vasatīvarī water in front of the axle, the Ekadhana pitcher to its west.

Sitting between the two Havirdhāna carts, he asks for a cup of Udumbara wood with four corners. Holding two darbha-blades across, he takes in it curds for Prajāpati with the formula, "Thou are taken with a support, I take thee full of sight for Prajāpati full of light; for Dakṣa who increases ability, thou that art given to the gods having Agni as the tongue, righteous, having Indra as the highest, having Varuṇa as the king, having Vāta as the friend, having Parjanya as the inner part."[3] Having taken away the darbha-blades and having taken it, he stands up with the formula, "For heaven thee, for midregion thee, for earth thee."[3] He goes out by the eastern door with the formula, "O Indra, do thou smite the mind of him who hates us, who desires to oppress us, do thou smite him who practises evil against us."[3] Coming up, he makes the offering on the Āhavanīya while the sacrificer has contacted him, with the formula, "For Prāṇa thee; for Apāna thee, for Vyāna thee; for existent thee; for nonexistent thee, for water thee, for plants thee, for all beings thee; I offer what is full of light to thee, Prajāpati, from whom offspring were created unhurt, of bountious gift, full of light, svāhā."[3] He pours down its wash-water within the enclosing sticks. The sacrificer gives away a choice milch-cow or a choice bull. So says Baudhāyana. He gives away twelve heifers. So says Āñjīgavi. A bull, so says Kātya. An earring with a jewel. So says Rāthītara.

VII.5

(The Adhvaryu) places on the skin the Hotṛcamasa-waters having taken it down in between the poles of the southern Havirdhāna-cart. While rendering them *nigrābhya*,[1] he makes the sacrificer recite the formula, "You are the *nigrābhya*-waters heard by the gods. Delight my life; delight my expiratior; delight my inspiration; delight my cross-breathing, delight my eye, delight my ear; delight my mind, delight my speech; delight my person; delight my limbs, delight my offspring, delight my cattle; delight my house; delight my troops; delight me with my troops, delight me,

2. cf. TS.VI.4.3
3. TS.III.5.8.1

1. That is to say, fit for being mixed with Soma to be offered to gods.

ग्रावास्यध्वरकृद्देवेभ्यो गम्भीरमिममध्वरं कृध्युत्तमेन पविनेन्द्राय सोमꣳ सुषुतं मधुमन्तं पयस्वन्तं वृष्टिवनिमिति । अथैनं प्राञ्चं प्रश्रित्य विस्रस्य राजानं ग्रावाणमुपाꣳशुसवनमभि मिमीत इन्द्राय त्वा वृत्रघ्न इन्द्राय त्वा वृत्रतुर इन्द्राय त्वाभिमातिघ्न इन्द्राय त्वादित्यवत इन्द्राय त्वा विश्वदेव्यावत इति । पञ्च कृत्वो यजुषा । पञ्च कृत्वस्तूष्णीम् । दश कृत्वो मिमानो ऽर्धवेलाꣳ राज्ञो मिमीते । अथातिशिष्टꣳ राजानमुष्णीषेण विग्रथ्य दक्षिणस्य हविर्धानस्यान्तरेणेषे उपातिहृत्य नीड उत्सादयति । अथ मितꣳ राजानꣳ होतृचमसीयाभिरुपसृजति श्वात्रा स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीस्ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबतोपहूतो युष्माकꣳ सोमः पिबत्विति । अथैनꣳ संप्रयौति यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे तेनास्मै यजमानायोरु राया कृध्यधि दात्रे वोच इति । तिरश्चर्मन्फलके अभिमृशति धिषणे वीडू सती वीडयेथामूर्जं दधाथामूर्जं मे धत्तं मा वाꣳ हिꣳसिषं मा मा हिꣳसिष्टमिति । अथ वृद्धीर्वाचयत्यवीवृधं वो मनसा सुजाता ऋतप्रजाता भग इद्वः स्याम । इन्द्रेण देवीर्वीरुधः संविदाना अनु मन्यन्ताꣳ सवनाय सोममिति । संतृप्तस्य राज्ञः प्रतिप्रस्थाता सव्ये पाणौ षडꣳशून्सचते । अथैतेनेव पाणिनोपाꣳशुपात्रमादत्ते । अथोपसृष्टꣳ राजानमष्टौ कृत्वो ऽग्रे ऽभिषुणोति । सो ऽꣳशौ स्कन्ने वाचयत्या मास्कान्त्सह प्रजया सह रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरिति । अथाञ्जलिनोपहन्ति तूष्णीम् । अन्तर्दधाति प्रतिप्रस्थाता । प्रथमाभ्यामꣳशुभ्यामानयत्यध्वर्युर्वाचस्पतये पवस्व वाजिन्निति । सचत

let my troops not go thirsty."[2] Having given over those (waters) to the sacrificer, he takes up the best fashioned of the stones with the formula, "I take thee in the impulse of god Savitṛ, with the arms of Aśvins and the hands of Pūṣan." Having taken, he recites over it the formula, "Thou art a stone promoting a sacrifice; make this sacrifice efficient. With thy best and purifying quality make for Indra the Soma well pressed, sweet, mixed with milk, and rain-yielding."[1] Having placed it in the eastern part (of the skin), and having loosened king Soma, he measures him over the Upāṁśusavana pressing stone with the formula, "For Indra killer of Vṛtra thee, or Indra overcoming Vṛtra thee, for Indra the smiter of enemies thee, for Indra accompanied by the Ādityas thee, for Indra accompanied by Viśve Devas thee."[3] He measures out five times with the formula, five times silently. Measuring ten times, he measures half the quantity of king Soma. Having tied the remaining king Soma with the turban, he places it on the seat of the southern Havirdhāna cart having carried it in between the two poles.

He mixes the measured out Soma with the water from the Hotṛcamasa with the formula, "You are savoury, conquerors of Vṛtra, delightful through your gifts spouses of immortality. Do you, O Goddesses place this sacrifice among the gods. Do you, invoked, drink the Soma; invoked by you let Soma drink."[3] Then he stirs it with the formula, "O Soma, do thou spread wealth widely for this sacrificer with thy light which is in the heaven, on the earth and in the wide midregion. Speak highly about the giver."[3] He touches the two boards across the skin with the formula, "O supporters, do you who are strong be strengthened; gather strength, give me strength; let me not harm you; do not harm me."[4] He then makes the sacrificer recite the Vṛddhi formula, "O well born (Soma-shoots), I have made you grow in my mind; O you born of order, may we enjoy your favour, may the divine plants in accord with Indra grant us the Soma for pressing."[5] The Pratiprasthātṛ clasps (within the fingers of) his left palm six shoots of king Soma nourished with water. With the same palm he takes up the Upāṁśu-cup.

He first presses eight times king Soma mixed with water. In the case of a shoot falling down, he makes the sacrificer recite the formula. "Thou hast fallen to me with offspring, with abundance of wealth, do not destroy my power and strength."[6] The Adhvaryu dips his joined palms into the juice silently. The Pratiprasthātṛ holds

2. TS.III.1.8.1-2 BaudhŚS literally: "You are the *migrābhya*-waters, heard by the gods; delight my life" beginning with this "let my troops not go thirsty" upto here."
3. TS.I.4.1.1
4. TS.I.4.2.1
5. TS.III.1.8.2
6. TS. III.1.8.3

एतावꣳशू । तथोपसृष्टꣳ राजानमेकादशकृत्वो द्वितीयमभिषुणोति । नात्राꣳशौ स्कन्ने वाचयति । तथाञ्जलिनोपहन्ति तूष्णीमेव । अन्तर्दधाति प्रतिप्रस्थाता । मध्यमाभ्यामꣳशुभ्यामानयत्यध्वर्युर्वृषा वृष्णो अꣳशुभ्यां गभस्तिपूत इति । सचत एतावꣳशू । तथैवोपसृष्टꣳ राजानं द्वादश-कृत्वस्तृतीयमभिषुणोति । नैवात्राꣳशौ स्कन्ने वाचयति । तथैवाञ्जलिनोपहन्ति तूष्णीमेव । अन्तर्दधाति प्रतिप्रस्थाता । उत्तमाभ्यामꣳशुभ्यामानयत्यध्वर्युर्देवो देवानां पवित्रमसि येषां भागो ऽसि तेभ्यस्त्वेति । सचत एतावꣳशू । अथैनमुपाꣳशुसवनं दशापवित्रेण परिमृज्य पूर्वार्धे खरस्य दक्षिणाशिरसं निदधाति । अथ प्रतिप्रस्थातुर्ग्रहमादत्ते स्वांकृतो ऽसीति । ग्रहमुप-यच्छति । अथैनमवेक्षते मधुमतीर्न इषस्कृधीति । अथैनमूर्ध्वमुन्मार्ष्टि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इति । अथैनमादायोपोत्तिष्ठति मनस्त्वाष्ट्विति । ऐत्युर्वन्तरिक्षमन्विहीति । एत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहा त्वा सुभवः सूर्याय स्वा-हेति । हुत्वानुप्राणिति । वाचयति भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहीति । अथैनमवाचीनमवमृज्य प्रतीचा नीचा पाणिना मध्यमे परिधौ निमार्ष्टि देवेभ्यस्त्वा मरीचिपेभ्य इति । अथ प्रदक्षिणमावृत्याग्रयणस्थाल्यां ग्रहस्य सꣳस्रावमवनयत्येष ते योनिरिति । अथैतस्मिन्नुपाꣳशुपात्रे ऽꣳशुं प्रास्यति । अथैनं दक्षिणत उपाꣳशुसवनेन सꣳस्पृष्टꣳ सादयति प्राणाय त्वेति । व्यानाय त्वेत्युपाꣳशुसवनं प्रत्यभिमृशते ॥ ५ ॥

(the shoots) in between. The Adhvaryu pours (the juice into the Upāṁśu-cup through the two shoots with the formula, "O mighty one, be purified for the lord of speech." (The Pratiprasthātṛ) clasps these shoots. The Adhvaryu presses the propitiated king Soma for the second turn eleven times. This time he does not make the sacrificer recite the formula in the event of the falling of a shoot. Similarly he dips his joined palms into the juice silently. The Pratiprasthātr holds the shoots across. The Adhvaryu pours juice through the two shoots held a second time with the formula, "Strong, purified by means of the hands through the shoots of thee the strong."[4] (The Pratiprasṭhātṛ) clasps these shoots. In a similar manner he presses the propitiated Soma for the third turn twelve times. He does not make the sacrificer recite the relevant formula in the event of the falling of any shoot. In a similar manner he presses he dips his joined palms into the juice silently. The Pratiprasthātṛ holds the shoots in between. The Adhvaryu pours down the juice (into the Upāṁśu-cup) through the last two shoots with the formula," "Thou art the god, purifier of gods. For those thee whose portion thou art."[4] (The Pratiprasthātṛ) clasps these two shoots. Having cleansed the Upāṁśusavan stone with the woollen filter, he keeps it in the southern half of the mound with its head towards the south.

He takes the cup from the Pratiprāsthātṛ. With the formula, "Thou art he who is appropriated,"[4] he seizes it.[7] He gazes at it with the formula, "Make our food full of sweetness."[4] He wipes it upwards the formula, "For all the powers of heaven and earth thee."[4] Taking it up, he gets up with the formula, "May the mind enter thee."[4] He goes forth with the formula, "Do thou proceed to the wide midregion."[4] Having reached, he makes an offering on the Āhavanīya while the sacrificer has contacted him, with the formula, "Svāhā thee, well-fashioned, for Sūrya, svāhā." Having offered, he breathes over it. He makes the sacrificer recite the formula, "Thou art Bhūḥ, best of rays, guardian of inspiration; guard my inspiration."[8] Having wiped it downwards, he wipes on the middle enclosing stick by means of the palm turned downwards and pointing westwards with the formula, "For gods, the drinkers of rays, thee."[4] Having turned by the right, he pours down the drops of the cups into the Āgrayaṇa vessel with the formula, "This is thy birthplace."[4] He puts a shoot into the Upāṁśu-cup. He places it to the south of the Upāṁśusavana stone and touching it with the formula, "For Prāṇa thee."[4] He touches back the Upāṁśusavana stone with the formula, "For Vyāna thee."[4]

7. Caland's text reads *apayacchati;* but most of the MSS have *upao* cf also BaudhŚS VII. 6.
8. TS.III.2.10.2

यावदेवात्राध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता राजन्येवाꣳशूनां द्वौद्वावपिसृजति यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेति यत्ते सोम यत्ते सोमेति । अथाभिषोष्यन्तः सर्वश एव राजानं पर्युपविशन्ति । पश्चात्प्राङ्मुखो ऽध्वर्युरुपविशति । तस्य दक्षिणं बाहुमनु यजमानः । दक्षिणतः प्रतिप्रस्थाता । उत्तरत आग्नीध्रः । अन्तरेण प्रति-प्रस्थातारं चाग्नीधं च यश्चतुर्थो अभिषुणोति । अथोन्नेतारमाहाहरोपसृ-जेति । उपसृजत्युन्नेताधवनीयादुदचनेन । उपर्यर्धे होतृचमसे ऽꣳशून्परिप्लाव-यन्ति प्रागपागुदगधराक्तास्त्वा दिश आधावन्त्वम्ब निष्वरेति । एष निग्राभः । आप्याययन्ति । व्यपोहन्ते । अभिषुण्वन्ति । निग्राभमुपयन्ति । आप्याययन्ति । व्यपोहन्ते । अभिषुण्वन्ति । निग्राभमुपयन्ति । आप्याययन्ति । व्यपोहन्ते । अभिषुण्वन्ति । न चतुर्थे निग्राभमुपयन्ति । अथैनꣳ सुसंभृतꣳ संभरण्याꣳ संभृत्योन्नेत्र उत्प्रयच्छति । तमुन्नेताधवनीये ऽवनयति । एवमेव द्वितीयः पर्यायः संतिष्ठते । एवं तृतीयः । ऋजीषमन्ततो दशापवित्रेण परिवेष्ट्योन्नेत्र उत्प्रयच्छति । तदुन्नेताधवनीये विक्षाल्य प्रपीड्य दक्षिणस्य हविर्धानस्यान्तरेणेषे उपावहृत्य चर्मणि निदधाति । तस्मिन्संमुखान्ग्राव्णः कृत्वा चतुर्धैतदृजीषं ग्रावमुखेभ्यो व्यपोहति । अथोद्गाता वा प्रस्तोता वा दक्षिणस्य हविर्धानस्य पश्चादक्षमुपसृप्य प्राञ्चं ग्रावसु द्रोणकलशमध्यूहति तस्मिन्नुदीचीनदशं दशापवित्रं वितन्वन्ति । तेन तथा कृतेनादित्यस्योदयमा-काङ्क्षन्ते । उदित आदित्ये ऽन्तर्यामं गृह्णात्यतिपवमानस्य राज्ञ उपयामगृहीतो ऽस्यन्तर्यच्छ मघवन्पाहि सोममुरुष्य रायः समिषो यजस्वान्तस्ते दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षꣳ सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन्मादयस्वेति । स्वांकृतो ऽसीति ग्रहमपयच्छति । अथैनमवेक्षते

VII.6

While the Adhvaryu is acting here, the Pratiprasthātṛ inserts into the king Soma two shoots each with the formula, "O Soma svāhā to thee Soma, whose name is unerring and watchful"[1] repeated three times. Now those who are going to press the Soma sit down around the Soma. The Adhvaryu sits towards the west facing east; the sacrificer to his right side; the Pratiprasthātṛ towards the south, the Āgnīdhra towards the north. Between the Pratiprasthātṛ and the Āgnīdhra the fourth one who presses. (The Adhvaryu) says to the Unnetṛ, "Do thou bring (Soma) and add water." The Unnetṛ adds water from the Ādhavanīya jar by means of a drawing spoon. The pressers move around shoots in the Hotṛ's goblet which is filled more than half with water with the formula, "Forward, backward, upward, downward let these quarters hasten to you. O mother come forth."[2] This is *nigrābha.* They swell (the Soma) with water from the Hotṛ's goblet; they distribute (Soma-shoots among the pressers); they press, they adopt the *nigrābha.* They swell, they distribute; they press; they adopt the *nigrābha.* They swell; they distribute; they press; they do not adopt *nigrābha* the fourth time. Having collected in a pitcher the well-extracted Soma-juice, (the Adhvaryu) hands it over to the Unnetṛ. The latter pours it down into the Ādhavanīya jar. The second turn is completed in this way; also the third one. Having wrapped the residue finally into the woollen filter, he hands it over to the Unnetṛ. Having washed it in the Ādhvanīya jar and having sqeezed it, and having brought it down from between the poles of the southern Havirdhāna cart, he places it on the skin. Having placed upon it the pressing stones facing each other, he distributes the residue in four parts upon the mouths of the stones. The Udgātṛ or the Prastotṛ goes to the rear of the axle of the southern Havirdhāna cart, keeps upon the stone the Droṇakalaśa. The woollen filter is spread over it with its fringes towards the north. With this done, they await the sunrise.

At sunrise (the Adhvaryu) takes up the Antaryāma cup of Soma passing through (the filter) with the mantra, "Thou art taken with a support. O Maghavan, pause, drink Soma, extend wealth, pay homage (to the gods) with food. I place thee within heaven and earth, the wide midregion; be united with near and distant gods. O Maghavan, do thou rejoice in the Antaryāma cup."[3] He seizes the Soma with the formula, "Thou art he who is appropriated."[4] He gazes at it with the formula, "Make our food full of sweetness."[4] He wipes it upwards with the formula, "For all the powers of heaven and earth thee."[4] Taking it up, he gets up with the formula, "May

1. TS.I.4.1.3
2. TS.I.4.1.2
3. TS.I.4.3.1
4. TS.I.4.2.1. cf. foot-note to BaudhŚS VII 5: 207.4.

मधुमतीर्न इषस्कृधीति । अथैनमूर्ध्वमुन्मार्ष्टि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इति । अथैनमादायोपोत्तिष्ठति मनस्त्वाष्ट्विति । ऐत्युर्वन्तरिक्षमन्विहीति । एत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहा त्वा सुभवः सूर्याय स्वाहेति । हुत्वान्वपानिति । वाचयति धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहीति । अथैनमूर्ध्वमुन्मृज्य प्राचोत्तानेन पाणिना मध्यमे परिधावुन्मार्ष्टि देवेभ्यस्त्वा मरीचिपेभ्य इति । अथ प्रदक्षिणमावृत्याग्रयणस्थाल्यां ग्रहस्य सꣳस्रावमवनयत्येष ते योनिरिति । अथैनमुत्तरत उपाꣳशुसवनेन सꣳस्पृष्टꣳ सादयति । अपानाय त्वेति । व्यानाय त्वेत्युपाꣳशुसवनं प्रत्यभिमृशते । अथोन्नेतारमाहाप्रमत्तः संततमानयोपाꣳशु ग्रहान्ग्रहीष्यामीति । अथादत्त ऐन्द्रवायवपात्रम् । तदेतद्रास्नावत्परिग्रीवि भवति । तेन गृह्णात्यतिपवमानस्य राज्ञ आ वायो भूष शुचिपा इत्यनुद्रुत्योपयामगृहीतो ऽसि वायवे त्वा जुष्टं गृह्णामीति । अथैनमपयत्य पुनरेवोपयच्छतीन्द्रवायू इमे सुता इति । अनुद्रुत्योपयामगृहीतो ऽसीन्द्रवायुभ्यां त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिः सजोषाभ्यां त्वेति । अथादत्ते मैत्रावरुणपात्रम् । तदेतत्पिलकावद्भवति तेन गृह्णात्यतिपवमानस्य राज्ञो ऽयं वां मित्रावरुणेत्यनुद्रुत्योपयामगृहीतो ऽसि मित्रावरुणाभ्यां त्वा जुष्टं गृह्णामीति । बर्हिषी अन्तर्धाय पयसा श्रीणाति । अपोद्धृत्य बर्हिषी दशापवित्रेण परिमृज्य सादयत्येष ते योनिर्ऋतायुभ्यां त्वेति । अथोपातीत्याश्विनपात्रꣳ शुक्रपात्रमादत्ते । तदेतद्बैल्वं वा पालाशं वा श्लक्ष्णं भवति । तेन गृह्णात्यतिपवमानस्य राज्ञो ऽयं वेनश्चोदयदित्यनुद्रुत्योपयामगृहीतो ऽसि शण्डाय त्वा जुष्टं गृह्णामीति । परिमृज्य सादयति । एष ते योनि वीरतां पाहीति । अथादत्ते मन्थिपात्रम् । तदेतद्वैकङ्कतꣳ श्लक्ष्णं

the mind enter thee."[4] He goes forth with the formula, "Do thou proceed to the wide midregion."[4] Having reached, he makes an offering on the Āhavanīya while the sacrificer has contacted him, with the formula, "Svāhā thee, well-fashioned, for Sūrya, svāhā."[4] Having made the offering, he breathes in over it. He makes the sacrificer recite the formula, "Thou art *dhūḥ* best of rays; guardian of Apāna; do thou guard my Apāna."[5] Having wiped it upwards, he wipes up on the middle enclosing stick by means of the palm turned upwards and pointing towards the east, with the formula, "For gods drinkers of rays, thee."[4] Having turned by the right, he pours the drops of the cup into the Āgrayaṇa-vessel with the formula, "This is thy birth-place."[4] He places it towards the north of the Upāṁśusavana stone and touching it with formula, "For Apāna thee."[4] With the formula, "For Vyāna thee," he touches back the Upāṁśusavana stone.

He says to the Unnetṛ, "Not being negligent, do thou pour down Somajuice (into the woollen filter); I shall take up the draughts silently." He takes the cup[6] for Indra-Vāyu. It has a girdle (incised) round the neck. Into that cup he takes up Soma passing through with the formula beginning with "O Vāyu, drinker of the pure, come to us," and ending with "Thou art taken with a support. I take thee dear to Vāyu."[7] Having taken away the cup, he again seizes the Soma with the formula beginning with "O Indra-Vāyu, this Soma is pressed for you" and ending with "Thou art taken with a support. I take thee dear to Indra-Vāyu."[7] Having cleansed, he places with the formula, "This is thy birth-place, for companion thee."[7] Then he takes the cup for Mitra-Varuṇa. It has pustules on the neck. He takes in it Soma passing through the woollen filter with the formula beginning with "O Mitra-Varuṇa, this (Soma is pressed) for you" (and ending with) "Thou art taken with a support; I take thee dear to Mitra-Varuṇa."[8] He mixes it with milk holding two darbha-blades in between. Having taken away the blades and having cleansed it with the woollen filter, he places it with the formula, "This is thy birth-place; for those desiring the cosmic order thee."[8]

Then after having left over the cup for the Aśvins, he takes up the Śukra-cup. It is made either of Bilva (*Aegle marmelos*) or Palāśa (*Butea frondosa*) and is well-polished. In it he takes the Soma passing through the woollen filter with the formula beginning with "This Vena has divided" (and ending with) "Thou art taken with a support; I take thee dear to Śaṇḍa."[9] Having cleansed it, he places it with the formula, "This is thy birth-place, do thou guard the hero."[9] He takes up the Manthi-

5. TS.III.20.10.2
6. Here and on subsequent occasions 'cup' means the Soma-juice taken in the cup.
7. TS.I.4.4.1
8. TS.I.4.5.1
9. TS.I.4.8.1

भवति । तेन गृह्णात्यतिपवमानस्य राज्ञस्तं प्रत्नथेत्यनुद्रुत्योपयामगृहीतो ऽसि मर्काय त्वा जुष्टं गृह्णामीति । बर्हिषी अन्तर्धाय सक्तुभिः श्रीणाति । अपोद्धृत्य बर्हिषी दशापवित्रेण परिमृज्य सादयत्येष ते योनिः प्रजाः पाहीति । अथादत्त आग्रयणस्थालीम् तया गृह्णात्यतिपवमानस्य राज्ञो ये देवा दिव्येकादश स्थेत्यनुद्रुत्योपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामीति । अथैनां त्रिरभिहिङ्करोति ॥ ६ ॥

हिं हिं हिं सोमः पवते सोमः पवते सोमः पवते ऽस्मै ब्रह्मणे पवते ऽस्मै क्षत्राय पवते ऽस्यै विशे पवत इषे पवत ऊर्जे पवते ऽद्भ्यः पवत ओषधीभ्यः पवते वनस्पतिभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते ब्रह्मवर्चसाय पवते ऽस्मै सुन्वते यजमानाय पवते मह्यमिति । उपांशूक्त्वा ज्यैष्ठ्याय पवत इत्युच्चैः । अथैनमधिवदत आग्रयणो ऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणेति । परिमृज्य सादयति । एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति । उपब्दिमतो ऽत ऊर्ध्वं ग्रहान्गृह्णाति । त्रिंशत्त्रयश्च गणिनो रुजन्त इति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयादिति ब्राह्मणम् । अथादत्त उक्थ्यस्थालीम् । तया गृह्णात्यतिपवमानस्य राज्ञ उपयामगृहीतो ऽसीन्द्राय

cup. It is made of Vikaṅkata wood (*Flacourtia ramontchi*) and is well-polished. With it he takes up the Soma passing through the woollen filter with the formula beginning with "Him as formerly" (and ending with) "Thou art taken with a support; I take thee dear to Marka."[10] He mixes it with flour of parched barley holding two darbha-blades in between. Having taken away the blades and having cleansed it with the woollen filter, he places it with the formula, "This is thy birthplace; do thou guard the subjects."[10] He takes up the Āgrayaṇa-vessel. In it he takes up the Soma passing through the woollen filter with the formula beginning with "Do you, O gods, who are eleven in the heaven" (and ending with) "Thou art taken with a support, I take thee dear to Viśve Devas."[11] He utters *him* thrice in respect of this (Āgrayaṇa vessel).

VII.7

"*hiṁ hiṁ hiṁ.* Soma is flowing. Soma is flowing. Soma is flowing. Soma is flowing for this Brahman; Soma is flowing for this Kṣatra; Soma is flowing for this Viś. Soma is flowing for this sacrificer who is pressing Soma; Soma is flowing for food; Soma is flowing for vigour; Soma is flowing for water; Soma is flowing for plants; Soma is flowing for the trees; Soma is flowing for the heaven and the earth; Soma is flowing for the welfare. Soma is flowing for the Brahman-splendour; Soma is flowing for this sacrificer who is pressing Soma." Having uttered in a low voice "for me" (he utters) loudly "for superiority."[1] He addresses (the Soma taken up) with the formula, "Thou art the forerunner, good forerunner quicken the sacrifice; quicken the lord of sacrifice; do thou guard the pressings; may Viṣṇu guard thee; do thou guard the subjects by means of power."[3] Having wiped, he places it with the formula, "This is thy birth-place; for all gods thee." Hereafter he takes the cups with formulas recited loudly, "One should take up (Soma) for one having enemy with the verse containing a word derived from the verbal root *ruj*, beginning with "Thirty and three in troops destructing (the Rudras) ..."[3] So says the Brāhmaṇa.[4] He takes up the Ukthya vessel. In it he takes up Soma passing through the woollen filter with the formula, "You are taken with a support; Thee for Indra to whom the Bṛhat-sāman is addressed, possessing power, eager for praise; thy great strength, O Indra, for that thee. That which is thy great strength, for that, for Viṣṇu. I take thee who

10. TS.I.4.9.1
11. TS.I.4.10.1

1. cf. ŚBr.IV.2.1.4
2. TS.I.4.10.1
3. TS. I.4.11.1
4. cf. TS. VI.4.11.1

त्वा बृहद्वते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वोक्थायुव इति । अथादत्ते ध्रुवस्थालीम् । स आह ये पूर्वया द्वारा प्रापत्सत प्राञ्चस्ते निष्क्रामन्तु ये ऽपरया प्रत्यञ्चस्ते मा वो ऽभिपरिहारिषमिति । जघनेनाभिषोतृन्सोन्नेतृकानभिपरिहृत्योत्तरत उपयच्छति मूर्धानं दिवो अरतिं पृथिव्या इत्यनुद्रुत्योपयामगृहीतो ऽस्यग्नये त्वा वैश्वानराय जुष्टं गृह्णामीति । अथैनमधिवदते ध्रुवो ऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमो ऽच्युतानामच्युतक्षित्तम इति । अथैनद्यथाहृतं प्रतिपर्याहृत्योत्तरस्य हविर्धानस्याग्रेणोपस्तम्भनमनुपोप्ते सादयत्येष ते योनिरग्नये त्वा वैश्वानरायेति । ध्रुवेण राजानं परिदधाति । अथोपर्यर्धे द्रोणकलशे परिप्लु पात्रं प्रास्य द्रप्साननुमन्त्रयते द्रप्सश्चस्कन्द यस्ते द्रप्सो यो द्रप्सो यस्ते द्रप्स इति । अथोन्नेतारमाहारिक्तं पूतभृतं कुरु पवमानस्य ग्रहान्ग्रहीष्यामीति । तच्छ्रुत्वोन्नेता पूतभृतो बिले पवित्रं वितत्य द्वौ वा त्रीन्वा राज्ञ उदचनाना-नयति । अथारिक्ते पूतभृति पवमानस्य ग्रहान्गृह्णाति । उपयामगृहीतो ऽसि प्रजापतये त्वेति द्रोणकलशमभिमृशति । इन्द्राय त्वेत्याधवनीयम् । विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतम् । अथोन्नेतरित्याह प्राञ्चः राजानं पूतभृतमभि संपवयताद्दशाभिराधवनीयं मृष्ट्वा न्युब्जतादिति । स तथा

art dear."[5] Having wiped around, he places it within the formula, "This is thy birth-place; thee for Indra, eager for praise."[5]

He then takes up the Dhruva vessel. He says, "Those who entered by the eastern door, let them go out towards the east; those who entered by the western door, let them go out towards the west. May I not move (the cups) around you." Having moved around (the Dhruva vessel) along the rear of the Soma-pressers including the Unnetṛ, he takes (the Soma in it) with the mantra beginning with "The head of the heaven, the messenger of earth" and ending with "Thou art taken with a support; I take thee dear to Vaiśvānara Agni."[6] He addresses him with the formula, "Thou art secure, of secure foundation, most secure of the secure, having most solid ground of the solid ones."[6] Having brought back (the vessel) in the same manner as it had been carried, he places it on an uncovered spot in front of the support of the northern Havirdhāna cart, with the formula, "This is thy birth-place; for Vaiśvānara Agni thee."[6] He concludes the taking up of Soma with the Dhruva vessel. Having put the drawing spoon into the Droṇakalaśa which is filled more than half, he follows the drops with the verses, "The drop has fallen on the earth; it proceeds along the heaven, this region (i.e. the midregion) and the former one (i.e. the earth), I offer this drop which proceeds up to the third place of the seven places of offering (that is, the Dhiṣṇiya mounds in the Sadas)."[7] "O Soma, that drop of thine, that shoot of thine which has fallen, shaken by the arms, from the womb of the pressing boards or from the woollen filter of the Adhvaryu, I offer to Indra to the accompaniment of svāhā-utterance."[8]—"The drop, the shoot that has fallen on the ground from the roasted grains, the cake, the dough of the flour of parched barley, the Soma mixed with roasted grains, the Manthin, the Śukra, I offer it to Indra to the accompaniment of svāhā-utterance."[8] — "That sweet and strong drop of thine which goes to gods to the accompaniment of svāhā-utterance from the heaven, the earth and the midregion. I offer it to Indra to the accompaniment of svāhā-utterance."[8] Then he says to the Unnetṛ, "Do thou render the Pūtabhṛt jar non-empty. I shall formally take up the Pavamānagrahas." Listening to the call, the Unnetṛ, having stretched the strainer on the opening of the Pūtabhṛt jar, pours into it two or three drawing spoonfuls of Soma.

5. TS.I.4.12
6. TS.I.4.13
7. TS. III.1.8.3
8. TS.III.1.10.1,2

करोति । अथाप उपस्पृश्य बर्हिषी आदायोपनिःसर्पति । तं निःसर्पन्त-मन्वारभत उद्गाता । उद्गातारं प्रस्तोता । प्रस्तोतारं प्रतिहर्ता । प्रतिहर्तारं यजमानः । यजमानं ब्रह्मा । प्रतिप्रस्थाता सप्तमः सर्पति । तेषु समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति ॥ ७ ॥

अग्निः प्रातःसवने पात्वस्मान्वैश्वानरो महिना विश्वशंभूः । स नः पावको द्रविणं दधात्वायुष्मन्तः सहभक्षाः स्याम स्वाहेत्येतयाध्वर्यू जुहुतो । यथावेदमितरे जुह्वति । अथोदञ्चो ऽभि पवमानꣳ सर्पन्ति । प्रह्व एवाध्वर्युः प्रथमो बर्हिषी धुन्वानः सर्पति वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान्पशुषु प्रजां मयि च यजमाने चेति । अथास्तावे यथायतनमुपविशन्ति । अथोद्गात्रे वा प्रस्तोत्रे वा बर्हिषी प्रयच्छत्यृक्सामयो-रुपस्तरणमसि मिथुनस्य प्रजात्या इति वा तूष्णीं वा । अथोपाकरणं जपति वायुर्हिङ्कर्ताग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनं ते देवाः प्राणभृतः प्राणं मयि दधत्वोꣳ स्तुध्वमिति । स एष त्रिवृद्बहिष्पवमानो भवति । तस्य पञ्चम्यां

After the Pūtabhṛt jar has thus been rendered non-empty, the Adhvaryu formally takes up the Pavamāna-grahas.[9] He touches the Droṇakalaśa with the formula, "Thou art taken with a support; for Prajāpati thee;" the Ādhvanīya with the formula, "(Thou art taken with a support;) for Indra thee;" and the Pūtabhṛt with the formula, "(Thou art taken with a support;) for Viśve Devas thee." Then he says, "O Unnetṛ, do thou filter king Soma towards the east into the Pūtabhṛt jar. Do thou cleanse the Ādhvanīya jar by means of the fringes (of the filter) and then put it down with its opening turned downwards." He does accordingly. Having touched water and having taken two darbha-blades, he moves out. The Udgātṛ touches him who is moving out. The Prastotṛ (touches) the Udgātṛ; the Pratihartṛ (touches) the Prastotṛ; the sacrificer (touches) the Pratihartṛ; the Brahman (touches) the sacrificer. The Pratiprasthātṛ moves as the seventh. After they have contacted successively he offers a spoonful.

VII.8

(With the verse), "May Vaiśvānara Agni, gracious to all, protect us at the morning pressing with his might; may he the purifier, grant us wealth. May we that share the Soma-drink be long-lived svāhā."[1] The Adhvaryu and the Pratiprasthātṛ each make an offering with this verse. Others make the offerings following their Veda. They move towards the north for the Bahiṣpavamāna Stotra. Stooping indeed does the Adhvaryu move as the first shaking the two darbha-blades with the formula, "May the first-going speech go first. Going straight, may it go to gods, granting glory unto me, vital breath to the cattle, offspring unto me and the sacrificer."[2] They sit down in the praying place according to their seats. He gives the two darbha-blades to the Udgātṛ or the Prastotṛ with the formula, "Thou art the spreading for Ṛk and Sāman for the preservation by the couple,"[3] or silently. Then he murmurs the introducing formula, "The *him* sound-maker is Vāyu; the Prastotṛ is Agni; the Sāman is Prajāpati; the Udgātṛ is Bṛhaspati; the Upagātṛs are Viśve Devas; the Pratihartṛs are Maruts, the ending part of Sāman is Indra. May the gods,

9. Like the other cups and vessels, Soma-juice is taken also into the Droṇakalaśa, the Ādhavanīya jar and the Pūtabhṛt jar. The Soma, however, is taken in these not to the accompaniment of a mantra. In order to make up this deficiency, the Adhvaryu is required to touch them and thus is supposed to be taking the Soma into them symbolically while reciting the relevant formulas for taking up Soma. cf. TS.III.2.1.

1. TS.III.1.9.1
2. TS.III.1.10.2
3. The source of this formula is not known.

प्रस्तुतायां वाचयति श्येनो ऽसि गायत्रच्छन्दा अनु त्वारभे स्वस्ति मा संपारयेति। अत्र दशहोतारं व्याचष्टे। उद्द्रुते साम्नि संप्रैषमाहाग्नीदग्नीन्विहर बर्हि स्तृणाहि पुरोडाशाꣳ अलंकुरु प्रतिप्रस्थातः पशुरन्तिके ऽस्त्विति। यथासंप्रैषं तौ कुरुतः। अथाप उपस्पृश्याहैहि यजमानेति। पूर्वया द्वारा हविर्धानं प्रपाद्य समस्तꣳ राजानमुपतिष्ठते विष्णो त्वं नो अन्तम इति। अथादत्त आश्विनपात्रम्। तदेतद्द्व्यश्रि भवति। तस्मिन्गृह्णाति द्रोणकलशात्परिप्लुना पात्रेण या वां कशेत्यनुद्रुत्योपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामीति। परिमृज्य सादयत्येष ते योनिर्माध्वीभ्यां त्वेति। अथाप उपस्पृश्याहैहि यजमानेति। आहवनीयं द्रुत्वा स्रुचि चतुर्गृहीतं गृहीत्वा सप्तहोतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेति। अथावकाशैश्चरति परिभूरग्निं परिभूरिन्द्रमित्येतेनानुवाकेन। अथ प्रचरण्यां नवकृत्वो गृह्णीते। अथैष आग्नीध्र आग्नीध्रीयाद्धिष्णियादनुपूर्वं

possessors of vital breath, give me vital breath."[4] (He further says) "Om, do you chant." This Bahiṣpavamāna Stotra is of nine chants.[5] When its fifth (verse) is being chanted, the Adhvaryu makes the sacrificer recite the formula, "Thou art the eagle with Gāyatrī as the metre; I touch thee, do thou lead me across safely."[6] Here he recites the Daśahotṛ formula.[7]

When the Sāman has been finished, the Adhvaryu gives out the call, "O Agnīdh, do thou distribute the fires, spread the sacrificial grass, accomplish the Puroḍāśas; O Pratiprasthātṛ, let the sacrificial animal be nearby." They act according to the call. Having touched water, he says "Come, O sacrificer." After he has been made to enter the Havirdhāna shed by the eastern door, the sacrificer prays to the entire Soma with the verse, "O conquering Viṣṇu, do thou, nearest to us, grant us shelter. The sweet-flowing streams milk out for thee the unceasing spring."[8] The Adhvaryu takes the Āśvina cup. It is two-cornered. In it he takes up Soma from the Droṇakalaśa by means of the drawing spoon with the verse, "Do you, O Aśvins, furnish the sacrificer with that whip of yours which is sweet and full of mercy," and with the formula, "Thou art taken with a support; I take thee dear to Aśvins."[9] Having wiped it around, he places it with the formula, "This is thy birth-place; for the sweet thee."[9] Having touched water, he says, "Come, O sacrificer." Having gone to the Āhavanīya, having taken four spoonfuls in the ladle and having gone mentally over the Saptahotṛ formula,[10] he makes an offering on the Āhavanīya while the sacrificer has contacted him, with "svāhā." Then he prays with Avakāśa formulas, with the Anuvāka[11] beginning with "Surrounding Agni, surrounding Indra, surrounding Viśve Devas, surrounding me with Brahman-splendour be purified for us, pleasant to cattle, pleasant to men, pleasant to horses, pleasant, O King, to the plants. May we possess the abundance of wealth that is thine who art unbroken and of heroic power. O Lord of wealth, give it to me, May I share it, I wipe out this for thee. For my Prāṇa be purified giving splendour, for splendour. For Apāna ... for Vyāna ... for speech, for skill and strength .... for my eyes, O you two giving splendour, be purified for splendour, for my ears .... for my body ..., for my limbs, for my life ..., for my lustre ... . Thou art the belly of Viṣṇu; do thou, giving splendour, be purified for my splendour,... of Indra ...; ... of Viśve Devas ... . Who art thou? Thou art Ka by name. For whom thee? For Ka thee, thee whom I have

4. TS. III.3.2.1
5. That is to say, each of its Sāmans is to be chanted in nine Stomas.
6. TS. III.2.1.1
7. TĀ. III.1
8. TS. III.1.10.2
9. TS.I.4.6
10. TĀ.III.1
11. TS.III.2.3

धिष्णियेष्वङ्गारान्विहरति । अथ पुरस्तात्प्रत्यङ्ङासीनो विहृतान्धिष्णियान्व्याघारयति यथान्युप्तैर्मन्त्रैः । स यद्यु ह यथान्युप्तमभिजुहोति सप्त त इत्याग्नीध्रे ऽन्ततो जुहोति । यद्यु वै स्वाहास्वाहेति स्वाहेत्येवान्तत आग्नीध्रीये जुहोत्युदक्सꣳस्थताया इति । अथोत्तरस्य हविर्धानस्य चुबुके प्रचरणीꣳ सादयति । अथ सांकाशिनेन पथा पृष्ठ्याꣳ स्तृणाति संततां गार्हपत्यादाहवनीयात् ॥ ८ ॥ द्वितीयः ॥

अथाध्वर्यू रशनाहस्तो यूपमभ्यैति । उदूह्य पूर्वाꣳ रशनां नाभिदघ्ने परिव्ययन्नाह परिवीयमाणायानुब्रूहीति । स्वर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपाकरोति । समानं कर्मा प्रवरात् । प्रसिद्धꣳ होतारं वृणीते । अथाश्रावयत्यो श्रावयास्तु श्रौषडश्विनाध्वर्यू आध्वर्यवादित्यहं चासौ च मानुषाविति । प्रतिप्रस्थातुर्नाम गृह्णाति । अथाश्रावयत्यो श्रावयास्तु श्रौषण्मित्रावरुणौ प्रशास्तारौ प्रशास्त्रादित्यसौ मानुष इति । मैत्रावरुणस्य नाम गृह्णाति । अथाश्रावयत्यो श्रावयास्तु श्रौषडिन्द्रो ब्रह्मा ब्राह्मणादित्यसौ मानुष इति । मैत्रावरुणस्य नाम गृह्णाति । अथाश्रावयत्यो श्रावयास्तु श्रौषडिन्द्रो ब्रह्मा ब्राह्मणादित्यसौ मानुष इति । ब्राह्मणाच्छꣳसिनो नाम गृह्णाति । अथाश्रावयत्यो श्रावयास्तु श्रौषण्मरुतः पोत्रादित्यसौ मानुष इति । पोतुर्नाम गृह्णाति । अथाश्रावयत्यो श्रावयास्तु श्रौषड् ग्रावो

delighted with Soma, thee whom I have gladdened with Soma. May I be possessed of fair offspring; may I be possessed of noble heroes; may I be possessed of good splendour, may I be possessed of great abundance. Giving splendour to all my forms, do thou, giver of splendour, be purified for splendour; give it to me. Let me partake of thee. Here I cleanse thee."

He takes nine spoonfuls in the ladle in use. The Āgnīdhra distributes embers from the Āgnīdhra-mound on the Dhiṣṇiya-mounds one by one. Seated in front and facing the west, the Adhvaryu pours Āghāra-lines over the Dhiṣṇiyas with the same formulas with which they were raised. If he makes the Āghāra-offerings with those formulas with which they were raised, he finally makes the offering on the Āgnīdhra fire with the verse, "Seven are thy fire-sticks. O Agni, seven thy tongues, seven Ṛṣis, seven dear abodes, seven priesthoods, sacrifice to thee seven-fold. Do thou fill seven birth-places with ghee."[12] If he makes the Āghāra-offerings with Svāhā, he makes even the final offering (on the Āgnīdhra-fire) with Svāhā for the attainment of concluding towards the north. He places the ladle in use on the chin of the northern Havirdhāna cart. Along the path involving simultaneous sight he strews the Pṛṣṭhyā line straight from Gārhapatya upto the Āhavanīya.

VII.9

The Adhvaryu, with a cord in his hand, approaches the sacrificial post. Having raised upwards the earlier cord, while winding round (the new cord) at the height of the navel, he says (to the Hotṛ, "Do you recite verses for the sacrificial post being wound round." Having furnished the sacrificial post with a piece of wood, he dedicates the sacrificial animal to Agni. The procedure up to the choosing of priests is similar. He chooses the Hotṛ in the prescribed manner. He causes to announce, "Do thou announce," "Let it be heard," (He chooses with the formula) "Aśvins the two Adhvaryus by virtue of the Adhvaryu's function," "Myself and N.N. the two human (Adhvaryus)." He pronounces the Pratiprasthātṛ's name in place of N.N. He causes to announce. "Do thou announce," "Let it be heard," "Mitra and Varuṇa the two Praśāstṛs by virtue of the Praśāstṛ's function;" "N.N. the human (Praśāstṛ)." He utters Maitrāvaruṇa's name (in place of N.N). He causes to announce, "Do thou announce," "Let it be heard," "Indra the Brahman by virtue of the Brahmanhood," "N.N. the human (Brahman)." He utters the Brāhmaṇācchaṁsin's name (in place of N.N.). He causes to announce, "Do thou announce;" "Let it be heard;" "Maruts by virtue of the Potṛ's function," "N.N. the human (Potṛ)." He utters the Potṛ's name (in place of N.N.) He causes to announce, "Do thou announce," "Let it be

12. TS.I.5.3.2

नेष्ट्रादित्यसौ मानुष इति । नेष्टुर्नाम गृह्णाति । अथाश्रावयत्यो श्रावयास्तु श्रौषडग्निमाग्नीध्रादित्यसौ मानुष इति । अग्नीधो नाम गृह्णाति । तेषां प्रवृतः प्रवृत एव प्रवृताहुतीर्जुहोति । जुष्टो वाचो भूयासमृचा स्तोमꣳ समर्धय सूर्यो मा देवो देवेभ्यः पात्वित्येताभिरध्वर्यू जुहुतः । यथावेदमितरे जुह्वति । अथाश्रावयत्यो श्रावयास्तु श्रौषडग्निर्ह दैवीनां विशां पुरएतायꣳ सुन्वन्यजमानो मनुष्याणां तयोरस्थूरि गार्हपत्यं दीदयच्छतꣳ हिमा द्वा यू राधाꣳसीत्संपृञ्चानावसंपृञ्चानौ तन्व इति । समानं कर्मा वपायै । वपया प्रचर्य वपाश्रपणी अनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते । अथ यजमानमुत्करे स्फ्यविघनानुपस्थापयति ॥ ९ ॥

स्फ्यः स्वस्तिर्विघनः स्वस्तिः पर्शुर्वेदिः परशुर्नः स्वस्तिः । यज्ञिया यज्ञकृत स्थ ते मास्मिन्यज्ञ उपह्वयध्वमुप मा द्यावापृथिवी ह्वयेतामुपास्ताव: कलशः सोमो अग्निरुप देवा उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तामिति। अथ नमोऽग्नये मखघ्ने मखस्य मा यशोऽर्यादित्याहवनीयमुपतिष्ठते । नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीध्रम् । नम इन्द्राय मखघ्न इन्द्रियं मे वीर्यं मा निर्वधीरिति होत्रीयम् । अथ प्राङावृत्य जपति दृढे स्थः शिथिरे समीची माꣳहसस्पातꣳ सूर्यो मा देवो दिव्यादꣳहसस्पातु वायुरन्तरिक्षादग्निः पृथिव्या यमः पितृभ्यः सरस्वती मनुष्येभ्य इति । अथ प्रदक्षिणमावृत्य

heard," "Agni by virtue of Āgnīdhra's function." "N.N. the human Agnīdh." He utters Agnīdh's name (in place of N.N.)

Each one of them, having been chosen, makes offering pertaining to the choosing. The Adhvaryu and the Pratiprasthātṛ make the offerings with the formulas, "May I be agreeable to speech, agreeable to the lord of speech. O divine speech, transfer me to what is sweet in speech, to Sarasvatī, svāhā."[1]—"Provide the song with verse, the Rathantara with Gāyatrī, and the Bṛhat having the Gāyatrī for its path."[1] "May god Sūrya protect me before gods; Vāyu before the midregion. May Agni the sacrificer protect me before the (evil) eye. O strong one, O impetuous one, O instigator, O thou of all men, with these names, O Soma, we shall worship thee; with these names, Soma, we shall worship thee."[2] Others make these offerings following their Veda. Then he causes to announce. "Do thou announce;" "Let it be heard," (he chooses the sacrificer with the formula) "Agni is the forerunner of the divine subjects; this Soma-offering sacrificer of human beings; may their inseparable householderships be for us for a hundred years; the two companions filling with gifts, not joining their bodies."[3] The ritual upto the omentum is similar. Having offered the omentum, having thrown (into the fire) the pair of tongs and having moved forward together, (the priests) sprinkle themselves with water near the Cātvāla. The Adhvaryu makes the sacrificer pray to the wooden sword, the hammer etc. near the rubbish-heap.

VII.10

(With the formula) "May the wooden sword be safe; may the hammer be safe, may the rib be safe; may the altar be safe; may the axe be safe for us. You are qualified for the sacrifice, makers of the sacrifice; do you acquiesce me in this sacrifice; may Dyāvāpṛthivī acquiesce; may the place for chanting, may the Droṇakalaśa; may the Soma; may Agnī; may gods; may the sacrificer; may the Hotṛ's functions acquiesce'.[1] He (the sacrificer) prays to the Āhavanīya with the formula, "Obeisance to Agni, the killer of Makha, may the glory of Makha reach me."[1] He prays to the Āgnīdhra fire with the formula, "Obeisance to Rudra, killer of Makha; do thou guard me by reason of obeisance."[1] He prays to the Hotṛ's fire with the formula, "Obeisance to Indra the killer of Makha; do thou not kill my power and strength."[1] Having turned towards the east, he murmurs the formula, "You two are firm, loose, united; guard

1. TS.III.1.10.1
2. TS.III.5.5.1. BhārŚS XIV.8.10. ĀpŚS XII.9.12 etc. employ this formula in connection with the Āditya cup in the third pressing.
3. MS.III.9.8, ŚBr. III.7.4.10; MānŚS II.3.6.25

1. TS.III.2.4.1

पूर्वे द्वारौ सदसः संमृशति देवी द्वारौ मा मा संताप्तमिति । अथ सदः प्रपद्यते नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्या इति । अथासनाद्बहिःसदसं तृणं निरस्यत्यहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद यो ऽस्मत्पाकतर इति । उपविशत्युन्निवत उदुद्वतश्च गेषमिति । अथेमे समीक्षते पातं मा द्यावापृथिवी अद्याह्न इति । अथ दक्षिणार्धं परेक्षत आगन्त पितरः पितृमानहं युष्माभिर्भूयासꣳ सुप्रजसो मया यूयं भूयास्तेति । अथोत्तरार्धं परेक्षते । उदक्सꣳस्थताया इति ॥ १० ॥

अथेमावध्वर्यू आहवनीयप्रभृत्येवमेवाहवनीयमुपतिष्ठेते । एवमाग्नीध्रीयम् । एवꣳ होत्रीयम् । एवं प्राञ्चावावृत्य जपतः । एवं प्रदक्षिणमावृत्य पूर्वे द्वारौ सदसः संमृशतः । एवꣳ सदः प्रपद्येते । एवमासनाभ्यां बहिःसदसं तृणे निरस्यतः । दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपविशति । उत्तरं प्रतिप्रस्थाता । एवमिमे समीक्षेते । एवं दक्षिणार्धं चोत्तरार्धं च परेक्षेते । उदक्सꣳस्थताया इति । अथेमे वषट्कर्तार आहवनीयप्रभृति । एवमेवाहवनीयमुपतिष्ठन्ते । एवमाग्नीध्रीयम् । तमुत्तरेण परियन्ति । एवꣳ होत्रीयम् । एवं प्राञ्च आवृत्य जपन्ति । एवं प्रदक्षिणमावृत्य पूर्वे द्वारौ सदसः संमृशन्ति । एवꣳ सदः प्रपद्यन्ते । अग्रेण धिष्णियानुत्तरेणाच्छावाकस्य धिष्णियं परीत्यैवमासनेभ्यो बहिःसदसं

me from anxiety; may god Sūrya guard me from anxiety from heaven, Vāyu from the midregion, Agni from the earth, Yama from the Pitṛs and Sarasvatī from men."[2] Having turned by the right, he touches together the two panels of the eastern door of the Sadas with the formula, "O you divine doors, do not torment me."[3]

He enters the Sadas with the formula, "Obeisance to the Sadas, obeisance to the lord of the Sadas; obeisance to the eye of the friends who go before; obeisance to Dyaus; obeisance to Pṛthivī."[3] He throws out a darbha-blade from his seat outside the Sadas with the formula, "O you, son of a second wife, get away from here, sit down in another's seat who is younger than we are."[3] He sits down with the formula, "May I go over the low and over the high."[3] He gazes at these (heaven and earth) with the formula, "Do you O Dyāvāpṛthivī, guard me today from the day."[3] He gazes beyond the southern half (of the Sadas) with the formula, "Do you come, O Pitṛs, may I be possessed of Pitṛs through you; may you be having good offspring through me."[4] He then gazes at the northern half in order to accomplish conclusion towards the north.

VII.11

The Adhvaryu and the Pratiprasthātṛ pray similarly. They pray to the Āhavanīya similarly. Similarly the Āgnīdhrīya fire; similarly the Hotṛ's fire; they murmur similarly having turned towards the east. Having turned by the right, they similarly touch the panels of the door of the Sadas, similarly they enter the Sadas. Similarly they throw away darbha-blades from their seats outside the Sadas. The Adhvaryu sits down leaning upon the southern arm of the door; the Pratiprasthātṛ the northern one. They similarly gaze at those (heaven and earth). Similarly they gaze beyond the southern and northern half (of the Sadas) for the accomplishment of the conclusion towards the north. The Vaṣaṭ-utterers[1] pray similarly beginning with the Āhavanīya. They pray to the Āhavanīya similarly. Similarly the Āgnīdhrīya. They go around along the north. Similarly the Hotṛ's fire. Having turned towards the east, they murmur similarly. Having turned by the right they touch together the panels of the door of the Sadas. They enter the Sadas similarly. Going round along the front of the Dhiṣṇiyas and along the north of the Acchāvāka's Dhiṣṇiya, they throw away darbha-blades from their seats outside the Sadas. They sit down similarly by

2. TS.III.2.4.3
3. TS.III.2.4.4
4. TS.III.2.4.5

1. Namely, the Hotṛ, the Maitrāvaruṇa, the Brāhmaṇāchaṁsin, the Potṛ, the Neṣṭṛ and the Āgnīdhra. The Acchāvāka enters later.

तृणानि निरस्यन्ति । एवꣳ स्वꣳस्वमेव धिष्णियमनूपविशन्ति । एवमिमे समीक्षन्ते । एवं दक्षिणार्धं चोत्तरार्धं च परेक्षन्ते । उदक्सꣳस्थताया इति। अथेमे सर्व उद्गातारो ब्रह्मा सदस्य इत्यवषट्कर्तार आहवनीयप्रभृत्येवमेवाहवानीयमुपतिष्ठन्ते । एवमाग्नीध्रीयम् । तमुत्तरेण परियन्ति । एवꣳ होत्रीयम् । एवं प्राञ्च आवृत्य जपन्ति । एवं प्रदक्षिणमावृत्योत्तरेण सदः परीत्यैवमपरे द्वारौ सदसः संमृशन्ति । एवꣳ सदः प्रपद्यन्ते । एवमासनेभ्यो बहिःसदसं तृणानि निरस्यन्ति । औदुम्बरीमेवोद्गातारः पर्युपविशन्ति । दक्षिणत उदङ्मुखौ ब्रह्मा सदस्य इत्युपविशतः । एवमिमे समीक्षन्ते । एवं दक्षिणार्धं चोत्तरार्धं च परेक्षन्ते । उदक्सꣳस्थताया इति । अथैतेषां विसꣳस्थितसंचरः । अन्तरेण होतुश्च धिष्णियं ब्राह्मणाच्छꣳसिनश्च येऽधिष्णियाः । अथ धिष्णियवन्तः स्वꣳस्वमेव धिष्णियमुत्तरेणोत्तरेण परियन्ति । ते सꣳस्थिते सवने यथाप्रसृप्तमेव विनिःसर्पन्ति ॥ ११ ॥ तृतीयः ॥

संप्रसृप्तान्विदित्वाध्वर्युः सवनीयान्पुरोडाशान्याचति । अथैष आग्नीध्रो जघनेन गार्हपत्यमुपविश्य पात्र्यां पञ्चधोपस्तृणीते । मध्यतः पुरोडाशमुपस्तीर्णाभिघारितमुद्वासयति । पुरस्ताद्धानाः । दक्षिणतः करम्भम् । पश्चात्परिवापम् । आमिक्षामुत्तरतः । अथैनानि संपरिगृह्य पूर्वया द्वारोपनिर्हृत्योत्तरेण सदः परीत्योत्तरेणाग्नीध्रीयं धिष्णियं पर्याहृत्यान्तर्वेद्यासादयति । अथ जुहूपभृतोरुपस्तृणान आह प्रातः प्रातःसावस्येन्द्राय पुरोडाशानामवदीयमानानामनुब्रूहीति । द्विः पुरोडाशस्यावद्यति । द्विर्धानानाम्। द्विः करम्भस्य । द्विः परिवापस्य । द्विरामिक्षायाः । अभिघारयति । प्रत्यनक्ति । अथोपभृति स्विष्टकृते सर्वेषाꣳ सकृत्सकृदुत्तरार्धादवद्यति । द्विरभिघारयति । न प्रत्यनक्ति । अत्याक्रम्याश्राव्याह प्रातः प्रातःसावस्येन्द्राय पुरोडाशान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति। अथ समावपमान आहाग्रये ऽनुब्रूहीति । आश्राव्याहाग्रये प्रेष्येति । वषट्कृत उत्तरार्धपूर्वार्धे

the side of their respective Dhiṣṇiyas. They gaze at these (heaven and the earth) similarly. Similarly they gaze beyond the southern and northern half of the Sadas for the accomplishment of the conclusion towards the north.

The Udgātṛs, the Brahman and the Sadasya, who are the non-Vaṣaṭ-utterers similarly pray beginning with Āhavanīya. They pray similarly to the Āhavanīya. Similarly the Āgnīdhrīya. They turn around along its north. Similarly the Hotṛ's fire. Having turned towards the east, they murmur similarly. Having turned by the right, and having gone around along the north of the Sadas, they similarly touch together the two panels of the southern door. They enter the Sadas similarly. Similarly they throw out darbha-blades from their seats outside the Sadas. The Udgātṛs sit down around the Udumbara-pot. The Brahman and the Sadasya sit down towards the south facing the north. They gaze at these (heaven and earth) similarly. Similarly they gaze beyond (successively) towards the southern half and northern half of the Sadas for the accomplishment of the conclusion towards the north. Now (about) their passage before the conclusion (of the Soma-pressing). (The passage of those) who are without a Dhiṣṇiya is between the Dhiṣṇiyas of the Hotṛ and the Brāhmaṇācchaṁsin. Those who have Dhiṣṇiyas go round along the north of their respective Dhiṣṇiyas. At the conclusion of the Soma-pressing, they go out by the same route as they entered.

VII.12

Having known that the priests have entered (the Sadas), the Adhvaryu asks for Savanīyapuroḍāśas. The Āgnīdhra, having sat down to the rear of the Gārhapatya, spreads clarified butter at five places in the pan. In the middle he brings down the cake, first having spread clarified butter as base and then having poured clarified butter over it. Roasted grains in front, flour of parched barley mixed with curds towards the south; parched grains towards the west and Āmikṣā towards the north. Having taken them together, having taken them out by the eastern door, having gone around along the north of the Sadas and having carried along the north of the Sadas and having carried along the north of the Āgnīdhriya mound, he places them within the altar. While spreading clarified butter into the Juhū and the Upabhṛt, (the Adhvaryu) says (to the Maitrāvaruṇa). "Do you recite the puronuvākyā in the morning for the Puroḍāśas being cut up for Indra at the morning pressing." He twice takes portion of the cake, twice of roasted grains, twice of flour of parched barley mixed with curds, twice of the parched grains and twice of the Āmikṣā. He pours clarified butter over them, anoints back (the five oblations). He takes portions once of all the oblations into the Upabhṛt (for the Sviṣṭakṛt offering). He twice pours clarified butter; does not anoint back. Having crossed and having caused to announce, he says (to the Maitrāvaruṇa) "Do you address a call (to the

ऽतिहाय पूर्वा आहुतीर्जुहोति । अथोदङ्ङत्याक्रम्य यथायतनꣳ स्रुचौ सादयित्वा पात्र्यामिडाꣳ समवधाय प्रतीचः पुरोडाशान्प्रहिणोति । अनु हैके संयन्ति पशव इडेति वदन्तः । अथ प्राङायन्नाह वायव इन्द्रवायुभ्यामनुब्रूहीति । तच्छ्रुत्वा प्रतिप्रस्थातैन्द्रवायवस्य प्रतिनिग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेणादित्यस्थाल्या औपशये पात्र उपयामगृहीतो ऽसि वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति । ग्रहावादायोपनिष्क्रामति । उपनिष्क्रान्तस्यै-वाध्वर्युर्ग्रहावादत्ते । उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिग्राह्यं प्रयच्छति । अथ वै भवत्यैन्द्रवायवमादायाघारमाघारयेदिति । स आज्यस्थाल्याः स्रुवेणोपहत्यैन्द्रवायवमादायाघारमाघारयत्यध्वरो यज्ञो ऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाध्वरो ऽसि स पिन्वस्व घृतवद्देव सोम स्वाहेति । अथाश्रावयत्यो श्रावयास्तु श्रौषड्वायव इन्द्रवायुभ्यां प्रेष्येति । वषट्कृते ऽध्वर्युः पूर्वो जुहोति । द्वितीयं वषट्कृते सहोभौ जुहुतः । हुत्वा वाचयति यो न इन्द्रवायू अभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतयानीति। अथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य संस्रावमवनयति । उभयोरर्धमध्वर्युः प्रतिप्रस्थातुः पात्रे ऽवनयति । तं प्रतिप्रस्थातादित्यस्थाल्यामवनयति देवेभ्यस्त्वेति । अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुद्द्रुत्य होत्रे पात्रं प्रदाय प्राङायन्नाह मित्रावरुणाभ्यामनुब्रूहीति । तच्छ्रुत्वा प्रतिप्रस्थाता मैत्रावरुणस्य प्रतिनिग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेणादित्यस्थाल्या औपशये पात्र उपयामगृहीतो ऽस्यृतसदसि चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति । ग्रहावादायोपनिष्क्रामति । उपनिष्क्रान्त-स्यैवाध्वर्युर्ग्रहावादत्ते । उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिग्राह्यं प्रयच्छति। अथाश्रावयत्यो श्रावयास्तु श्रौषण्मित्रावरुणाभ्यां प्रेष्येति । वषट्कृते सहोभौ जुहुतः । हुत्वा वाचयति यो नो मित्रावरुणावभिदासति भ्रातृव्य

Hotṛ to recite the yājyā) for the Puroḍāśās set for Indra at the morning pressing." He makes the offering at the Vaṣaṭ-utterance (by the Hotṛ). While taking the portions (from the Upabhṛt) he says (to the Maitrāvaruṇā), "Do you recite the puronuvākyā for Agni." Having caused to announce, he says, "Do you address a call (to the Hotṛ) to recite the yājyā for Agni." At the Vaṣaṭ-utterance he makes the offering in the eastern half of the northern half beyond the earlier offerings. Having crossed towards the north, having placed the two ladles in their places, and having put together the Iḍā into the pan, he directs the Puroḍāśas to the west (towards the Hotṛ). Some teachers, saying that Iḍā indeed is the animals (hold that the sacrificer and certain priests) follow (him).

Moving towards the east, (the Adhvaryu) says (to the Maitrāvaruṇa). "Do you recite the puronuvākyā for Vāyu and Indra-Vāyu." Listening to the call, the Pratiprasthātṛ takes up a counter-cup[1] for the draught for Indra-Vāyu in a cup lying near the Āditya-vessel from the Droṇakalaśa by means of the drawing spoon with the formula, "Thou art taken with a support, thou art abiding by what is spoken; for the two speech-guardians, for the two guardians of thought, for the two lords of this established sacrifice do I take thee."[2] Having taken the two cups, he goes out. The Adhvaryu takes up the two cups from the Pratiprasthātṛ who has gone out. He hands over the cup to the Pratiprasthātṛ standing towards the north. It is indeed said, "Having taken up the cup for Indra-Vāyu, one should pour the Āghāra-libation."[3] Having dipped the spoon into the vessel of clarified butter, and having taken up the cup for Indra-Vāyu (in his left hand) he offers the Āghāra-libation with the verse "O gods, may this sacrifice be harmless for our plants, for out cattle, for our folk. Thou art harmless to all creatures; swell like ghee, svāhā."[3] Then he causes to announce, "Do thou announce," "Let it be heard." "Do you address a call (to the Hotṛ to recite the yājyā) for Vāyu and Indra-Vāyu." At the Vaṣaṭ-utterance the Adhvaryu first (i.e. alone) makes the offering. At the second Vaṣaṭ-utterance both of them simultaneously offer. After having offered, he makes the sacrificer recite the formula, "The enemy who, O Indra-Vāyu, is hostile to us, who seeks to assail us. O lords of splendour, may I here hurl him below my feet so that, O Indra, I may shine as the highest."[4] The Pratiprasthātṛ pours down the remnants of his cup into the Adhvaryu's cup. The Adhvaryu drops down half of them into the Pratiprasthātṛ's cup. The Pratiprasthātṛ pours them down in the Āditya vessel with the formula, "For gods thee."[5]

1. Caland's text reads *pratinirgrāhya.* Many manuscripts, Bhavasvamin and other Śrautasūtras read *pratinigrāhya.*
2. TS.III.2.10.1
3. cf. TS III.1.9.3
4. TS.III.2.10.3
5. TS.III.2.10.1

उत्पित्पीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतया-नीति । अथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य सꣳस्रावमवनयति । उभयोरर्धमध्वर्युः प्रतिप्रस्थातुः पात्रे ऽवनयति । तं प्रतिप्रस्थातादित्य-स्थाल्यामवनयति विश्वदेवेभ्यस्त्वेति । अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य होत्रे पात्रं प्रदाय प्राङयन्नाहाश्विभ्यामनुब्रूहीति। तच्छ्रुत्वा प्रतिप्रस्थाताश्विनस्य प्रतिनिग्राह्यं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेणा-दित्यस्थाल्या औपशये पात्र उपयामगृहीतो ऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामीति । ग्रहावादा-योपनिष्क्रामति । उपनिष्क्रान्तस्यैवाध्वर्युर्ग्रहावादत्ते । उत्तरतस्तिष्ठते प्रतिप्रस्थात्रे प्रतिनिग्राह्यं प्रयच्छति । अथाश्रावयत्यो श्रौषडश्विभ्यां प्रेष्येति।वषट्कृते सहोभौ जुहुतः।हुत्वा वाचयति यो नो ऽश्विनावभिदा-सति भ्रातृव्य उत्पित्पीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतयानीति । अथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य सꣳस्रावमवनयति । उभयोरर्धमध्वर्युः प्रतिप्रस्थातुः पात्रे ऽवनयति । तं प्रतिप्रस्थातादित्यस्थाल्यामवनयति विश्वेभ्यस्त्वा देवेभ्य इति ॥ १२ ॥

स यद्यु हैतैः सꣳस्रावैरुपर्यर्धा स्थाली भवत्येतेनैनां पात्रेणापिदधाति। यद्यु वै नोपर्यर्धा भवति द्रोणकलशादेनामुपर्यर्धां कृत्वैतेनैव पात्रेणापिदधाति विष्णवुरुक्रमैष ते सोमस्तꣳ रक्षस्व तं ते दुश्चक्षा मावख्यदिति।अथाध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य होत्रे पात्रं प्रदाय प्राङयन्नाहोन्नीयमानेभ्यो ऽनुब्रूहि होतुश्चमसमनून्नयध्वमुभयतःशुक्रान्कुरुध्वमच्छावाकस्य चमसाध्वर्यो मा तु त्वमुन्नेष्ठाः प्रतिप्रस्थातश्चतुर्भिर्मा शकलैः प्रोक्षिताप्रोक्षितैः प्रत्युपलम्बस्वेति।यथासंप्रैषं ते कुर्वन्ति।द्रोणकलशादेव प्रथममुन्नयन्ति। अथ पूतभृतः। अथ द्रोणकलशात् । ते उभयतःशुक्राः। होतृचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान् । समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । अथ प्रतिप्रस्थाता चतुर्णाꣳ शकलानां द्वौ प्रोक्षति । द्वावप्रोक्षितौ भवतः ।

The Adhvaryu, having turned by the right, having hastened towards the west, and having given the cup to the Hotṛ, while going towards the east says (to the Maitrāvaruṇa) "Do you recite the puronuvākyā for the Aśvins." Listening to it, the Pratiprasthātṛ takes up a counter-cup to the cup for the Aśvins in a cup lying near the Āditya-vessel from the Droṇakalaśa by means of the drawing spoon with the formula, "Thou art taken with a support; abiding in what is heard, for the two guardians of the ear, for the two guardians of thought, for the two lords of this established sacrifice do I take thee."[5] Taking up the two cups, he moves out. The Adhvaryu takes the cups from him who has moved out. He hands over the counter-cup to the Pratiprasthātṛ standing towards the north. He causes to announce, "Do thou announce," "Let it be heard," "Do you address a call (to the Hotṛ to recite the yājyā) for the Aśvins." At the Vaṣaṭ-utterance, both of them make the offerings simultaneously. Having made the offering, he causes the sacrificer to recite the formula, "The enemy, who, O Aśvins, is hostile to us, who seeks to assail us, O lords of splendour, may I here hurl him below my feet so that, O Indra, I may shine as the light."[4] The Pratiprasthātṛ pours the remnants of his cup into the Adhvaryu's cup. The Adhvaryu pours half of both of them into the Pratiprasthātṛ's cup. The Pratiprasthātṛ pours them down into the Āditya vessel with the formula, "For Viśve Devas thee."[5]

VII.13

If the (Āditya) vessel is filled in more than half with these remnants, he covers it with that very cup (which he emptied). If it is not more than half, having filled it more than half (with the Soma) from the Droṇakalaśa, he covers it with the same cup with the formula, "O wide striding Viṣṇu, this is thy Soma. Guard it, let the evil-eyed not look down this (Soma) of thine."[1] The Adhvaryu, having turned by the right, having hastened towards the west, and having given over the cup to the Hotṛ, says while going eastwards, "Do you (O Maitrāvaruṇa) recite the hymn for the goblets being filled in; do you (O Camasādhvaryus) fill in the goblets following the Hotṛ's goblet; render them bright on both sides; O Camasādhvaryu of the Acchāvāka, do thou, however, not fill in; O Pratiprasthātṛ, do thou be by my side with four splinters (two) sprinkled and (two) not sprinkled." They act according to the call. (The Camasādhvaryus) first fill in from the Droṇakalaśa, then from the Pūtabhṛt jar and again from the Droṇakalaśa. (Thus) they become bright on both sides. The Hotṛ's goblet is filled in first. Others as may be convenient. Having filled them in, they place them together on the Uttaravedi. The Pratiprasthātṛ sprinkles (with

1. TS.III.2.10.1

प्रोक्षिताभ्यामपिधायाप्रोक्षिताभ्यामुपयच्छतः।शुक्रमेवाध्वर्युरादत्ते। मन्थिनं प्रतिप्रस्थाता।ग्रहावादायोपनिष्क्रामतो।दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपनिष्क्रामति।उत्तरं प्रतिप्रस्थाता।तौ जघनेनोत्तरवेदिं ग्रहौ संधत्त आयुः संधत्तं तन्मे जिन्वतं प्राणꣳ संधत्तं तं मे जिन्वतमपानꣳ संधत्तं तं मे जिन्वतं व्यानꣳ संधत्तं तं मे जिन्वतं चक्षुः संधत्तं तन्मे जिन्वतꣳ श्रोत्रꣳ संधत्तं तन्मे जिन्वतमिति ।षड्भिः संधाभिः संधाय व्युत्क्रामतः।स्तुतो ऽसि जनधा देवास्त्वा शुक्रपाः प्रणयन्तु सुवीराः प्रजाः प्रजनयन्परीहि शुक्रः शुक्रशोचिषेत्यध्वर्युर्दक्षिणेनोत्तरवेदिं परिक्रामति । स्तुतो ऽसि जनधा देवास्त्वा मन्थिपाः प्रणयन्तु सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेति प्रतिप्रस्थातोत्तरेणोत्तरवेदिं परिक्रामति । तौ पुरस्तात्प्रत्यञ्चावुत्तरवेदिमधिद्रवत इन्द्रेण सयुजो वयꣳ सासह्याम पृतन्य-तः।घ्नन्तो वृत्राण्यप्रति ॥ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाहꣳ हरस्वी भूयास-मिति । अथान्तरेण यूपं चाहवनीयं च ग्रहौ संधत्त आयु स्थ आयुर्मे धत्तमायुर्यज्ञाय धत्तमायुर्यज्ञपतये धत्तं प्राण स्थः प्राणं मे धत्तं प्राणं यज्ञाय धत्तं प्राणं यज्ञपतये धत्तमपान स्थो ऽपानं मे धत्तमपानं यज्ञाय धत्तमपानं यज्ञपतये धत्तं व्यान स्थो व्यानं मे धत्तं व्यानं यज्ञाय धत्तं व्यानं यज्ञपतये धत्तं चक्षु स्थश्चक्षुर्मे धत्तं चक्षुर्यज्ञाय धत्तं चक्षुर्यज्ञपतये धत्तꣳ श्रोत्रꣳ स्थः श्रोत्रं मे धत्तꣳ श्रोत्रं यज्ञाय धत्तꣳ श्रोत्रं यज्ञपतये धत्तमिति । षड्भिः संधाभिः संधाय व्युत्क्रामतः ॥ १३ ॥

तौ देवौ शुक्रामन्थिनौ कल्पयतं दैवीर्विशः कल्पयतं मानुषीरिष-मूर्जमस्मासु धत्तं प्राणान्पशुषु प्रजां मयि च यजमाने चेति । अथाप्रोक्षितौ शकलौ बहिर्वेदि निरस्यतः।निरस्तः शण्डः सहामुनेत्यध्वर्युर्यं यजमानो

water) two out of the four splinters. Two remain unsprinkled. (The Adhvaryu and the Pratiprasthātṛ), having covered (the two cups) with sprinkled splinters, support them with the unsprinkled ones.

The Adhvaryu takes up the Śukra cup, the Pratiprasthātṛ the Manthin cup. Having taken up the cups, they go out. The Adhvaryu goes out leaning on the southern door -post; the Pratiprasthātṛ the northern one. To the rear of the Uttaravedi, they join their cups together with the formula, "Do you join the life, move it towards me; join the Prāṇa, move it towards me; join the Apāna, move it towards me; join the Vyāna, move it towards me; join the eye, move it towards me; join the ear, move it towards me." Having joined with six joining formulas, they step out in different directions. The Adhvaryu steps around along the south of the Uttaravedi with the formula, "Thou art praised, feeder of the people; may gods, drinkers of Śukra cup, carry thee. Begetting heroic offspring, do thou, Śukra cup, go round with lustre of the Śukra cup."[2] The Pratiprasthātṛ steps around along the north of the Uttaravedi with the formula, "Thou art praised, feeder of the people; may gods, drinkers of Manthin cup, carry thee. Begetting heroic progeny, do thou, Mathin cup, go round with the lustre of Manthin."[2] They tread upon the Uttaravedi from east to west with the mantras, "In unison with Indra may we withstand our enemies, smiting the enemies irresistibly.[3] O Agni, may I be brilliant with that brilliance which is thine; may I be lustrous with that lustre which is thine; may I be glowing with that glow which is thine."[3] They join the cups between the sacrificial post and the Āhavanīya with the formula, "You (two) are (long) life; give me (long) life; do you give long life to the sacrifice; do you give (long) life to the lord of sacrifice. You two are the Prāṇa; give me Prāṇa; give Prāṇa to the sacrifice; give Prāṇa to the lord of sacrifice. You two are Apāna; give me Apāna; give Apāna to the sacrifice; give Apāna to the lord of sacrifice. You two are Vyāna; give me Vyāna; give Vyāna to the sacrifice; give Vyāna to the lord of sacrifice. You two are eye; give me eye; give eye to the sacrifice; give eye to the lord of sacrifice. You two are ear; give me ear; give ear to the sacrifice; give ear to the lord of sacrifice."[2] Having joined (the cups) with six joining formulas, they step out in different directions.

VII.14

(With the formula) "Do you O gods Śukra and Manthin, put in order the divine subjects, put in order the human subjects, give unto us food and vigour, vital breath unto the cattle, offspring unto me and the sacrificer."[1] They throw outside

2. TBr.I.1.1.1-2
3. TS.III.5.3.2
1. TBr.I.1.1.3

द्वेष्टि तं मनसा ध्यायति । निरस्तो मर्कः सहामुनेति प्रतिप्रस्थाता यं यजमानो द्वेष्टि तं मनसा ध्यायति । अथाप उपस्पृश्य प्रोक्षिता- वभ्याधत्तः । शुक्रैषा ते समित्तया समिध्यस्व स्वाहेत्यध्वर्युः । मन्थिन्नेषा ते समित्तया समिध्यस्व स्वाहेति प्रतिप्रस्थाता । एतस्मिन्काले चमसाध्वर्य- वश्चमसानुपोद्यच्छन्ते । अथाध्वर्युः पुरस्तात्प्रत्यङ्तिष्ठन्नाश्रावयत्यो श्रावयास्तु श्रौषट् प्रातः प्रातःसावस्य शुक्रवतो मन्थिवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति । वषट्कृते सहोभौ जुहुतः स प्रथमः संकृतिर्विश्वकर्मा स प्रथमो मित्रो वरुणो अग्निः । स प्रथमो बृहस्पतिश्चिकित्वान्तस्मा इन्द्राय सुतमाजुहोमि स्वाहेति । वषट्कृतानुवषट्कृते द्विर्जुहुतः । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वति । अथ संप्रैषमाह प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातुः प्र यजमानस्य प्र सदस्यस्य होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्द्रोण- कलशादभ्युन्नीयोपावर्तध्वꣳ होतुश्चमसाध्वर्यवुपरमैहि प्रतिप्रस्थातरुत्तरार्ध आहवनीयस्य मन्थिनः सꣳस्रावं जुहुधीति । यथासंप्रैषं ते कुर्वन्ति । अथ प्रदक्षिणमावृत्य होतृचमसे ग्रहस्य सꣳस्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वा । अथ प्रतिप्रस्थातोत्तरार्ध आहवनीयस्य मन्थिनः सꣳस्रावं जुहोत्येष ते रुद्र भागो यं निरयाचथास्तं जुषस्व विदेर्गौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिꣳ स्वाहेति । अथाप उपस्पृश्य शुक्रपात्रं च मन्थिपात्रं च खरे यथायतनꣳ सादयति । यन्त्येते महर्त्विजां चमसाः । अथैते होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्द्रोणकलशादभ्युन्नीयोपावर्तन्ते । तेषां मैत्रावरुणचमसमादायाश्राव्याह प्रशास्तर्यजेति । वषट्कृतानुवषट्कृते द्विर्जुहोति । ब्रह्मन्यज पोतर्यज नेष्टर्यजाग्नीद्यजेति पञ्च होत्राः संयाज्य

the Mahāvedi the unsprinkled splinters. The Adhvaryu throws one with the formula, "Śaṇḍa is thrown away with this." He thinks of him whom the sacrificer hates. The Pratiprasthātṛ throws one with the formula, "Marka is thrown away with this." He thinks of him whom the sacrificer hates. Having touched water, they put on the fire the sprinkled splinters. The Adhvaryu puts with the formula, "O Śukra, this is thy firestick: do thou kindle (fire) with it, svāhā."[2] The Pratiprasthātṛ with the formula, "O Manthin, this is thy firestick; do thou kindle (fire) with it, svāhā."[2] At this time the Camasādhvaryus hold up their goblets. The Adhvaryu, standing towards the east and facing westwards, causes to announce, "Do you announce," "Let it be heard." "Do you address a call (to the Hotṛ to recite the yājyā) for the Somas characterised by Śukra and Manthin and honey-dripping set for Indra at the morning pressing." At the Vaṣaṭ-utterance both make the offering with the verse, "He (= Indra) is the first restorer, all-doing. Being the first, he is Mitra, Varuṇa and Agni. Being the first, he is wise Bṛhaspati. For that Indra I offer the pressed Soma, svāhā."[3] At the Vaṣaṭ and second Vaṣaṭ-utterance both make the offering twice. Similarly Camasādhvaryus offer the goblets twice each.

The Adhvaryu gives out the call, "Let the Hotṛ's goblet go (to him), the Brahman's, the Udgātṛ's the sacrificer's, the Sadasya's. O Camasādhvaryus of the Hotrakas, come back having taken up (Soma) from the Droṇakalaśa. O Camasādhvaryu of the Hotṛ, do thou wait; come O Pratiprasthātṛ, offer the remnants of the Manthin cup in the northern half of the Āhavanīya." They do accordingly. Having turned by the right, (the Adhvaryu) pours the remnants of his (Śukra cup) into the Hotṛ's goblet with the formula, "I pour down into the offered one thee who art offered, vigorous for the gods and sweet for men," or silently. The Pratiprasthātṛ offers the remnants of the Manthin cup on the northern half of the Āhavanīya with the formula, "This is, O Rudra, thy share which thou didst demand; enjoy it. Thou knowest the lordship of cattle, abundance of wealth, good sons, and the welfare lasting for a year svāhā."[4] Having touched water, he places the cup of Śukra and the cup of Manthin at their places on the mound. The goblets of the principal priests go to them. The Camasādhvaryus of Hotrakas, stand by having taken Soma from the Droṇakalaśa once each. Having taken up the Maitrāvaruṇa's goblet from amongst them and having caused to announce, the Adhvaryu says, "O Praśāstṛ, do you recite the yājyā." At the Vaṣaṭ-utterance and the second Vaṣaṭ-utterance he offers twice. He causes (in all) five Hotrakas to recite their yājyās

2. cf.TBr. I.1.1.5
3. TBr. I.1.1.5
4. TS.III.1.9.4

प्रदक्षिणमावृत्य प्रत्यङ्ङुद्दुत्याग्रेण होतारमुपविशत्ययाडग्नीदिति । स भद्रमकरित्याह होता यो नः सोमꣳ राजानं पाययिष्यतीति । अथ होतादत्त ऐन्द्रवायवपात्रम् । आत्तमेवाध्वर्युरन्वारभते । अन्वारब्धे ऽध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा स वेद । तथान्वारब्धे होतर्यध्वर्युरुपहवमिष्ट्वा भक्षयति मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहीति । अथ होता भक्षयति। अथाध्वर्युः । अथैनद्धोत्रे ऽनुषजति । तद्धोता यथायतनꣳ सादयति । अथ होतादत्ते मैत्रावरुणपात्रम् । आत्तमेवाध्वर्युरन्वारभते । अन्वारब्धे ऽध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा स वेद । तथान्वारब्धे होतर्यध्वर्युरुपहवमिष्ट्वा भक्षयति मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाहीति । अथैनद्धोत्रेऽनुषजति । तद्धोता यथायतनꣳ सादयति । अथ होतादत्त आश्विनपात्रम् । आत्तमेवाध्वर्युरन्वारभते । अन्वारब्धे ऽध्वर्यौ होतोपहवमिष्ट्वा भक्षयति यथा स वेद । तथान्वारब्धे होतर्यध्वर्युरुपहवमिष्ट्वा भक्षयति मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहीति । सर्वतःपरिहारमाश्विनं भक्षयतीति ब्राह्मणम् । अथैनद्धोत्रे ऽनुषजति । तद्धोता यथायतनꣳ सादयति । अथाप उपस्पृश्य होत्र इडामुपोद्यच्छन्ते ॥ १४ ॥

उपहूयमानायामिडायामुपप्रगृह्णन्ति चमसान् । उपहूतायामिडायामनाहितमग्नीधे भवति । अथैतानि द्विदेवत्यपात्राण्यरिक्तानि करोति । पुरोडाशशकलमैन्द्रवायवपात्रे प्रास्यति । आमिक्षां मैत्रावरुणपात्रे । धाना आश्विनपात्रे । अथैनानि संपरिगृह्य पूर्वया द्वारोपनिर्हृत्यापरया द्वारा हविर्धानं प्रपाद्य दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्याꣳ सादयति । तान्या

respectively at the calls, "O Brāhmaṇācchaṁsin, do you recite the yājyā,," "O Potṛ, do thou recite the yājyā." "O Neṣṭṛ, do thou recite the yājyā;" "O Agnīdh, do thou recite the yājyā." Having turned by the right and having hastened to the west, he sits down in front of the Hotṛ saying, "The Agnīdh has recited his yājyā." The Hotṛ says, "One who is going to make us drink Soma has done a good thing."

The Hotṛ takes up the cup for Indra-Vāyu. The Adhvaryu keeps contact with it when held by the Hotṛ. When the Adhvaryu has touched (the cup), the Hotṛ consumes it having first obtained the consent (of other priests) with the formula as he is aware. After the Hotṛ has touched the Adhvaryu, having obtained the consent (of others) consumes it with the formula, "With me is the wealth; with me is one who is preceded by wealth. O guardian of speech, guard my speech."[6] Then the Hotṛ consumes, then the Adhvaryu. The Adhvaryu passes it over to the Hotṛ. The Hotṛ keeps it at its proper place. The Hotṛ takes up the cup of Mitra-Varuṇa. The Adhvaryu touches it when the Hotṛ has held it. When the Adhvaryu has touched, the Hotṛ, having obtained the consent of others, consumes it with the formula of which he is aware. After the Hotṛ has touched, the Adhvaryu, having obtained the consent of others, consumes with the formula, "With me is the wealth; I am possessing wealth; guardian of eye; do thou guard my eye."[6] He hands it over to the Hotṛ. The Hotṛ keeps it at its place. The Hotṛ takes the Aśvins' cup. The Adhvaryu touches it when it is held by the Hotṛ. When the Adhvaryu has touched, the Hotṛ, having obtained the consent of others, consumes it with the formula as he is aware of. After the Hotṛ has touched, the Adhvaryu, having obtained the consent, consumes it with the formula, "With me is the wealth; I have won the wealth; guardian of ear, do thou guard my ear."[6] "(He consumes) the Āśvina-cup moving it around on all sides." So says the Brāhmaṇa.[7] He hands it over to the Hotṛ. The Hotṛ keeps it in its place. Having touched water, he holds up the Iḍā for the Hotṛ.

VII.15

While Iḍa is being invoked, the goblets are held by the side. After the Iḍā has been invoked, while the portion is not put on the Āgnīdhra's palm, the Adhvaryu renders the Dvidevatya cups non-empty; he puts a piece of cake into the cup for Indra-Vāyu, Āmikṣā into the cup for Mitra-Varuṇa, and roasted grains into the cup for Aśvins. Having taken up all these (cups) together, having taken them out by the eastern door, having led into the Havirdhāna shed by the western door, he places

5. ŚBr. IV.2.1.33
6. TS.III.2.10.2
7. cf. TS.VI.4.9.4

तृतीयसवनात्परिशेरे । अथाग्नीध आदधाति षडवत्तम् । प्राश्नन्ति । मार्जयन्ते । इडोपहूताः श्चमसान्भक्षयन्ति भक्षेहि माविशेति दीर्घभक्षमनुद्रुत्य वसुमद्गणस्य सोम देव ते मतिविदः प्रातःसवनस्य गायत्रच्छन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । आप्याययन्ति चमसानाप्यायस्व समेतु त इति । सीदन्ति नाराशंसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽध ऐन्द्राग्नाय। अथैषो ऽच्छावाको ऽग्रेण सद आस्ते । तस्मै महत्पुरोडाशशकलमादध- दाहाच्छावाक वदस्व यत्ते वाद्यमिति । स यत्राच्छावाकस्याभिजानात्युपो अस्मान्ब्राह्मणान्ब्राह्मणा ह्वयध्वमिति तदाह होतरच्छावाको वा अयमुपहवमिच्छते तमुपह्वयस्वेति । तमृचा होतोपह्वयते । अथ प्राडयन्नाहोन्नीयमानायानुब्रूह्यच्छावाकस्य चमसाध्वर्यवुन्नयस्वोभयतः शुक्रं कुरुष्वेति । स तथा करोति । अथ प्राडेत्याच्छावाकचमसमादायाश्राव्या- हाच्छावाक यजेति । वषट्कृतानुवषट्कृते हुत्वा हरति भक्षं । स यद्यस्मिन्नच्छावाक उपहवमिच्छत उपैवैनं ह्वयते । नो त्वेव संभक्ष- यतः । सीदत्यस्य नाराशंस आप्यायितः । अथाहाच्छावाक सीद नेष्टः पत्नीमुदानयाग्नीदच्छावाकं मे सन्नं प्रब्रूतादिति। सीदत्येषो ऽच्छावाको जघनेन स्वं धिष्णियम् । आनयति नेष्टा पत्नीं पन्नेजनीरादाय प्रेह्युदेहीत्येतेन निगदेन । अथैनां पूर्वया द्वारोपनिष्क्रमय्यापरया द्वारा सदः प्रपाद्य जघनेन नेष्टुर्धिष्णियमसंचरे सामपथे पन्नेजनीः सादयति वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यः पन्नेजनीः सादयामि यज्ञाय वः पन्नेजनीः सादयामीति।

them on the northern track of the southern Havirdhāna cart. They lie there until the third pressing. Then he gives six portions (of the Iḍā) to the Āgnīdhra. (The priests concerned) consume (the Iḍā) and sprinkle themselves. They consume the goblets, in whose regard the Iḍā has been invoked, with the formula, "O portion to be consumed, come hither, enter into me."[1] Having gone over this *dīrghabhakṣa* formula (he further continues) "O Soma, I, having sought the consent, consume thee who hast the Vasu for thy troop, who knowest the mind, who belongest to the first pressing, who hast Gāyatrī for thy metre, who art drunk by Indra, who hast sweetness and whose consent is sought."[2] These three consume the Hotṛcamasa after having sought the consent of each other. (The Camasins) consume their respective goblets. They touch, each one to himself, with the formula, "Impel my limbs, O thou with tawny steeds, do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis; do not go below my navel."[3] They swell the goblets with the verse, "O Soma, do thou swell, let thy strength be gathered from all sides. Do thou be the cause for gathering of strength."[3] The Nārāśaṁsa goblets which have been made to swell lie, each one, below the rear part of the southern Havirdhāna east, for the offering to Indra-Agni.

The Acchāvāka priest sits down in front of the Sadas. While giving him a piece of the cake, the Adhvaryu says to him, "O Acchāvāka, do thou recite what thou wilt." When he knows the Acchāvāka saying, "O brāhmaṇas, do you give consent to us the brāhmaṇas," he says, "O Hotṛ, this Acchāvāka is seeking consent; do you give him consent." The Hotṛ gives him consent by reciting a verse.[4] Going towards the east, the Adhvaryu says "(O Acchāvāka) do thou recite the hymn for the Soma being taken up (into the goblets); O Camasādhvaryu of the Acchāvāka, do thou fill in the goblet; make bright on both sides." He does so. Having gone towards the east, having taken up Acchāvāka's goblet and having caused to announce, he says, "O Acchāvāka, do thou recite the yājyā." Having made offerings at the Vaṣaṭ-utterance and second Vaṣaṭ-utterance, he carries over the goblet to be consumed. If the Acchāvāka seeks consent, he gives him consent. They do not however, consume together. His (Acchāvāka's) goblet which is swollen, lies as the Nārāśaṁsa. Then he (the Adhvaryu) says, "Sit down O Acchāvāka; O Neṣṭṛ, do thou lead the sacrificer's wife here. O Agnīdh, do thou report to me when the Acchāvāka has taken his seat." The Ācchāvāka sits down to the rear of his Dhiṣṇiya mound. The Neṣṭṛ leads the sacrificer's wife with the Pannejanī vessel in hand with the Nigada formula, "Go forth. Come up to the lovers of holy order. May Agni lead thy head; may Aditi give

1. TS.III.2.5.1
2. TS.III.2.5.2
3. TS.III.2.5.3
4. cf.ĀśvŚS V.7.5

अथाहाग्नीध्रः सन्नो ऽच्छावाको ऽच्छावाकः सन्नमुप पन्नेजनीरसीषदन्निति। एतस्मिन्काल आग्नीध्रे यजमानः पुरोडाशानां प्राश्नाति। यदशना स्यात्पत्नी पत्नीशाले ॥ १५ ॥ चतुर्थः ॥

अथर्तुपात्रे आददाते दक्षिणमेवाध्वर्युरुत्तरं प्रतिप्रस्थाता । अध्वर्युः पूर्वो वायव्येन द्रोणकलशाद्गृह्णात्युपयामगृहीतो ऽसि मधवे त्वा जुष्टं गृह्णामीति। अथ प्रतिप्रस्थाता गृह्णात्युपयामगृहीतो ऽसि माधवाय त्वा जुष्टं गृह्णामीति। ग्रहावादायोपनिष्क्रामतः। दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपनिष्क्रामति । उत्तरं प्रतिप्रस्थाता द्वार्बाहुं निश्रयमाण उपरमति । अथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता । प्रपद्यते ऽध्वर्युः । स गृह्णात्युपयामगृहीतो ऽसि शुक्राय त्वा जुष्टं गृह्णामीति । अथ प्रतिस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति । वषट्कृते जुहोति । निष्क्रामत्येवाध्वर्युः। प्रपद्यते प्रतिप्रस्थाता। स गृह्णात्युपयामगृहीतो ऽसि शुचये त्वा जुष्टं गृह्णामीति । अथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति। वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता । प्रपद्यते ऽध्वर्युः । स गृह्णात्युपयामगृहीतो ऽसि नभाय त्वा जुष्टं गृह्णामीति। अथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति । वषट्कृते जुहोति। निष्क्रामत्येवाध्वर्युः । प्रपद्यते प्रतिप्रस्थाता। स गृह्णात्युपयामगृहीतो ऽसि नभस्याय त्वा जुष्टं गृह्णामीति।

thee the middle portion. You are one who is released by Rudra, Yuvan by name; do not injure me."[5] Having led her by the eastern door and having led her into the Sadas by the western door, he puts down the Pannejanī vessel on the part of the path of the Sāman-chanters which is not frequented, with the formulas, "I place the Pannejanī-vessel for the Vasus, Rudras, Ādityas, and Viśve Devas; I place the Pannejanī vessel for the sacrifice to you."[5] The Āgnīdhra says, "The Acchāvāka is seated; the Pannejanī vessel is kept near the Acchāvāka." At this juncture the sacrificer consumes (the remaining part) of the Puroḍāśas; the sacrificer's wife eats whatever she likes.

VII.16

The Adhvaryu and the Pratiprasthātṛ take up the Ṛtu-cups— Adhvaryu the southern one, Pratiprasthātṛ the northern one. First the Adhvaryu takes up Soma from the Droṇakalaśa through a Vāyavya cup with the formula, "Thou art taken with a support; I take thee dear to Madhu."[1] The Pratiprasthātṛ takes up with the formula, "Thou art taken with a support; I take thee dear to Mādhava."[1] Taking up the cups they go out—the Adhvaryu goes out leaning on the southern post (of the door); the Pratiprasthātṛ stands leaning on the northern one. The Adhvaryu causes to announce, "Do thou announce," "Let it be heard," "Do you (O Maitrāvaruṇa) addresses a call (to the Hotṛ) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Pratiprasthātṛ moves forward; the Adhvaryu enters (the Havirdhāna shed). He takes up Soma with the formula, "Thou art taken with a support; I take thee dear to Śukra." The Pratiprasthātṛ causes to announce, "Do thou announce," "Let it be heard," "Do thou address a call (to the Potṛ) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Adhvaryu moves formard; the Pratiprasthātṛ enters (the Havirdhāna). He takes up Soma with the formula, "Thou art taken with a support; I take thee dear to Śuci. The Adhvaryu causes to announce, "Do thou announce," "Let it be heard " " Do you address a call (to the Neṣṭṛ) to recite the yājyā for the offerings of the Ṛtu-cup." He makes the offerings at the Vaṣaṭ-utterance. The Pratiprasthātṛ moves forward; the Adhvaryu enters (the Havirdhāna). He takes up with the formula, "Thou art taken with a support; I take thee dear to Nabha." The Pratiprasthātṛ causes to announce, "Do thou announce," "Let it be heard," "Do you address a call (to the Āgnīdhra) to recite the yājyā for the offering of the Ṛtu-cup."

5. TS.III.5.6.2

1. TS.I.4.14.1

अथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति । वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता । प्रपद्यते ऽध्वर्युर्विपर्यस्य पात्रम् । स गृह्णात्युपयामगृहीतो ऽसीषाय त्वा जुष्टं गृह्णामीति । अथ प्रतिप्रस्थाता-श्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति । वषट्कृते जुहोति । निष्क्रामत्येवाध्वर्युः । प्रपद्यते प्रतिप्रस्थाता विपर्यस्य पात्रम् । स गृह्णात्युपयामगृहीतो ऽस्यूर्जाय त्वा जुष्टं गृह्णामीति । अथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति । वषट्कृते जुहोति । निष्कामत्येव प्रतिप्रस्थाता । प्रपद्यतेऽध्वर्युः । स गृह्णात्युपयामगृहीतोऽसि सहाय त्वा जुष्टं गृह्णामीति । अथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति । वषट्कृते जुहोति । निष्क्रामत्येवाध्वर्युः। प्रपद्यते प्रति-प्रस्थाता । स गृह्णात्युपयामगृहीतो ऽसि सहस्याय त्वा जुष्टं गृह्णामीति । अथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति । वषट्कृते जुहोति। निष्क्रामत्येव प्रतिप्रस्थाता । प्रपद्यते ऽध्वर्युर्विपर्यस्य पात्रम् । स गृह्णात्युपयामगृहीतो ऽसि तपाय त्वा जुष्टं गृह्णामीति । अथ प्रतिप्रस्थाताश्रावयत्यो श्रावयास्तु श्रौषडृतुभिः प्रेष्येति । वषट्कृते जुहोति। निष्क्रामत्येवाध्वर्युः । प्रपद्यते प्रतिप्रस्थाता विपर्यस्य पात्रम् । तमाह प्रतिप्रस्थातरुपैतेन पात्रेण रमेति । अथाध्वर्युराश्रावयत्यो श्रावयास्तु श्रौषडृतुना प्रेष्येति । अध्वर्यू यजतमित्याह प्रशास्ता । होतरेतद्यजेत्या-हाध्वर्युः। वषट्कृते जुहोति । सो ऽत्रैवासीनं प्रतिप्रस्थातारमनुप्रपद्यते । प्रतिप्रस्थातात्र पूर्वो गृह्णात्युपयामगृहीतो ऽसि तपस्याय त्वा जुष्टं गृह्णामीति। अथाध्वर्युर्गृह्णात्युपयामगृहीतो ऽसि सꣳसर्पो ऽस्यꣳहस्पत्याय त्वा जुष्टं गृह्णामीति । ग्रहावादायोपनिष्क्रामतः । दक्षिणमेवाध्वर्युर्द्वार्बाहुं निश्रयमाण उपनिष्क्रामति । उत्तरं प्रतिप्रस्थाता । प्रतिप्रस्थातात्र श्रावयत्यो श्रावयास्तु

He makes the offering at the Vaṣaṭ-utterance. The Adhvaryu moves forward; the Pratiprasthātṛ enters (the Havirdhāna). He takes up Soma with the formula, "Thou art taken with a support; I take thee dear to Nabhasya." The Adhvaryu causes to announce, "Do thou announce," "Let it be heard," "Do you address a call (to the Brāhmaṇācchaṁsin) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Pratiprasthātṛ moves forward; the Adhvaryu enters (the Havirdhāna). Turning round the cup, he takes up Soma with the formula, "Thou art taken with a support; I take thee dear to Iṣa." The Pratiprasthātṛ causes to announce, "Do thou announce;" "Let it be heard," "Do you address a call (to the Maitrāvaruṇa) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Adhvaryu moves forward; the Pratiprasthātṛ enters (the Havirdhāna). Turning round the cup, he takes up Soma with the formula, "Thou art taken with a support; I take thee dear to Ūrja."

The Adhvaryu causes to announce, "Do thou announce," "Let it be heard;" "Do you address a call (to the Hotṛ) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Pratiprasthātṛ moves forward; the Adhvaryu enters (the Havirdhāna). He takes up the Soma with the formula, "Thou art taken with a support; I take thee dear to Saha." The Pratiprasthātṛ causes to announce, "Do thou announce," "Let it be heard," "Do thou address a call (to the Potṛ) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Adhvaryu moves forward; the Pratiprasthātṛ enters (the Havirdhana). He takes up the Soma with the formula, "Thou art taken with a support; I take thee dear to Sahasya." The Adhvaryu causes to announce, "Do thou announce," "Let it be heard," "Do thou address a call (to the Neṣṭṛ) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Pratiprasthātṛ moves forward. The Adhvaryu enters (the Havirdhāna). Turning round the cup, he takes up the Soma with the formula, "Thou art taken with a support; I take thee dear to Tapa." The Pratiprasthātṛ causes to announce, "Do thou announce;" "Let it be heard." "Do thou address a call (to the Acchāvāka) to recite the yājyā for the offering of the Ṛtu-cup." He makes the offering at the Vaṣaṭ-utterance. The Adhvaryu moves forward. The Pratiprasthātṛ enters (the Havirdhāna) turning round the cup. (The Adhvaryu) says to him, "O Pratiprasthātṛ, do you stop with this cup." The Adhvaryu causes to announce, "Do thou announce," "Let it be heard," "Do you address a call (to the Adhvaryus) for the offering of the Ṛtu-cup." "Do you two recite the yājyā," says the Praśāstṛ. "O Hotṛ, do you recite the yājyā (for me)," says the Adhvaryu. He makes the offering at the Vaṣaṭ-utterance. He follows (=joins) the Pratiprasthātṛ who is seated. The Pratiprasthatṛ first takes up the Soma with the formula, "Thou art taken with a support; I take thee dear to Tapasya." Then the Adhvaryu takes up the Soma with the formula, "Thou art taken with a support, thou art Saṁsarpa; I take thee dear to Aṁhaspatya."[1] Taking the

श्रौषड्तुना प्रेष्येति । गृहपते यजेत्याह प्रशास्ता । होतरेतद्यजेत्याह गृहपतिः । वषट्कृते सहोभौ जुहुतः । अथ प्रतिप्रस्थाताध्वर्योः पात्रे ग्रहस्य संस्रावमवनयति । तमाह प्रतिप्रस्थातरेतेन पात्रेणैन्द्राग्नं ग्रहं गृहाणेति । तेन प्रतिप्रस्थातैन्द्राग्नं ग्रहं गृह्णाति द्रोणकलशात्परिप्लुना पात्रेणेन्द्राग्नी आगतं सुतमित्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राग्निभ्यां त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राग्निभ्यां त्वेति । अथाध्वर्युः प्रदक्षिमावृत्य प्रत्यङ्ङुद्रुत्य होत्रैतत्पात्रं संभक्षयत्यृतुना पीतस्येति होत्रा पोत्रा नेष्ट्राग्नीधा ब्राह्मणाच्छंसिना मैत्रावरुणेनेति । अथ विपर्यस्य पात्रं होत्रैव चतुः संभक्षयत्यृतुभिः पीतस्येति होत्रा पोत्रा नेष्ट्राच्छावाकेनेति । अथ विपर्यस्यैव पात्रं होत्रैव द्विः संभक्षयत्यृतुना पीतस्येति ॥ १६ ॥

अथ होतारं विपृच्छति प्रणवमुपांशुशंसं शंसिष्यसी-३विग्राहा३मिति । स यथैनं होता प्रत्याह तच्छ्रुत्वा निगृह्य पात्रं पराङावर्तते । इडा देवहूरिति यावदेतस्य यजुषः पर्याप्नोति तावज्जपति । अभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शंसति । प्रतिगृणाति । यदुपांशु शंसति तदुपांशु प्रतिगृणाति । यदुच्चैः शंसति तदुच्चैः प्रतिगृणाति । संततं वा विग्राहं वा । प्रसिद्धमुक्थं प्रतिगीर्य प्राडेत्योद्यच्छत

cups both go out. The Adhvaryu passes clinging to the southern post; the Pratiprasthātṛ the northern one. The Pratiprasthātṛ causes to announce, "Do thou announce;" let it be heard;" "Do you address a call (to the sacrificer) for the offering of the Ṛtu-cup." "O Gṛhapati, do you recite the yājyā," so says the Praśāstṛ. "Do you recite the (yājyā for me)," so says the Gṛhapati. Both make the offering at the Vaṣaṭ-utterance.

The Pratiprasthātṛ drops down the remnants of his cup into the Adhvaryu's cup. To him the Adhvaryu says, "O Pratiprasthātṛ, do you take up the Soma for Indra-Agni in this cup." The Pratiprasthātṛ takes up in the cup the Soma for Indra-Agni from the Droṇakalaśa by means of the drawing spoon, with the verse, "O Indra-Agni, do you come through my prayers for the pressed Soma, the excellent mist. Do you, impelled by our prayers, drink of it..."[2] Having recited this (he follows with the formula), "Thou art taken with a support; I take thee dear to Indra-Agni."[2] Having wiped it around, he places it with the formula, "This is thy birth-place; for Indra-Agni thee." The Adhvaryu, having turned by the right and having hastened towards the west, consumes the cup together with the Hotṛ with the formula, "O Soma, I, having sought the consent, consume thee who art drunk through the Ṛtu-cup who hast sweetness and whose consent is sought."[3] Similarly he consumes respectively with the Potṛ, Neṣṭṛ, Agnīdh, Brāhmaṇācchaṁsin and Maitrāvaruṇa. Having turned round the cup he consumes four times together respectively with the Hotṛ, Potṛ, Neṣṭṛ and Acchāvāka with the formula (modified as) "...through the Ṛtu-cup ...." Again having turned round the cup, he consumes together with the Hotṛ alone with the formula (as before) " .... through the Ṛtu-cup ....."

VII.17

(The Adhvaryu) asks the Hotṛ, "Will you pronounce in a low tone the Praṇava (joined to the *tūṣṇīṁśaṁsa*) or will you pronounce (the *tūṣṇīṁśaṁsa*) with breaks?" Having listened to what the Hotṛ said, having taken hold of the cup, he turns away. He murmurs as much as he can the formula, "May Iḍā who summons the Gods, Manu who leads the sacrifice, may Bṛhaspati recite the hymns and acclamations. Viśve Devas are the reciters of the hymns. O mother earth, do not harm me. I shall think of honey; I shall produce honey; I shall proclaim honey; I shall speak honey, may I utter speech full of honey for the gods and acceptable to men. May the gods aid me to radiance; may the Pitṛs rejoice in me."[1] The Hotṛ gives him a call; the Adhvaryu responds. The Hotṛ recites (the Ājyaśastra). (The Adhvaryu) utters the response (*Pratigara*). Whatever he recites in a low voice, the Adhvaryu responds in

2. TS.I.4.15.1
3. cf. TS.III.2.5.2

1. TS.III.3.2.1,2

एतमैन्द्राग्नं ग्रहम् । अनूद्यच्छन्ते नाराशंसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशंसाननुप्रकम्पयन्ति । एतत्पात्रं नाराशंसा अन्वायन्ति । अनुसवनभक्ष इन्द्राग्निभ्यां पीतस्येति । होता चैवाध्वर्युश्चैतत्पात्रं संभक्षयतो नराशंसपीतेन नाराशंसान्नराशंसपीतस्य सोम देव ते मतिविदः प्रातःसवनस्य गायत्रच्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्। हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । आप्याययन्ति चमसानाप्यायस्व समेतु त इति । सीदन्ति नाराशंसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो वैश्वदेवाय । अथ प्राडेत्य शुक्रपात्रमाददान आहोन्नेतर्यदेमं वैश्वदेवं ग्रहं गृह्णाम्यथोदञ्चं राजानं पूतभृतमभि संपवयताद्दशाभिर्द्रोणकलशं मृष्ट्वा न्युब्जतादिति । स तथा करोति । स शुक्रपात्रेण वैश्वदेवं कलशाद्गृह्णात्योमासश्चर्षणीधृत इत्यनुद्रुत्योपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इति । अथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते वैश्वदेवाय । होत्र एषोत्तमेति प्राहुः । होतुः कालात्पराङवर्तते ऽध्वर्युः । अभ्येनमाह्वयते होता । प्रत्याह्वयतेऽध्वर्युः । शंसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राडेत्योद्यच्छत एतं वैश्वदेवं ग्रहम् । अनूद्यच्छन्ते नाराशंसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशंसाननुप्रकम्पयन्ति । एतत्पात्रं नाराशंसा अन्वायन्ति । अनुसवनभक्षो विश्वैर्देवैः पीतस्येति । होता चैवाध्वर्युश्चैतत्पात्रं संभक्षयतो नराशंसपीतेन

a low voice. Whatever he recites loudly, the Adhvaryu responds loudly. Either continuously or with breaks. Having responded to the Śastra in the established manner, and having gone to the east, he lifts up the cup for Indra-Agni. (The Camasādhvaryus) lift up their respective Nārāśaṁsa goblets. The Adhvaryu causes to announce, "Do thou announce," "Let it be heard;" "O reciter of the śāstra, do you recite the yājyā for the Soma-offering." He makes the offering twice at the Vaṣaṭ and second Vaṣaṭ-utterance. Similarly (the Camasādhvaryus) shake the Nārāśaṁsa goblets twice. The Nārāśaṁsa goblets follow the cup. The Savanabhakṣa formula (viz. *mandrābhibhūtiḥ* TS III.2.5.1) following (the invocation of Iḍā) (is to be modified as) " ... consumed by Indra-Agni ...."[2] The Hotṛ and the Adhvaryu together consume this cup. (The relevant priests) consume the Nārāśaṁsa goblets with the Nārāśaṁsapīta formula, namely, "O God Soma, I, given consent, consume thee who art drunk by Narāśaṁsa, who knowest the mind, who belongest to the morning pressing, who hast Gāyatrī for thy metre, who art drunk by the Pitṛs, who hast sweetness and who art given consent."[2] The three priests (the Hotṛ, the Adhvaryu and the Pratiprasthātṛ) consume the Hotṛ's goblet after having obtained consent from each other. The priests concerned consume the goblets as the case may be. They touch, each one to himself, with the formula," Impel my limbs,,O thou with tawny steeds; do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis; do not go below my navel."[3] They swell the goblets with the verse, "O Soma, do thou swell, let thy strength be gathered from all sides. Do thou be in the gathering of strength."[3] The Nārāśaṁsa goblets which have been made to swell, lie, each one, below the rear part of the southern Havirdhāna cart for the offering to Viśve Devas.

Having gone towards the east, while taking up the Śukra cup, he says, "O Unnetṛ, when I take up the Vaiśvadeva cup, do thou pass king Soma towards the north into the Pūtabhṛt, and after having wiped the Droṇakalaśa by means of the fringes do thou place it with its mouth turned downwards." He does so, (The Adhvaryu) takes up Soma for the Viśve Devas into the Śukra cup from the Droṇakalaśa with the verse, "O you friends, guardians of men, Viśve Devas, do you come to the drink of the generous (sacrificer); O generous ones," joining to it the formula, "Thou art taken with a support, I take thee acceptable to Viśve Devas."[4] Having wiped it around, he places it with the formula, "This is thy birth-place; for Viśve Devas thee."[4] Having touched water, and having taken two darbha-blades, restraining speech and having gone towards the west, he introduces the stotra.

2. TS.III.2.5.1
3. TS.III.2.5.3
4. TS.I.4.16

नाराशꣳसान्नराशꣳसपीतस्य सोम देव ते मतिविदः प्रातःसवनस्य गायत्रच्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते। अथाह प्रतिप्रस्थातरिमे चर्तुपात्रे एतच्च शुक्रपात्रं मार्जालीये मार्जयित्वा पात्रेष्वपिसृजेति । स तथा करोति । अथ प्राञ्चयन्नाह ॥ १७ ॥

मैत्रावरुणस्य चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । मैत्रावरुण-चमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान् । समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । अथादत्त उक्थ्यस्थाल्या औपशयं पात्रम् । तस्मिन्नेतस्य राज्ञस्तृतीयवेलां गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतोऽसि देवेभ्यस्त्वा देवायुवमुक्थ्येभ्य उक्थायुवं यज्ञस्यायुषे मित्रावरुणाभ्यां त्वा

(The Udgātṛs) chant a Stotra for Viśve Devas. They say to the Hotṛ (at the proper moment), "This is the last (verse)." The Adhvaryu turns about in front of the Hotṛ. The Hotṛ gives him the call; the Adhvaryu responds. (The Hotṛ) recites (the Śastra for Viśve Devas). (The Adhvaryu) responds. Having responded to the Śastra in the established manner and having gone to the east, he takes the cup for Viśve Devas. (The Camasādhvaryus) follow by taking up the Nārāśaṁsa goblets. (The Adhvaryu) causes to announce; "Do thou announce;" "May it be heard;" "O reciter of the Śastra, do you recite the yājyā for (the offering of) the Soma." He makes the offering twice, at the Vaṣaṭ and second Vaṣaṭ utterance. Similarly (the Camasādhvaryus) follow by shaking the Nārāśaṁsa goblets twice.

The Nārāśaṁsa goblets follow the cup. The Savanabhakṣa formula (viz. *mandrābhibhūtiḥ*—TS III.2.5.1) following (the invocation of Iḍā) is to be modified as "... consumed by Viśve Devas.."[2] The Hotṛ and the Adhvaryu together consume the cup. (The relevant priests) consume the Nārāśaṁsa goblets with the Nārāśaṁsapīta formula, namely "O God Soma I, given consent, consume thee who art drunk by Nārāśaṁsa who knowest the mind, who belongst to the morning pressing, who hast Gāyatrī for thy metre, who art drunk by the Pitṛs, who hast sweetness and who art given consent."[2] The three priests (the Hotṛ, the Adhvaryu and the Pratiprasthātṛ) consume the Hotṛ's goblet after having obtained consent of each other. The priests concerned consume the goblets as the case may be. They touch, each one to himself, with the formula, "Impel my limbs, O thou with tawny steeds, do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis. Do not go below my navel."[3] They do not swell the goblets. Consuming in entirety, they sprinkle themselves, (The Adhvaryu) says, "O Pratiprasthātṛ, do thou mix with the cups the two Ṛtu-cups and the Śukra cup after having cleansed them on the Mārjālīya mound." He does so. Moving towards the east, he says:

VII.18

"(O Camasādhvaryus), do you fill in the goblets following the Maitrāvaruṇa's goblet; O Unnetṛ, do thou augment the Soma." Maitrāvaruṇa's goblet is filled in first, others as they like. After having filled in all of them, they place them on the Uttaravedi. (The Adhvaryu) takes up the cup lying near the Ukthya vessel. He takes in it the third part of the Soma contained in the Ukthya vessel with the formula, "Thou art taken with a support; I take thee acceptable to Maitrāvaruṇa, for gods, loving the gods, for the Ukthyas loving the praise for the long life of the sacrifice."[1] He touches back the Ukthya vessel with the formula, "Thou art a retaken oblation."[2]

1. cf MS I.3.14; KS IV.6, VSM VII.22-23
2. TS.VI.5.1.3

जुष्टं गृह्णामीति । पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति । परिमृज्य सादयत्येष ते योनिर्मित्रावरुणाभ्यां त्वेति । अथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । मैत्रावरुणा- यैषोत्तमेति प्राहुः । मैत्रावरुणस्य कालात्पराङावर्तते ऽध्वर्युः । अभ्येनमाह्वयते मैत्रावरुणः । प्रत्याह्वयते ऽध्वर्युः । शंसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं ग्रहम् । अनूद्यच्छन्ते चमसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति। तथैव द्विर्द्विः सर्वांश्चमसाञ्जुह्वति । अथ प्रदक्षिणमावृत्य मैत्रावरुणस्य चमसे ग्रहस्य संस्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वा । अत्रैवैतत्पात्रमुपनिधाय भक्षैः प्रत्यञ्च आद्रवन्ति । अनुसवनभक्षो मित्रावरुणाभ्यां पीतस्येति । मैत्रावरुणचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते । अथाह प्रतिप्रस्थातर्ग्रहौ ते प्रचरेति । तच्छ्रुत्वा प्रतिप्रस्थाता प्राङयन्नाह ॥ १८ ॥

ब्राह्मणाच्छंसिनश्चमसमनून्नयध्वमुन्नेतः सोमं प्रभावयेति । ब्राह्मणाच्छंसिनश्चमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान् । समुन्नी- योत्तरवेद्यां संसादयन्ति । अथादत्त उक्थ्यस्थाल्या औपशयं पात्रम् । तस्मिन्नेतस्य राज्ञो ऽर्धवेलां गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थ्येभ्य उक्थायुवं यज्ञस्यायुष इन्द्राय त्वा जुष्टं

Having wiped around, he places (the cup) with the formula, "This is thy birth-place; for Mitra-Varuṇa thee."[3] Having touched water, and having taken two darbha-blades, having restrained speech and having hastened to the west, he introduces the Stotra. (The Udgātṛs) chant the Stotra. They announce to the Maitrāvaruṇa (at the proper time) "This is the last (verse)." The Adhvaryu turns about in front of the Maitrāvaruṇa. The Maitrāvaruṇa calls him out. The Adhvaryu responds to the call. (The Maitrāvaruṇa) recites the Śastra. (The Adhvaryu) responds. Having responded to (the recitation of) the Śastra in the prescribed manner and having moved towards the east, he lifts up the cup. (The Adhvaryu causes to announce "Do thou announce," "May it be heard;" "O reciter of the Sástra, do you recite the yājyā for the offering of the Somas." He makes the offering twice at the Vaṣaṭ and second Vaṣaṭ-utterance. Similarly (the Çamasādhvaryus) offer goblet twice.

Having turned by the right, he pours the remnants of the cup into the Maitrāvaruṇa's goblet with the formula, "Offered, I pour thee into that which is offered, granting vigour to gods and sweet for men" or silently. Having kept the cup there only, they hasten to the west together with the draught. The Savanabhakṣa formula following (the invocation of Iḍā) is "... drunk by Mitra-Varuṇa ...." These three (namely, the Maitrāvaruṇa, the Adhvaryu and the Pratiprasthātṛ) çonsume the Maitrāvaruṇa's goblet by obtaining the consent of each other. The priests concerned consume the goblets as the case may be. They touch, each one to himself, with the formula, "Impel my limbs, O thou with tawny steeds, do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis. Do not go below my navel."[3] They do not swell the goblets. Consuming the goblets in entirety, they sprinkle themselves. Then (the Adhvaryu) says, "O Pratiprasthātṛ, do you offer your two cups." Listening to this, the Pratiprasthātṛ, moving eastwards, says:

VII.19

"O Camasādhvaryus), do you fill in your goblets subsequent to the Brāhmaṇācchaṁsin's goblet; O Unnetṛ do thou augment the Soma." The Brāhmaṇācchaṁsin's goblet is filled in first. The others as they like. After having filled all of them, they place them on the Uttaravedi. (The Pratiprasthātṛ) takes up the cups lying near the Ukthya vessel. In it he takes up half of the Soma which is contained in the Ukthya vessel with the formula, "Thou art taken with a support; I take thee agreeable to Indra, for gods thee, loving the gods, for Ukthyas thee, loving the praise for long life of the sacrifice."[1] He touches back the Ukthya vessel

3. TS.III.2.5.3

1. cf MS I.3.14; KS IV.6; VSM VII 22-23

गृह्णामीति । पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वेति । अथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । ब्राह्मणाच्छꣳसिन एषोत्तमेति प्राहुः । ब्राह्मणाच्छꣳसिनः कालात्पराङवर्तते प्रतिप्रस्थाता । अभ्येनमाह्वयते ब्राह्मणाच्छꣳसी । प्रत्याह्वयते प्रतिप्रस्थाता । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राडेत्योद्यच्छत एतं ग्रहम् । अनूद्यच्छन्ते चमसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वति । अथ प्रदक्षिणमावृत्य ब्राह्मणाच्छꣳसिनश्चमसे ग्रहस्य सꣳस्त्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वा । अत्रैवैतत्पात्रमुपनिधाय भक्षैः प्रत्यञ्च आद्रवन्ति । अनुसवनभक्ष इन्द्रेण पीतस्येति । ब्राह्मणाच्छꣳसिनश्चमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते । अथ प्राङायन्नाह ॥ १९ ॥

अच्छावाकस्य चमसमनून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिचः प्रतिप्रस्थातरुपैतेन ग्रहेण रमैहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्याथैतच्चर्म फलकयोः प्राचीनग्रीवमुत्तरलोमोपस्तृणाति यज्ञ प्रतितिष्ठेति वा तूष्णीं वा । तस्मिन्संमुखान्ग्राव्णः कृत्वा दक्षिणस्य हविर्धानस्यान्तरेणेषे राजानमुपावहरति हृदे त्वा मनसे त्वा सोम

with the formula, "Thou art a retaken oblation."[2] Having wiped around, he places it with the formula, "This is thy birth-place; for Indra thee."[3] Having touched water, having taken two darbha-blades, having restrained speech and having hastened to the west, he introduces the Stotra. The Udgātṛs chant the Stotra. They announce to the Brāhmaṇācchaṁsin (at the proper time) "This is the last (verse)." From the spot in the front of the Brāhmaṇācchaṁsin the Pratiprasthātṛ turns about. The Brāhmaṇācchaṁsin gives him a call. The Pratiprasthātṛ responds to the call. (The Brāhmaṇācchaṁsin) recites the Śastra. (The Pratiprasthātṛ) responds (to the recitation). Having responded in the prescribed manner and having gone to the east, he lifts up the cup. (The Camasādhvaryus) lift up their goblets subsequently. (The Pratiprasthātṛ) causes to announce, "Do thou announce," "May it be heard;" "O reciter of the Śastra, do you recite the yājyā for the offering of the Somas." He offers twice at the Vaṣaṭ and second Vaṣaṭ-utterance. Similarly they offer the goblets twice.

Having turned by the right, he pours down the remnants of the cup into the Brāhmaṇācchaṁsin goblet with the formula, "I pour down thee the offered into the offered, granting vigour to the gods and yielding honey to men" or silently. Having kept down the cup there only, they hasten to the west together with the consumable portions. The Savanabhakṣa formula to be recited subsequent to (the invocation of Iḍā) is "... drunk by Indra ..." These three (namely, the Brāhmaṇācchaṁsin, the Adhvaryu and the Pratiprasthātṛ) consume the Brāhmaṇācchaṁsin's goblet by obtaining the consent of each other. (The Camasins) consume the goblets as the case may be. They touch back, each one to himself, with the formula, "Impel my limbs. O thou with tawny steeds, do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis. Do not go below my navel."[3] They do not swell the goblets. Consuming the entire quantity, they sprinkle themselves. Going towards the east, he says:

VII.20

"O Camasādhvaryus), do you fill in the goblets following the Acchāvāka's goblet; O Unnetṛ, do thou take up the Soma in full; do not leave any balance. O Pratiprasthātṛ, do you stop with this cup; come O sacrificer." Having led him into the Havirdhāna shed by the eastern door, the Adhvaryu spreads the skin over the two planks with its neck towards the east and the hairy side upwards, with the verse, "O sacrifice, do thou, very gracious, be firm in thy favour. May the riches enter thee on all sides. Giving long life to the sacrificer, do thou anoint the worshipper with

2. TS. VI.5.1.3
3. TS.III.2.5.3

राजन्नेह्यवरीहेति द्वाभ्याम् । अथैनमुद्गातृभ्यः प्राहुस्तस्मिꣳस्तच्चेष्टन्ति यत्ते विदुः । अथोदुब्ज्याधवनीयमर्धं वसतीवरीणामवनयति । अर्धमेकधनानाम् । पुरोऽक्षं वसतीवरीः सादयति । पश्चादक्षमेकधनान् । अच्छावाकचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान् । सर्वश एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । अथादत्त उक्थ्यस्थाल्या औपशयं पात्रम् । तस्मिन्नेतꣳ सर्वश एव राजानं गृह्णाति य उक्थ्यस्थाल्यां भवत्युपयामगृहीतो ऽसि देवेभ्यस्त्वा देवायुवमुक्थ्येभ्य उक्थायुवं यज्ञस्यायुष इन्द्राग्निभ्यां त्वा जुष्टं गृह्णामीति । नात्र पुनर्हविरसीत्युक्थ्यस्थालीं प्रत्यभिमृशति । दशाभिरेवैनां मृष्ट्वा न्युब्जति । परिमृज्य सादयत्येष ते योनिरिन्द्राग्निभ्यां त्वेति । अथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते । अच्छावाकायैषोत्तमेति प्राहुः । अच्छावाकस्य कालात्पराङवर्तते प्रतिप्रस्थाता । अभ्येनमाह्वयतेऽच्छावाकः । प्रत्याह्वयते प्रतिप्रस्थाता । शꣳसति । प्रतिगृणाति। प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं ग्रहम्। अनूद्यच्छन्ते चमसान्। अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वति । अथ प्रदक्षिणमावृत्याच्छावाकस्य चमसे ग्रहस्य सꣳस्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वा । अत्रैवैतत्पात्रमुपनिधाय

ambrosia,"[1] or silently. Having placed upon it the pressing stones facing each other, he brings down Soma inbetween the poles of the southern Havirdhāna cart with the two formulas, "For heart thee, for intellect thee, for heaven thee, for the sun thee. Raise aloft the sacrifice; carry the invokings unto the gods in the heaven—O king Soma, come hither, descend. Do not fear, do not tremble; let me not injure thee; do thou descend upon the offspring; let the offspring descend upon thee."[2] It is announced to Udgātṛs. They act in regard to it as they are aware. Having turned the Ādhavanīya jar with its mouth upwards, he pours into it half the quantity of the Vasatīvarī water; half of the Ekadhana pitchers. He places (the remaining) Vasatīvarī in front of the axle (of the southern Havirdhāna cart); the Ekadhana pitchers to its rear. The Acchāvāka's goblet is filled in first; others as one likes. Having filled in the entire quantity of Soma, they place (the goblets) on the Uttaravedi. Then he takes the cup lying near the Ukthya vessel. He takes in it the entire quantity which is remaining in the Ukthya vessel, with the formula, "Thou art taken with a support; I take thee agreeable to Indra-Agni, for gods loving the gods, for Ukthyas loving the praise for the long life of sacrifice." He does not touch back the Ukthya vessel with the formula, "Thou art a retaken oblation." Having wiped it with fringes, he keeps it upside down. Having wiped it around, he places it with the formula, "This is thy birth-place; for Indra-Agni thee." Having touched water, having taken two darbha-blades, having restrained speech and having hastened to the west, he introduces the Stotra. The Udgātṛs chant the Stotra. They say to Acchāvāka (at the proper time), "This is the last (verse)." The Pratiprasthātṛ turns about from the place in front of the Acchāvāka. The Acchāvāka gives out a call to him. The Pratiprasthātṛ responds to the call. (The Acchāvāka) recites the Śastra. (The Pratiprasthātṛ) responds to the recitation. Having responded to the Śastra in the prescribed manner, and having gone to the east, he lifts up the goblet. The goblets are lifted up following it. The Pratiprasthātṛ causes to announce: "Do thou announce;" "May it be heard;" "O reciter of the Śastra, do you recite the yājyā (for the offering) of the Somas." He offers twice at the Vaṣaṭ and the second Vaṣaṭ-utterance. Similarly (the Camasādhvaryus) offer all the goblets twice.

Having turned by the right, (the Pratiprasthātṛ) pours down the remnants in Acchāvāka's goblet with the formula, "I pour thee the offered into the offered, granting vigour to the gods and yielding into the offered, granting vigour to the gods and yielding honey for men" or silently. Having kept down the cup there only, they move towards the west together with the consumable Somas. The Savanabhakṣa

1. TBr. II.5.8.12
2. TS I.3.13.1

भक्षैः प्रत्यञ्च आद्रवन्ति । अनुसवनभक्ष इन्द्राग्निभ्यां पीतस्येति । अच्छावाकचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते । अथोक्थशा इत्याह प्रातःसवनं प्रतिगीर्य । प्रशास्तः प्रसुहीति। सर्पतेत्याह प्रशास्ता । संतिष्ठते प्रातःसवनम् ॥ २० ॥ पञ्चमः ॥

॥ इति सप्तमः प्रश्नः ॥

formula following (the invocation of Iḍā) is "...drunk by Indra-Agni ...." The three (namely, the Acchāvāka, the Adhvaryu and the Pratiprasthātṛ) consume Acchāvāka's goblet, after having obtained the consent of each other. (The Camasins consume) their respective goblets. They touch, each one himself, with the formula, "Impel my limbs, thou with tawny steeds; do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis; do not go below my navel."[3] The goblets are not swollen. Consuming the entire quantity, they sprinkle themselves. He says, "O reciter of the Śastra," after having responded to the recitations in the morning pressing. (He also says) "O Praśātṛ, do thou impel." "Do you disperse," says the Praśastṛ.

The morning pressing comes to an end.

CHAPTER VII ENDS.

3. TS III.2.5.3.

प्रसर्पन्ति माध्यंदिनाय सवनाय देवी द्वारावित्यत एवोर्ध्वेन । संप्रसृप्तान्विदित्वाध्वर्युः प्राडयन्नाहाभिषोतार एत ह्वयत ग्रावस्तुतमेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य होतृचमसे वसतीवरीभ्यो ऽध्यपो निःषिच्य तासु तथैव निग्राभ्यासु यजमानं वाचयति । तास्तथैव यजमानाय संप्रदाय ग्रावाणमादत्ते ऽन्यमुपांशुसवनात्तं तथैव प्राञ्चं प्रश्रित्य विस्रस्य राजान ग्रावाणमभि भिमीत इन्द्राय त्वेन्द्राय त्वेति । पञ्चकृत्वो यजुषा पञ्चकृत्वस्तूष्णीम् । दशकृत्वो मिमानः सर्वश एव राजानं मिमीते । अद्भिरभ्युक्ष्य ग्रावस्तुत उष्णीषं प्रयच्छति । अद्भिरेवाभ्युक्ष्याध्वर्योरावसथं वासो हरन्ति । तथा मितं राजानं होतृचमसीयाभिरुपसृजति । तथा संप्रयौति । तथा तिरश्चर्मन्फलके अभिमृशति । तथा वृद्धीर्वाचयति । नात्रांशून्सचते । घोषवन्त एवाभिषुण्वन्तीहा३ इहा३ इहेति । तदेव सद्विनयन्तीहा३ इह इहा३ इह इहा३ इहेति । अथ संभरणीये निष्क्रीडयन्तीहा३ इहा३ इहेति । अथैनं सुसंभृतं संभरण्यां संभृत्योन्नेत्र उत्प्रयच्छति । तमुन्नेताधवनीये ऽवनयति। एवमेव द्वितीयः पर्यायः संतिष्ठते । एवं तृतीयः । तृतीयस्य तृतीये बृहदुपयन्ति बृहद्बृहद्बृहदिति । ऋजीषमन्ततो दशापवित्रेण परिवेष्ट्योन्नेत्र उत्प्रयच्छति । तदुन्नेताधवनीये विक्षाल्य प्रपीड्य दक्षिणस्य हविर्धानस्यान्तरेणेषे उपावहृत्य चर्मणि निदधाति । तस्मिंस्तथैव संमुखान्ग्राव्णः कृत्वा चतुर्धैतदृजीषं ग्रावमुखेभ्यो व्यपोहति । तथोद्गाता वा प्रस्तोता वा दक्षिणस्य हविर्धानस्य पश्चादक्षमुपसृप्य प्राञ्चं ग्रावसु द्रोणकलशमध्यूहति । तस्मिंस्तथैवोदीचीनदशं दशापवित्रं वितत्य प्रसिद्धं शुक्रामन्थिनौ ग्रहौ गृह्णाति । अथर्तुपात्राभ्यां द्वौ मरुत्वतीयौ ग्रहौ गृह्णाति ॥ १ ॥

CHAPTER - VIII
MIDDAY PRESSING
VIII.1

They proceed to the Midday pressing, with the formulas beginning with "O divine doors, do you not torment me."[1] Knowing that the priests had entered the Sadas, the Adhvaryu, going towards the east, says, "O Soma-pressers, do you come, call out the Grāvastut priest, come O sacrificer." Having made him enter the Havirdhāna shed and having poured water into the Hotṛ's goblet from the Vasatīvarī water, he causes the sacrificer to recite the formulas similarly while the water is being rendered Nigrābhya.[2] Having handed over that water to the sacrificer similarly,[2] he takes up a pressing stone other than the Upāṁśusavana. Having placed it in the eastern part of the skin similarly,[2] having loosened Soma, he measures it by the side of the pressing stone with "For Indra thee; for Indra thee." Five times with this formula, five times silently. Measuring ten times, he measures Soma in full. Having sprinkled with water, he gives the turban to the Grāvastut. Having been sprinkled with water, the piece of cloth is carried to the Adhvaryu's home. He similarly[3] mixes the measured Soma with water from the Hotṛ's goblet. He stirs it similarly.[3] He similarly[3] touches the two planks across the skin similarly.[3] He similarly[3] makes the sacrificer recite the Vṛddhi formulas. (The Pratiprasthātṛ) does not clasp the *ihā3 ihā3*. Then they modify that very utterance as *ihā3 iha ihā3 iha ihā3 iha*. They toss the pressing stones over the pressing tub with *ihā3 ihā3 ihā3*. Having collected the well-extracted juice into the pressing tub, he hands it over to the Unnetṛ. The Unnetṛ pours it into the Ādhavanīya jar. The second round is concluded similarly. The third round is concluded similarly. At the third turn of the third round, they utter "Ample, ample."

Having finally covered the residue of Soma with the woollen filter, he hands it over to the Unnetṛ. The Unnetṛ, having washed it into the Ādhvanīya jar and having squeezed and having taken it down in between the two poles of the southern Havirdhāna cart, places it on the skin. Having similarly[3] placed upon it the pressing stones facing each other, he distributes the residue in four parts and places on the mouths of the stones. The Udgātṛ or Prastotṛ, having reached the rear of the axle of the southern Havirdhāna cart, similarly[3] places upon the pressing stones the Droṇakalaśa facing east. Having similarly[3] extended over it the woollen filter with its fringes towards the north, he takes up the Śukra and Manthin cups in the established manner. In the Ṛtu-cups he takes two Marutvatīya draughts.

1. TS.III.2.4.4
2. cf BaudhŚS VII.5; f.n. I and 2
3. With the prescribed formula cf BaudhŚS VII.5.

मरुत्वन्तं वृषभं वावृधानमिन्द्र मरुत्व इह पाहि सोममिति द्वाभ्याम्। अथोपरिष्टादाग्रयणमानीयाधस्तादुपगृह्णाति । तं तथैव त्रिरभिहिङ्कृत्य परिमृज्य सादयति । तथोक्थ्यं गृह्णाति । उक्थ्येन राजानं परिदधाति । तथोपर्यर्धे द्रोणकलशे परिप्लु पात्रं प्रास्य द्रप्साननुमन्त्रयते द्रप्सश्चस्कन्द यस्ते द्रप्सो यो द्रप्सो यस्ते द्रप्स इति । तथोन्नेतारमाहारिक्तं पूतभृतं कुरु पवमानस्य ग्रहान्ग्रहीष्यामीति । तथारिक्ते पूतभृति पवमानस्य ग्रहान्गृह्णात्युपयामगृहीतो ऽसीन्द्राय त्वेति द्रोणकलशमभिमृशति ।इन्द्राय त्वेत्याधवनीयम् ।इन्द्राय त्वेति पूतभृतम् । तथोन्नेतरित्याह प्राञ्चꣳ राजानं पूतभृतमभि संपवयनाद्दशाभिराधवनीयं मृष्ट्वा न्युब्जतादिति । स तथा करोति । तथाप उपस्पृश्य बर्हिषी आदायोपनिःसर्पति । तेषु तथैव समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति । विश्वे देवा मरुत इन्द्रो अस्मानस्मिन्द्वितीये सवने न जह्युः । आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानाꣳ सुमतौ स्याम स्वाहेत्येतयाध्वर्यू जुहुतः । यथावेदमितरे जुह्वति। अथ प्रदक्षिणमावृत्य सदो ऽभि पवमानꣳ सर्पन्ति । तथा सदसि

VIII.2

With the two verses; "Let us invoke for help him, accompanied by the Maruts, the mighty bull, the bountiful, the divine ruler Indra, all-powerful, the dreadful, giver of strength. Thou art taken with a support; for Indra with Maruts thee."[1]—"O Indra, accompanied by Maruts, do thou drink here the Soma as thou didst drink the pressed drink with Śāryāta. O hero, under thy guidance, in thy protection, the singers, skilled in sacrifice are fain to serve. Thou art taken with a support; for Indra with Maruts thee."[2] Having poured Soma from the Āgrayaṇa vessel from above (that is, in the woolen filter), he takes it below (in the cup). Having similarly[3] uttered *him* thrice, and having wiped around, he places it. Similarly he takes up the Ukthya vessel. He concludes the taking up of Soma with the Ukthya. Having thrown the drawing spoon into the Droṇakalaśa which is filled more than half, he follows the drops (falling out) with the four verses, "The drop has fallen on the earth; it proceeds along the heaven, this region (i.e. the midregion) and the former one (i.e. the earth). I offer this drop which proceeds upto the third place of the seven places of offering (that is, the Dhiṣṇiya mounds in the Sadas)."[4]—"O Soma that drop of thine, that shoot of thine which has fallen shaken by the arms from the womb of the pressing boards or from the woollen filter of the Adhvaryu. I offer to Indra to the accompaniment of Svāhā-utterance."[4]—"The drop, the shoot that has fallen on the ground from the roasted grains, the cake, the dough of the flour of parched barley, the Soma mixed with roasted grains, the Manthin, the Śukra, I offer it to Indra to the accompaniment of Svāhā - utterance."[4]—"That sweet and strong drop of thine which goes to the gods to the accompaniment of Svāhā-utterance from the heaven, the earth and the midregion.... I offer it to Indra to the accompaniment of Svāhā-utterance."[4] Similarly[3] he says to the Unnetṛ, "Do thou render the Pūtabhṛt jar non-empty; I shall (formally) take up the Pavamāna Grahas." While thus the Pūtabhṛt has been rendered non-empty, he takes the Pavamāna Grahas: with the formula, "Thou art taken with a support; for Indra thee" he touches the Droṇakalaśa. The Ādhavanīya jar with the formula, "For Indra thee." The Pūtabhṛt jar with the formula, "For Indra thee." Similarly[3] he says to the Unnetṛ, "Do thou purify the Soma towards the east into the Pūtabhṛt jar, having cleansed the Ādhvanīya by means of the fringes put it upsidedown." He does so. Similarly[3] having touched water and having taken two darbha-blades he moves out. When they have similarly[3] contacted one to the other, he offers a spoonful on the

1. TS.I.4.17
2. TS.1.4.18
3. cf. BaudhŚS VII.7
4. TS.III.1.8.3-4

यथायतनमुपविशन्ति । तथोद्गात्रे वा प्रस्तोत्रे वा बर्हिषी प्रयच्छत्यूक्सा-मयोरुपस्तरणमसि मिथुनस्य प्रजात्या इति वा तूष्णीं वा । तथोपाकरणं जपति वायुर्हिङ्कर्तेति । स एष पञ्चदशो माध्यंदिनः पवमानो भवति । तस्याष्टम्यां प्रस्तुतायां वाचयति सुपर्णो ऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा संपारयेति । अत्र चतुर्होतारं व्याचष्टे । उद्द्रुते साग्नि संप्रैषमाहाग्नीदग्नीन्विहर बर्हि स्तृणाहि पुरोडाशाꣳ अलंकुरु प्रति-प्रस्थातर्दधिघर्माय दध्याहरेति । यथासंप्रैषं तौ कुरुतः । तथाप उपस्पृश्याहैहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य तथा समस्तꣳ राजानमुप-तिष्ठते । तथावकाशैश्चरति । तथा प्रचरण्यां नवकृत्वो गृह्णीते । तथैष आग्नीध्र आग्नीध्रीयाद्धिष्णियादनुपूर्वं धिष्णियेष्वङ्गारान्विहरति । तथा पुरस्तात्प्रत्यङ्ङासीनो विहृतान्धिष्णियान्व्याघारयति । तथोत्तरस्य हविर्धानस्य चुबुके प्रचरणीꣳ सादयति । तथा सांकाशिनेन पथा पृष्ठ्याꣳ स्तृणाति संततां गार्हपत्यादाहवनीयात् ॥ २ ॥

Āhavanīya. The Adhvaryu and the Pratiprasthātṛ each offer with the verse, "May Viśve Devas, Maruts, Indra not leave us at the midday pressing. Long-lived, speaking what is pleasing to them, may we enjoy the favour of the gods, Svāhā."[5] Others make the offering following their Veda.

Having turned by the right, they move towards the Sadas for the (Mādhyandina) Pavamāna stotra. Similarly[6] they sit down in the Sadas on their respective seats. Similarly[7] (the Adhvaryu) gives the two darbha-blades either to the Udgātṛ or to the Prastotṛ with the formula, "Thou art the spreading for Ṛk and Sāman for the procreation by the couple."[8] or silently. Similarly[7] he murmurs the introducing formula, "The *hiṁ*-sound-maker is Vāyu; the Prastotṛ is Agni; the Sāman is Prajāpati. The Udgātṛ is Bṛhaspati, the Upagātṛs are Viśve Devas; the Pratihartṛs are Maruts, the end of Sāman is Indra; may the gods, possessors of vital breath, give me vital breath."[9] The Mādhyandina Pavamānastotra is characterised by fifteen stomas. When the eighth verse is being chanted, he makes the sacrificer recite the formula, "Thou art an eagle with Triṣṭubh for thy metre; I touch thee; lead me safely."[10] At this stage he recites the Caturhotṛ formula. After the Sāman has been chanted, he gives out the call, "O Agnīdh, do thou spread the fires; spread the sacrificial grass, accomplish the Puroḍāśas; O Pratiprasthātṛ, do you bring curds for the Dadhigharma offering." They act as per the call. Having touched water similarly,[7] he says, "Come, O sacrificer." After he has been made to enter the Havirdhāna shed by the eastern door, the sacrificer similarly[7] prays to the entire Soma with the verse, "O conquering Viṣṇu, do thou, nearest to us, grant us shelter. The sweet-flowing streams milk out for thee the unceasing spring."[11] (The Adhvaryu) similarly[7] prays with the Avakāśa formulas. Similarly[7] he takes nine spoonfuls in the ladle in use. Similarly,[7] the Āgnīdhra spreads embers procured from the Āgnīdhrīya mound successively on the Dhiṣṇiyas. Similarly[7] he pours Āghāra-libations on the Dhiṣṇiyas on which embers have been spread while being seated towards the east and facing the west. Similarly[7] he places the ladle in use on the chin of the northern Havirdhāna cart. Similarly[7] along the path involving simultaneous sight, he strews the Pṛṣṭhyā line uninterruptedly from the Gārhapatya upto the Āhavanīya.

5. TS.III.1.9.2
6. cf. BaudhŚS VII.11
7. cf. BaudhŚS VII.8
8. The source of this formula is not known
9. TS. III.3.2.1
10. TS.III.2.1.1
11. TS.III.1.10.2

अथान्तरेण हविर्धाने उपविश्य दधिघर्माय दधि याचति । तदाहृतमवेक्षते ज्योतिरसि वैश्वानरं पृश्नियै दुग्धमिति । बर्हिषी अन्तर्धाय कꣳसे वा चमसे वा गृह्णाति यावती द्यावापृथिवी महित्वा यावच्च सप्त सिन्धवो वितस्थुः । तावन्तमिन्द्र ते ग्रहꣳ सहोर्जा गृह्णाम्यस्तृतमिति । अपोद्धृत्य बर्हिषी अथैनꣳ श्रीणाति वाक् च त्वा मनश्च श्रीणीतां प्राणश्च त्वापानश्च श्रीणीतां चक्षुश्च त्वा श्रोत्रं च श्रीणीतां दक्षश्च त्वा बलं च श्रीणीतामोजश्च त्वा सहश्च श्रीणीतामायुश्च त्वा जरा च श्रीणीतामात्मा च त्वा तनूश्च श्रीणीताꣳ शृतो ऽसि शृतंकृतः शृताय त्वा शृतेभ्यस्त्वा शृतं कृण्विति । अथाह होतर्वदस्व यत्ते वाद्यमिति । अथैनमादायोपोत्तिष्ठन्नाह श्रातꣳ हविरिति । अत्याक्रम्याश्राव्याह दधिघर्मस्य यजेति । वषट्कृते जुहोति यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः । यो देवानां देवतमस्तपोजास्तस्मै त्वा तेभ्यस्त्वा स्वाहेति । अनुवषट्कृते हुत्वा हरति भक्षम् । स यावन्तः प्रवर्ग्यस्यर्त्विजस्तेषूपहवमिष्ट्वा यजमान एव प्रत्यक्षं भक्षयति मयि त्यदिन्द्रियं महन्मयि दक्षो मयि क्रतुः । मयि धायि सुवीर्यं त्रिशुग्घर्मो विभातु मे ॥ आकूत्या मनसा सह विराजा ज्योतिषा सह । यज्ञेन पयसा सह ब्रह्मणा तेजसा सह । क्षत्रेण यशसा सह सत्येन तपसा सह। तस्य दोहमशीमहि तस्य सुम्नमशीमहि । तस्य भक्षमशीमहि तस्य त इन्द्रेण पीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । निर्णिज्य पात्रं प्रयच्छति। तथा सवनीयान्पुरोडाशान्याचति । तेषां तथैव समवद्यन्नाह माध्यंदिनस्य सवनस्येन्द्राय पुरोडाशानामवदीयमानानामनुब्रूहीति । पूर्वार्धादवदाया- परार्धादवद्यति । अभिघारयति । प्रत्यनक्ति । तथोपभृति स्विष्टकृते सर्वे-

VIII.3

Being seated between the two Havirdhāna carts, (the Adhvaryu) asks for curds for the Dadhigharma offering. He gazes at it when brought with the formula, "Thou art the lustre of Vaiśvānara, the milk of the spotted cow." Having held two darbha-blades in between, he takes it into a bronze vessel or a goblet with the verse, "As great as are heaven and earth in mightiness, as great as the expanse of the seven rivers, so great is the cup of thee, O Indra, which, unvanquished, I draw with strength."[1] Having removed the darbha-blades, he puts it over the fire with the formula, "May speech and mind boil thee; may Prāṇa and Apāna boil thee; may eye and ear boil thee, may power and might boil thee; may vigour and endurance boil thee; may long life and old age boil thee; may soul and body boil thee. Thou art become hot; made to be hot; for the hot thee; for the hot ones thee."[2] Then he says, "O Hotṛ do you recite what you have to." Having taken hold of him and standing, he says, "The oblation is boiled." Having crossed beyond and having caused to announce, he says (to the Hotṛ), "Do you recite the yājyā for the offering of Dadhigharma." At the Vaṣaṭ-utterance he makes the offering with the verse, "Him whom they call Indra, him whom they call Varuṇa, him whom they call Mitra, him whom they call the truth, who is the greatest god among the gods, born of penance for him thee, for them thee, Svāhā."[2] After having made (another) offering at the second Vaṣaṭ-utterance, he carries the portion for consuming. Having sought consent of as many priests as there are in the Pravargya rite, the sacrificer himself consumes it with the mantra, "That great strength, the power, the intention, great valour has been placed within me. May the threefold heat shine within me. May we enjoy its essence together with oblation and milk, together with Brahman-splendour and brilliance together with ruling capability and glory, together with truth and heat. May we enjoy its pleasure. May we enjoy its consuming. I, who have obtained consent, consume thee that art consumed by Indra, sweet, and for whom consent has been obtained."[3] Having cleansed the cup he hands it over.

In a similar manner[4] he asks for Savanīyapuroḍāśas. Taking portions of all of them in a similar manner[4] he says (to the Maitrāvaruṇa), "Do you recite the puronuvākyā for the Puroḍāśas being apportioned for Indra at the Midday pressing." Having taken portion from the eastern half, he takes from the rear half; pours clarified butter over it, anoints back the oblations from which he took the portions. Similarly he takes portions once into the Upabhṛt from the northern halves of all oblations for the Sviṣṭakṛt offering. He pours clarified butter twice over

1. TS.III.2.6.1
2. TBr. III.7.9.3
3. TBr. III.7.9.4
4. cf. BaudhŚS VII.12

षाः सकृत्सकृदुत्तरार्धादवद्यति । द्विरभिघारयति । न प्रत्यनक्ति । अत्याक्रम्याश्राव्याह माध्यंदिनस्य सवनस्येन्द्राय पुरोडाशान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति । तथा समावपमान आहाग्नये ऽनुब्रूहीति । आश्राव्याहाग्नये प्रेष्येति । वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोति । तथोदङ्ङत्याक्रम्य यथायतनः स्रुचौ सादयित्वा तथैव पात्र्यामिडाः समवधाय प्रतीचः पुरोडाशान्प्रहिणोति । अनु हैके संयन्ति पशव इडेति वदन्तः । अथ प्राडयन्नाहोत्रीयमानेभ्यो ऽनुब्रूहि ॥ ३ ॥

होतुश्चमसमनून्नयध्वमुभयतःशुक्रान्कुरुध्वमच्छावाकस्य चमसाध्वर्यो ऽपि त्वमुन्नयस्व प्रतिप्रस्थातश्चतुर्भिर्मा शकलैः प्रोक्षिताप्रोक्षितैः प्रत्युपलम्बस्वेति । यथासंप्रैषं ते कुर्वन्ति । समानं कर्माश्रावणात् । आश्रावण एव व्येति । अथाध्वर्युः पुरस्तात्प्रत्यङ् तिष्ठन्नाश्रावयत्यो श्रावयास्तु श्रौषण्माध्यंदिनस्य सवनस्य निष्केवल्यस्य भागस्य शुक्रवतो मन्थिवतो मधुश्चुत इन्द्राय सोमान्प्रस्थितान्प्रेष्येति । वषट्कृते सहोभौ जुहुतः स प्रथमः संकृतिर्विश्वकर्मेति । वषट्कृतानुवषट्कृते द्विर्जुहुतः । तथैव द्विर्द्विः सर्वांश्चमसाञ्जुह्वति । तथा संप्रैषमाह प्रैतु होतुश्चमसः प्र ब्रह्मण इति । तथा प्रदक्षिणमावृत्य होतृचमसे ग्रहस्य संस्रावमवनयति हुतं त्वा हुते ऽवनयाम्यूर्जस्वन्तं देवेभ्यो मधुमन्तं मनुष्येभ्य इति वा तूष्णीं वा । तथा प्रतिप्रस्थातोत्तरार्ध आहवनीयस्य मन्थिनः संस्रावं जुहोति । तथाप उपस्पृश्य शुक्रपात्रं च मन्थिपात्रं च खरे यथायतनः सादयति ।

goblet he places three pieces of puroḍāśa; nine with reference to Hotṛ's goblet. Each of the priests follows them from his own place with the formula, "O Pitṛs, do you rejoice here as per your share."[8] At this juncture, the sacrificer consumes (the remaining portions of) Savanīya Puroḍāśas. The sacrificer's wife eats whatever she usually eats in her chamber.

VIII.13

Moving towards the east (the Adhvaryu) says, "(O Maitrāvaruṇa) do you recite the puronuvākyā for God Savitṛ, O Pratiprasthātṛ, do you be by my side having taken the draught for Savitṛ in the Antaryāma cup from the Āgrayaṇa vessel; do not put it down." Having listened to it, the Pratiprasthātṛ takes up the draught of Soma into the Antaryāma cup from the Āgrayaṇa vessel with the verse, "Prosperity today O Savitṛ, prosperity tomorrow; mayest thou procure prosperity for us day by day. Through this prayer may be won the prosperity of many prosperous dwellings, O God."[1] Having gone through this (verse) (he further recites) "Thou art taken with a support; I take thee agreeable to God Savitṛ,"[1] "He does not keep it down" - so the Brāhmaṇa says.[2] Without keeping it down, having gone out and having caused to announce, he says (to the Maitrāvaruṇa), "Do you address a call (to the Hotṛ to recite the yājyā) for God Savitṛ." He makes the offering at the Vaṣaṭ-utterance. It is indeed said, "He takes a draught for Viśve Devas in the Savitṛ's cup[3] from the (Pūtabhṛt) jar....; he takes up Soma over Soma."[4] He takes a draught for Viśve Devas in the Savitṛ's cup[3] from (the Pūtabhṛt) jar; (thus) he takes Soma over Soma with the formula, "Thou art taken with a support; thou art having great welfare, having steady place. Obeisance to the great bull. I take thee agreeable to the Viśve Devas."[5] Having wiped it around, he places it with the formula, "This is thy birth-place; for Viśve Devas thee."[5] The Adhvaryu should, having turned by the right, having hastened towards the west and having come to an uderstanding with the Hotṛ (in respect of the Pratigara), turn away. He murmurs as much portion of the formula, "May Iḍā who summons the gods...."[6] as he can. The Hotṛ calls upon him. The

8. TS.III.2.5.5

1. TS.I.4.23
2. TS.VI.5.7.1
3. Containing the remnant of Soma after offering.
4. TS. VI.5.7.1,2
5. TS.I.4.26
6. TS. III.3.2.11, BaudhŚS VIII.7

प्रतिगृणात्योथा मोद इव मदा मोद इवेत्या व्याहावात् । अथ यत्र होतुरभिजानाति तद्राधो अद्य सवितुर्वरेण्यमिति तदुभयतोमदमेव प्रतिगृणाति मदा मोद इव मदा मोद इवेत्या व्याहावात् । प्रसिद्धमुक्थं प्रतिगीर्य प्राडेत्योद्यच्छत एतं वैश्वदेवं ग्रहम् । अनूद्यच्छन्ते नाराशꣳसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशꣳसाननुप्रकम्पयन्ति । एतत्पात्रं नाराशꣳसा अन्वायन्ति । अनुसवनभक्षो विश्वैर्देवैः पीतस्येति । होता चैवाध्वर्युश्चैतत्पात्रꣳ संभक्षयतो नराशꣳसपीतेन नाराशꣳसान्न-राशꣳसपीतस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीच्छन्दसः पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते ॥ १३ ॥

अथ होतारं विपृच्छति परियक्ष्यसि सौम्यां३ न परियक्ष्यसी३ इति । स यथैनꣳ होता प्रत्याह तच्छ्रुत्वासन्नꣳ सौम्यमागच्छति । अथ स्रुचि चतुर्गृहीतं गृहीत्वात्याक्रम्याश्राव्याह घृतस्य यजेति । वषट्कृते जुहोति ।

Adhvaryu responds. (The Hotṛ) recites the Śastra. (The Adhvaryu) responds to the reciting. When he knows the Hotṛ reciting the verse *ekayā ca daśabhiś ca svabhūte,*[7] the Pratiprasthātṛ, having cleansed the Dvidevatya cups on the Mārjālīya mound, inserts them among the cups. When he knows the Hotṛ reciting the verse *pra dyāvā yajñaiḥ pṛthivī ṛtāvṛdhā ...,*[8] the Adhvaryu responds, utters the Pratigara with the word *mada* on only one side, such as *othā moda iva madā moda iva* until the utterance of the Vyāhāva[9] (by the Hotṛ). When he knows the Hotṛ reciting the verse *tad rādho adya savitur vareṇyam ...,*[10] the Adhvaryu responds with the word *mada* on both sides, such as *madā moda iva madā moda iva* until the utterance of Vyāhāva.

Having responded to the Śastra in the prescribed manner, and having moved eastwards, he lifts up the cup for Viśve Devas. The Nārāśaṁsa goblets are lifted up subsequently. He causes to announce; "Do thou anounce," "May it be heard;" "O reciter of Śastra, do you recite the yājyā for the offering of Soma." He offers twice at the Vaṣaṭ and second Vaṣaṭ-utterance. In a similar manner the Camasādhvaryus shake the Nārāśaṁsa goblets twice. The Nārāśaṁsa goblets follow the Vaiśvadeva cup. The Savanabhakṣa formula following (the invocation of Iḍā) is "... (the Soma) drunk by Viśve Devas...." The Hotṛ and the Adhvaryu together consume the cup. (The Camasins consume their respective goblets) with the Narāśaṁsapīta formula, "O Soma, having obtained consent, I consume thee who art drunk by Narāśaṁsa, who knowest the mind, who belongest to the third pressing, who hast Jagatī for thy metre, who art drunk by the Pitṛs, who hast sweetness and who hast obtained consent.[11] These three[12] consume the Hotṛ's goblet having obtained the consent of each other. (The Camasins consume) their respective goblets. They touch, each one to himself, with the formula, "Impel my limbs O thou with tawny steeds; do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis; do not go below my navel."[13] They do not swell the goblets. Consuming the entire quantity they sprinkle themselves.

VIII.14

(The Adhvaryu) asks the Hotṛ, "Will you recite the yājyā on both sides of the offering to Soma or not?" Listening to what the Hotṛ said, he comes to the cooked

7. ĀśvŚS V.18.5; VS XXVII 33; MS IV.6.2
8. RV I.159.1
9. viz the utterane *śoṁsāvom.*
10. RV I.159.5
11. TS.III.2.5.2
12. The Hotṛ, the Adhvaryu and the Pratiprasthātṛ.
13. TS.III.2.5.3

अथोपस्तीर्य द्विश्शरोरवद्यति । पूर्वार्धादवदायापरार्धादवद्यति । अभिघार-
यति । न प्रत्यनक्ति । अत्याक्रम्याश्राव्याह सौम्यस्य यजेति । वषट्कृते
दक्षिणार्धपूर्वार्धे प्राचीनावीती सौम्यं जुहोति । अथैनं वैष्णव्यर्चा
स्रुवाहुत्याभिजुहोति विष्णो त्वं नो अन्तम इति । यद्यु वै होताग्रावैष्णव्यर्चा
परियजति संपन्नमिति नाद्रियेत । तस्मिन्नाज्यमानीयावेक्षते । पवित्रं वै
सौम्यः । आत्मानमेव पवयन्ते । य आत्मानं न परिपश्येदितासुः स्यात् ।
अभिदर्दिं कृत्वावेक्षेतेति । तस्मिन्भूय आज्यमानीयावेक्षते यन्मे मनः
परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति ।
मन एवात्मन्दाधार न गतमना भवतीति ब्राह्मणम् । अथैनमुद्गातृभ्यो
हरन्ति । तस्मिꣳस्तच्चेष्टन्ति यत्ते विदुः । अथ प्राडयन्नाह प्रतिप्रस्थातरुपाꣳशु-
पात्रेण पात्नीवतमाग्रयणाद्गृहं गृहीत्वोपास्व मा सीषद इति । तच्छ्रुत्वा
प्रतिप्रस्थातोपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृहं गृह्णात्युपयामगृहीतो ऽसि
बृहस्पतिसुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णाम्यग्ना३इ पत्नीवा३
इति । बर्हिषी अन्तर्धाय घृतेन श्रीणात्यहं परस्तादहमवस्तादहं ज्योतिषा
वि तमो ववार । यदन्तरिक्षं तदु मे पिताभूदहꣳ सूर्यमुभयतो ददर्शाहं
भूयासमुत्तमः समानानामिति । अपोद्धृत्य बर्हिषी न सादयतीति ब्राह्मणम् ।
असादयित्वोपनिष्क्रम्याश्राव्याहाग्नीत्पात्नीवतस्य यजेति । वषट्कृते जुहोति
सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहेत्युपाꣳशु । अनुवषट्कृते हुत्वा हरति
भक्षम् । स यद्यस्मिन्नाग्नीध्र उपहवमिच्छत उपैवैनꣳ ह्वयते । नो त्वेव
संभक्षयतः । अथाहाग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा संख्याप्याप
उपप्रवर्तयतादूरुणोपप्रवर्तयतान्नग्नं कृत्वोरुमुपप्रवर्तयताद्धोतुश्चमसम-
नून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिचः प्रतिप्रस्थातर्होतृचमसे

rice for Soma placed within the altar. Having taken four spoonfuls in the ladle, having crossed and having caused to announce, he says (to the Hotṛ), "Do you recite the yājyā for the offering of clarified butter." At the Vaṣaṭ-utterance he makes the offering. Having spread clarified butter into the ladle, he takes two portions of cooked rice. Having taken a portion from the eastern half, he takes another from the rear half. He pours clarified butter over the portions. He does not anoint back. Having crossed and having caused to announce, he says (to the Hotṛ), "Do you recite the yājyā for the offering to Soma." At the Vaṣaṭ-utterance he offers to Soma in the eastern half of the southern half suspending his sacred cord over the left shoulder. He offers a spoonful with the verse addressed to Viṣṇu, "O conquering Viṣṇu, do thou, nearest to us, grant us shelter. The sweet-flowing streams milk out for thee the unceasing spring."[1] If the Hotṛ recites the yājyā for Agni-Viṣṇu posterior to the Saumya offering, he should not mind the post-offering deeming that it has taken place. Having poured clarified butter into it, he gazes on it. "The Saumya offering indeed is a strainer. The gazers purify themselves. One who does not see his reflection would die. Having added clarified butter, one should gaze into it."[2] Having poured more clarified butter into it, one gazes in it with the verse, "If my mind is gone away, or is not gone away, I retain it within me through King Soma."[2] "He sustains his mind within himself; he does not lose his mind," so the Brāhmaṇa says.[2] The rice is carried towards the Udgātṛs. With regard to it they act as they are aware of.

Moving forward he says, "O Pratiprasthātṛ, come up having taken a draught for the Pātnīvata offering in the Upāṁśu cup from the Āgrayaṇa vessel; do not keep it down." Listening to it, the Pratiprasthātṛ takes the Pātnīvata draught in the Upāṁśu cup from the Āgrayaṇa vessel with the formula, "Thou art taken with a support; O Soma, I take the Pātnīvata draught from thee pressed by Bṛhaspati and possessed of power, O Agni accompanied by wives."[3] Having held two darbha-blades inbetween, he mixes it with clarified butter with the verse, "I from above, I from below, I warded off the darkness with light, the midregion has become my father. On both sides have I seen the sun. May I become the highest of my equals."[4] Having taken away the darbha-blades, "he does not keep down (the cup)" so says the Brāhmaṇa. Without keeping it down, having gone out, and having caused to announce, he says, "O Agnīdh, do thou recite the yājyā for the offering of the Pātnīvata cup." At the Vaṣaṭ-utterance he makes the offering with the formula, "Do

1. TS.III.1.10.2
2. TS.VI.6.7.2
3. TS.I.4.27
4. TS.III.5.5.1

ध्रुवायावकाशं कुरुतादेहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य यजमानं ध्रुवमुपस्थापयति भूतमसि भूते मा धा मुखमसि मुखं भूयासमिति । होतृचमसमेव प्रथममुन्नयन्ति । यथोपपादमितरान् । सर्वश एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । अथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते यज्ञायज्ञियेन । अत्र सप्तहोतारं व्याचष्टे । प्रस्तुते साम्नि नेष्टा पत्नीमुद्गात्रा संख्याप्य वाचयति विश्वस्य ते विश्वावतो वृष्णियावतस्तवाग्ने वामीरनु संदृशि विश्वा रेताꣳसि धिषीयागन्देवान्यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्त्सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमातिष्ठतानु वातस्य पत्मन्निड ईडिता इति । स यदेवैनामुद्गातोपमीवति तदेषा पत्न्यूरुणा पत्नेजनीरुपप्रवर्तयति । नग्नं कृत्वोरुमुपप्रवर्तयति ॥ १४ ॥

होत्र एषोत्तमेति प्राहुः । होतुः कालात्पराङावर्तते ऽध्वर्युः । अभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणाति । अथ यत्र होतुरभिजानाति स्वादुष्किलायं मधुमाꣳ उतायमिति तदुभयतोमोदं प्रतिगृणाति मोदा मोद इव मदा मोद इवेत्या व्याहावात् । अथ यत्र

you (O Agni) drink Soma along with god Tvaṣṭṛ, svāhā" recited to himself. Having made another offering at the second Vaṣaṭ-utterance, he carries the cup for consuming. If the Āgnīdhra seeks his consent, he gives it. However, they do not consume the cup together. Then he says, "O Agnīdh, do thou sit in the lap of the Neṣṭṛ, O Neṣṭṛ, do thou lead the sacrificer's wife here, cause the Udgātṛ to gaze at the sacrificer's wife, (O sacrificer's wife) do thou let the water flow; let it flow along the thigh; having exposed the thigh, cause the water to flow; (O Camasādhvaryus), do you fill in the goblets following the Hotṛ's goblet; O Unnetṛ, fill in the entire Soma, do not leave any balance; O Pratiprasthātṛ, do you make room for the Soma from the Dhruva vessel in the Hotṛ's goblet; come O sacrificer."

Having led the sacrificer into the Havirdhāna shed by the eastern door, he makes him pray to the Dhruva vessel with the formula, "Thou art being; do thou place me in being; thou art the mouth, may I be the mouth."[6] The Hotṛ's goblet is filled in first; others are filled at will. Having filled in the entire quantity of Soma, they keep (the goblets) on the Uttaravedi. Having touched water, having taken two darbha-blades, having restrained speech and hastening towards the west, he introduces the Stotra. The Udgātṛs chant the Yajñāyajñiya Stotra. The Adhvaryu pronounces the Saptahotṛ formula.[7] When the Sāman-chanting is commenced, the Neṣṭṛ, having caused the sacrificer's wife to be gazed at by the Udgātṛ, causes her to recite the formula, "O Agni, may I receive all seed as precious thing in the sight of thee that art all, that hast all and that hast manly power. The sacrifice has come to the gods; the goddesses (waters) have left the sacrifice for the gods. While the sacrificer is offering Soma, the blessings accomplished by the Svāhā-utterance residing in the atmospheric ocean have followed the Gandharva along the path of wind. Food has been praised."[8] When the Udgātṛ gazes at her, the sacrificer's wife causes to flow the Pannejanī water along her thigh. She causes the water to flow having exposed the thigh.

VIII.15

It is announced to the Hotṛ, "This is the last (verse)." The Adhvaryu turns away from the place in front of the Hotṛ. The Hotṛ calls him out. The Adhvaryu responds. (The Hotṛ) recites (the Āgnimāruta Śastra). (The Adhvaryu) responds. When he listens to the Hotṛ reciting *svāduṣ kilā'yam madhumāṁ utā'yam,* he utters the Pratigara with the word *moda* on both sides viz. *modā moda iva madā moda iva,* upto

5. TS.VI.5.8.5
6. TS.III.2.8.5
7. TĀ III.1
8. TS.III.5.6.3

होतुरभिजानाति तन्तुं तन्वन्रजसो भानुमन्विहीति तत्प्रतिप्रस्थाता ध्रुवं परिगृह्णाति द्यावापृथिवीभ्यां त्वा परिगृह्णामीति । अथैनं प्रच्यावयति विश्वे त्वा देवा वैश्वानराः प्रच्यावयन्त्विति । अथैनमाहरति दिवि देवान्दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवानिति । अथैनꣳ होतृचमसे ऽवनयति ध्रुवं ध्रुवेण हविषाव सोमं नयामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥ यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत् । यथा नः सर्वा इद्दिशो ऽस्माकं केवलीरसन्निति । प्रसिद्धमुक्थं प्रतिगीर्य प्राडेत्योद्यच्छत एतꣳ होतृचमसम् । अनूद्यच्छन्ते चमसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वति । अथ भक्षैः प्रत्यञ्च आद्रवन्ति । अनुसवनभक्षो ऽग्निना वैश्वानरेण मरुद्भिः पीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति। होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते । अथैताꣳश्चमसानद्भिः पूरयित्वोत्तरेणाहवनीयं प्राचो वोदीचो वायातयति । तेषु त्रीꣳस्त्रीꣳश्च दूर्वाग्रन्थीन्प्रास्यत्येकैकं च दर्भपुञ्जीलम् । अथोक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य प्रशास्तः प्रसुहीति । सर्पतेत्याह प्रशास्ता । संतिष्ठते तृतीयसवनम् ॥ १५ ॥ चतुर्थः ॥

अथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्याम: समिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढीति । आहरन्त्येतानाग्नीध्रादौपयजानङ्गारान् । तानग्रेण होतारं निवपति । उपसीदत्युपयष्टा गुदतृतीयेन।

the Vyāhāva (*śoṁsāvom*). When he listens to the Hotṛ reciting *tantuṁ tanvan rajaso bhānum anvihi,* the Pratiprasthātṛ holds up the Dhruva vessel with the formula, "I take thee by means of Dyāvāpṛthivī."[1] He moves it with the formula, "May the Viśve Devas belonging to all men move thee."[1] He brings it with the formula, "Make firm the gods in heaven, birds in the midregion and material things on the earth."[1] He pours it down into the Hotṛ's goblet with the verse, "We pour down the Soma from the Dhruva vessel into the firm oblation so that this whole world may be without ailment and be of kindly intent for us, so that Indra may make for us all subjects of one mind, so that all quarters may be ours alone."[2]

Having responded to the Śastra in the prescribed manner and having moved eastwards, he lifts the Hotṛ's goblet. The (other) goblets are lifted up subsequently. Then he causes to announce; "Do thou announce;" "May it be heard," "O reciter of the Śastra, do you recite the yājyā for the offering of the Somas." He makes the offering twice at the Vaṣaṭ and second Vaṣaṭ-utterance. All (other) goblets are similarly offered twice. They hasten to the west together with (the goblets) to be consumed. The Savanabhakṣa formula following (the invocation of Iḍā) is, "I having obtained consent, consume (the remnants of) the goblet which has been consumed by Agni Vaiśvānara and the Maruts for which consent has been obtained." These three[3] consume the Hotṛ's goblet having obtained the consent of each other. (The Camasins) consume their respective goblets. They touch, each one to himself, with the formula, "Impel my limbs, O thou with tawny steeds; do not distress my troops. Propitious, do thou honour for me the seven Ṛṣis; do not go below my navel."[4] The goblets are not swollen. Consuming the goblets in entirety, they sprinkle themselves. Having filled the goblets with water, he lays them towards the east or north to the north of the Āhavanīya. He puts into each of them three bunches of Dūrvā-grass and one cluster of Darbha-blades. Having responded to the Śastras in the third pressing he says, "A Śastra has been recited for Indra." (He further says), "O Praśastṛ, do you direct." "Do you disperse," says the Praśāstṛ.

The third pressing comes to an end.

VIII.16

(The Adhvaryu) gives out the call, "O Agnīdh, do thou bring embers for the Upayaj-offerings. O Upayaj-offerer, do thou sit down, O Brahman, we shall proceed; O Agnīdh, having put a fire-stick on the fire, do thou cleanse the fires once

1. TS.III.2.8.5
2. TS.III.2.8.6
3. The Hotṛ, the Adhvaryu and the Pratiprasthātṛ
4. TS.III.2.5.3

अथाध्वर्युः पृषदाज्यं विहत्य जुह्वाः समानीयात्याक्रम्याश्राव्याह देवेभ्यः प्रेष्येति । वषट्कृते जुहोति । प्रेष्य प्रेष्येति । एकादशानूयाजानिष्ट्वोदङ्ङत्याक्रम्य यथायतनः स्रुचौ सादयित्वा वाजवतीभ्याः स्रुचौ व्यूहति । शंयुना प्रस्तरपरिधि संप्रकीर्य संप्रस्राव्य स्रुचौ विमुच्योन्नेतारमाहोन्नेतर्ग्रहस्ते प्रचरेति । तच्छ्रुत्वोन्नेता द्रोणकलश आग्रयणतृतीयं ग्रहं गृह्णात्युपयामगृहीतोऽसि हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तं ग्रहं गृह्णामीति । बर्हिषी अन्तर्धाय धानाभिः श्रीणाति हरी स्थ हर्योर्धाना इति । अपोद्धृत्य बर्हिषी अथैनमादायोपोत्तिष्ठन्नाहेन्द्राय हरिवते धानासोमानामनुब्रूहीति । शीर्षन्नधिनिधाय विक्रम्याश्राव्याहेन्द्राय हरिवते धानासोमान्प्रस्थितान्प्रेष्येति । वषट्कृते जुहोति सहसोमा इन्द्राय स्वाहेति । अनुवषट्कृते हुत्वा हरति भक्षम् । स यावन्त ऋत्विजस्तेभ्य उन्नेता धाना व्यावपति । त उन्नेतर्युपहवमिष्ट्वैकैकामन्वस्यन्ते । मनसा संबाधते ॥ १६ ॥

इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । अथैना निर्णिज्योत्तरवेद्याः

each." Embers are brought for the Upayaj-offerings from the Āgnīdhra fire. The Adhvaryu pours them in front of the Hotṛ. The Upayaj-offerer sits down taking up the one third part of the anus (of the Savanīya animal). The Adhvaryu, having dipped a spoon into the Pṛṣadājya, having poured it into the ladle, having crossed and having caused to announce, says (to the Maitrāvaruṇa), "Do you address a call (to the Hotṛ to recite the yājyā) for gods." At the Vaṣaṭ-utterance he makes the offering. (He further says) "Do you address a call," "Do you address a call." Having offered eleven Anūyājas, having crossed towards the north, having placed the two ladles in their places, he separates the ladles with the Vājavatī verse.[1] Having scattered the Prastara and enclosing sticks (on the Āhavanīya fire) with the Śaṁyuvāka formula[1] and having released the ladles, he says to the Unnetṛ, ("This is) thy cup, do thou offer it."

Having listened to it, the Unnetṛ takes into the Droṇakalaśa the draught of one third of the Āgrayaṇa vessel with the formula, "Thou art a bay, yoker of bays, monster on the two bays, bearer of the bolt, impeller of Pṛśni, to thee O god Soma, for whom the formula of the sacrifice is uttered, the Sāman is chanted and the Śastra is recited, I draw the draught connected with the bays."[2] Holding two darbha-blades in between, he mixes it with roasted grains with the formula, "You two are bays, roasted grains for the bays."[2] Having taken away the darbha-blades and having taken up (the Droṇakalaśa), standing up, he says (to the Maitrāvaruṇa). "Do you recite the puronuvākyā for the offering of Soma mixed with roasted grains for Indra possessing bays." Having held it upon his head, having taken strides and having caused to announce, he says to him, "Do you address a call (to the Hotṛ to recite the yājyā) for the Soma mixed with roasted grains set up for Indra possessing bays." At the Vaṣaṭ-utterance he makes the offering with the formula, "(Roasted grains) together with Soma for Indra, svāhā."[2] Having made (another) offering at the second Vaṣaṭ-utterance, he carries (the Droṇakalaśa) to be consumed. The Unnetṛ distributes the roasted grains among as many priests as there are. Having sought consent of the Unnetṛ, they put (the grains) into the mouth, one by one. Each one breaks them (under teeth) mentally.

VIII.17

(With the formula) "O god Soma, I, having obtained consent, eat of thee over whom the yajus has been uttered, the Sāman is chanted and the Śastra is recited, who hast tawny steeds, who art drunk by Indra, who hast sweetness, and for whom

1. cf. BaudhŚS I.19
2. TS.I.4.28

संनिवपन्त्यापूर्या स्था मा पूरयत प्रजया च धनेन चेति । निवपन्नेव यजमानस्तिस्रो धानाः सचते । अथ याचति स्फ्यमुदपात्रं बर्हिरिति । एतत्समादायाहैहि यजमानेति । जघनेन दक्षिणेन हविर्धाने परीत्य दक्षिणेन मार्जालीयं धिष्णियः स्फ्येनोद्धत्यावोक्ष्य दक्षिणाग्रं बर्हि स्तीर्त्वाद्भिर्मार्जयति मार्जयन्तां पितरो मार्जयन्तां पितामहा मार्जयन्तां प्रपितामहा इति । अथ तिस्रो धाना ददात्येतत्ते ततासौ ये च त्वामन्वेतत्ते पितामहासौ ये च त्वामन्वेतत्ते प्रपितामहासौ ये च त्वामन्विति । अत्र पितरो यथाभागं मन्दध्वमित्युक्त्वोदङ् पर्यावृत्यात्र षड्ढोतारं व्याचष्टे । अथाभिपर्यावृत्य तथैवाद्भिर्मार्जयित्वैतेनैव यथेतमेत्याग्नीध्रीये द्वे स्रुवाहुती जुहोति यन्म आत्मनो मिन्दाभूत्पुनरग्निश्चक्षुरदादिति द्वाभ्याम् । अथाहवनीये शाकलैश्चरन्ति देवकृतस्यैनसो ऽवयजनमसि स्वाहा मनुष्यकृतस्यैनसो ऽवयजनमसि स्वाहा पितृकृतस्यैनसो ऽवयजनमसि स्वाहेति । अथाप्सु-षोमान्पर्युपविश्यावघ्रेण भक्षयन्त्यप्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षो अश्वसनिर्यो गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो भक्षयामीति । अथैना निनीयोपोत्थाया-दित्यमुपतिष्ठन्ते ॥ १७ ॥

consent has been obtained."[1] Having (put out of the mouth and having) washed, they pour them down on the Uttaravedi with the formula, "You are to be filled, do you fill me with offspring and wealth."[2] While pouring them down, the sacrificer keeps back three grains. The Adhvaryu asks for the wooden sword, a pot full of water, and sacrificial grass. Having taken this, he says "Come O sacrificer." Having gone round along the west of the Havirdhāna shed[3] and then along the south, having dug out by means of the wooden sword towards the south of Mārjālīya mound, having sprinkled water, and having strewn darbha-blades pointing towards the south, the sacrificer sprinkles on it with water with the formula, "May the fathers be cleansed, may the grand fathers be cleansed, may the great grandfathers be cleansed." He gives three roasted grains with the formula, "This is thine O father N.N. and those that belong to thee; this is thine O grandfather N.N. and those that belong to thee, this is thine O great grandfather N.N. and those that belong to thee."[4] Having said, "Here O fathers, rejoice here with your respective shares,"[4] and having turned towards the north, he utters the Ṣaḍḍhotṛ formula.[5]

Having turned about, having similarly cleansed with water, and having come by the same route by which he had gone, he offers two spoonfuls on the Āgnīdhrīya fire with the two verses, "Whatever fault has been mine, Agni has set it right, all-knower, he who belongs to all men."[6] "Agni has given back the eye-sight; Indra and Bṛhaspati have given it back. Do you two O Aśvins, replace my eyesight within the eyes."[6] They offer splinters on the Āhavanīya with the formula, "Thou art the expiation of the sin committed in respect of gods svāhā; thou art the expiation of the sin committed in respect of man, svāhā; thou art the expiation committed in respect of the fathers, svāhā."[7] Having sat around the Soma mixed with water, they consume it by smelling with the formula, "O god Soma, I, having obtained consent, consume thee who art purified in water, who art pressed by man, over whom the yajus is uttered, for whom Sāman is chanted and Śastra is recited, who art made by the fathers into food to win horses and cows and for whom consent has been obtained."[7] Having poured down the water and having stood up, they pray to Āditya:

1. TS.III.2.5.4
2. TS.III.2.5.5
3. Caland's text is *havirdhāne;* Two manuscripts have *havirdhānam*. Bhavasvāmin : *jaghanena sadohavirdhānayor madhyena dakṣiṇāmukho gatvā*. Thus *havirdhānam* is the correct reading.
4. TS.I.8.5.1
5. TĀ III.4
6. TS.III.2.5.4
7. TS.III.2.5.7

अपाम सोममृता अभूमादर्श्म ज्योतिरविदाम देवान् ।किमस्मान्कृण-वदरातिः किमु धूर्तिरमृत मर्त्यस्येति । यद्यु वा अस्तमित आदित्यो भवत्याहवनीयमेवैतेन यजुषोपतिष्ठन्ते । अथाग्नीध्रं द्रुत्वाग्नीध्रे दधिद्रप्सान्भक्षयन्ति दधिक्राव्णो अकारिषमिति । अथ सख्यवैसर्जनं जपन्त्युभा कवी युवाना सत्या ता धर्मणस्पती । सत्यस्य धर्मणस्पते वि सख्यानि सृजामह इति । अथाध्वर्युः प्रदक्षिणावृत्य प्रत्यङ्ङाद्रुत्य पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य षड्ग्मियाणि जुहोति धाता रातिः सवितेदं जुषन्तामिति ।त्रीणि यजूꣳषि यज्ञ यज्ञं गच्छैष ते यज्ञो यज्ञपते देवा गातुविद इति । अथ स्रुचि चतुर्गृहीतं गृहीत्वायुर्दा दशमीं जुहोत्यायुर्दा अग्ने हविषो जुषाण इति ।एतस्मिन्काले चात्वाले यजमानः कृष्णविषाणां प्रास्यतीन्द्रस्य

VIII.18

"We have drunk Soma; we have become immortal; we have seen the light; we have attained the gods. What the evil spirit would do to us? What the injury perpetrated by man, O immortal Soma"?[1] If the sun has already set, they pray to the Āhavanīya with this verse. Having hastened to the Āgnīdhra chamber, they consume the drops of curds with the verse, "Of Dadhikrāvan have I sung, the swift strong horse. May he make our mouths fragrant; may he lengthen our lives."[2] They murmur the verse releasing companionship, "Both the young wise are true; guardians of law. O guardian of eternal law, let us release our companionship."[3]

The Adhvaryu, having turned by the right, having hastened to the west, having made the Patnīsaṁyāja offerings, having gone towards the east, having swollen the Dhruvā ladle (with clarified butter), makes offerings with the six praising verses, "May Dhātṛ the giver rejoice in this our offering; may Savitṛ, may Prajāpati the lord of treasures, may Agni. May Tvaṣṭṛ and Viṣṇu giving liberally grant to this sacrificer wealth together with offspring—O bountiful Indra, do thou unite us with mental power, with cattle, with the wise, with welfare, with prayers to be offered to gods, with the good will of gods, worthy of sacrifice—May we be united with power, with milk, with (able) bodies, with auspicious mental power. May Tvaṣṭṛ grant us bliss in this world; may he remove the disorder of my person—Since O Agni, we have chosen thee as the Hotṛ here in this sacrifice that is going on, thou hast offered successfully and, knowing, hast dispelled (the evils) successfully. Do thou come to our sacrifice—O gods, with the exclamation *svagā* we have made an abode for you who have come to rejoice in this pressing. Do you O wealthy, grant wealth to all of us who have partaken of the oblations and have consumed Soma—O god Agni, do thou direct to their respective places the gods whom, desirous of oblations, thou hast brought over. O gods, carrying the oblations, do you proceed to the sun the resort of all and subsequently to the heaven."[1] He further offers three Samiṣṭayajus offerings with the formulas, "O sacrifice go to the sacrifice, go to the lord of sacrifice, go to thine own birth-place, svāhā—This is thy sacrifice O lord of sacrifice, accompanied by the Sūktavāka and producing noble heroes, svāhā—You gods who find the way, finding the way go on the way. O lord of mind, do thou place this sacrifice O god, for us, among the gods, svāhā. In speech svāhā, do thou place in wind, svāhā."[4] Having taken four spoonfuls into the ladle, he offers the tenth life-giving offering with the verse, "O Agni, do thou, giver of life, with clarified butter as thy face, with clarified butter as thy womb, approve of the oblation. After having

1. TS.III.2.5.4
2. TS.I.5.11.4
3. This verse is found only in the Śrautasūtras; it is not traced to any earlier text.
4. TS.I.4.44

योनिरसि यज्ञस्य त्वा योनौ सादयामीति वा तूष्णीं वा। अथ प्रतिप्रस्थाता पत्नीमुदानयति सा चात्वाले शङ्कुं प्रास्यति तूष्णीम् ॥ १८ ॥ पञ्चमः ॥

अत्रैतमवभृथः संसादयन्त्यग्रेणाग्नीध्रमुच्छ्राय्यां वा चर्मणि वा। पत्नीशालादादत्ते वारुणमुपस्तीर्णाभिघारितमाज्यस्थालीः सस्रुवाः स्रुचं बर्हिः प्रतिवसनीये वाससी औदुम्बरीः राजासन्दीम्। सदस औदुम्बरीः स्थूणां मैत्रावरुणदण्डम्। हविर्धानाभ्यां पूतभृदाधवनीयौ चमसानधिषवणं चर्माधिषवणे फलके षट् छङ्कून्ग्राव्णो वायव्यानि स्थालीर्द्रोणकलशं दशापवित्रे ऋजीषमित्येतत्सह कृष्णाजिनेन यत्किञ्चित्सोमलिप्तं भवति। अथ वै भवति परा स्थालीरस्यन्त्युद्वायव्यानि हरन्तीति। एतत्समादाय प्रस्तोतारमाह प्रस्तोतः साम गायेति। साम्ना प्रस्तोतान्ववैति। त्रिर्निधनमुपैति। पुरुषःपुरुषो निधनमुपैतीति ब्राह्मणम्। अथान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रामन्त्युरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ। अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चिदिति। विषुवति द्वितीयं निधनमुपयन्ति। अपः पराख्याय वाचयति शतं ते राजन्भिषजः सहस्रमुर्वी गम्भीरा सुमतिष्टे अस्तु। बाधस्व द्वेषो निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मदिति। उदकान्ते तृतीयं निधनमुपयन्ति। अथापामन्तमभितिष्ठन्त्यभिष्ठितो वरुणस्य पाश इति। अथाप्सु बर्हिः प्रास्यत्यग्नेरनीकमप आविवेश। अपां नपात्प्रतिरक्षन्नसुर्यं दमेदमे समिधं

consumed sweet flavoury clarified butter made out of cow's milk, do thou guard this (sacrificer) as father the son."[5] At this juncture the sacrificer throws the horn of black antelope into the Cātvāla with the formula, "Thou art the birth-place of Indra; I place thee in the birth-place of sacrifice," or silently. The Pratiprasthātṛ escorts the sacrificer's wife; she throws the pin into the Cātvāla silently.

VIII.19

The materials pertaining to the Avabhṛtha are placed in front of the Āgnīdhra chamber either on a platform or on a skin. They take up from the chamber of the sacrificer's wife (= Prāgvaṁśa) the cake for Varuṇa for which clarified butter has been spread and over which clarified butter is poured, the vessel of clarified butter together with the spoon, darbha-blades, two pieces of cloth to be worn and the stool of Udumbara wood (*Ficus glomerata*) for Soma, from the Sadas the Udumbara post, the Maitrāvaruṇa's staff; from the Havirdhāna carts the Pūtabhṛt and Ādhvanīya jars, goblets, skin used for pressing, two pressing boards, six pins, pressing stones, Vāyavya wooden cups, (earthern) vessels, Droṇakalaśa, woollen filter and fringe, residue of Soma and whatever else, together with the skin of black antelope, might have been smeared with Soma. It is said, "They throw away the vessels and take up theVāyavya wooden cups."[1]

Having taken this, he says, "O Prastotṛ, do thou chant the Sāman." The Prastotṛ, chanting, follows. He chants the Nidhana thrice. "Each one chants the Nidhana," so the Brāhmaṇa[2] goes. They go out towards the north inbetween the Cātvāla and the rubbish-heap with the verse, "King Varuṇa has made a broad path for the sun to travel. He has made him set his feet on the pathless way. He drives away whatever wounds the heart."[3] They chant the Nidhana the second time at midway. Having seen the water at a distance he makes the sacrificer recite the verse, "O King, your remedies are a hundred, a thousand. May thy favour be broad and deep. Overcome the enemy and the evil. Remove from us whatever sin is committed."[3] They chant the Nidhana the third time having approached water.

They stand by the side of the water with the formula, "The bond of Varuṇa is overcome."[3] He puts darbha-blades into water with the verse, "The face of Agni has entered the water. Do thou, O Agni, the child of water, guarding against the

5. TS.III.3.8.1

1. Source ?
2. TS.VI.6.3
3. TS I.4.45.1

यक्ष्यग्र इति । अथैनत्स्रुवाहुत्याभिजुहोति प्रति ते जिह्वा घृतमुच्चरण्येत्स्वाहेति । अथ स्रुचि चतुर्गृहीतं गृहीत्वापबर्हिषश्चतुरः प्रयाजान्यजति । अथाग्नये सोमायेत्याज्यभागाभ्यां चरति । अथोपस्तीर्य पूर्वार्धात्पुरोडाशस्यावद्यन्नाह ॥ १९ ॥

वरुणायानुब्रूहीति । पूर्वार्धादवदायापरार्धादवद्यति । अभिघारयति । प्रत्यनक्ति । अत्याक्रम्याश्राव्याह वरुणं यजेति । वषट्कृते जुहोति । अथोपस्तीर्य सर्वश एव वारुणमवदधदाहाग्नीवरुणाभ्यांऽ स्विष्टकृदभ्यामनुब्रूहीति । द्विरभिघारयति । आश्राव्याहाग्नीवरुणौ स्विष्टकृतौ यजेति । वषट्कृत उत्तरार्धपूर्वार्धे ऽतिहाय पूर्वा आहुतीर्जुहोति । अथ स्रुचि चतुर्गृहीतं गृहीत्वापबर्हिषौ द्वावनूयाजौ यजति । अथाप्सु स्रुचं प्रतिष्ठापयति समुद्रे ते हृदयमस्वन्तरिति । अथैनामद्भिः पूरयति सं त्वा विशन्त्वोषधीरुताप इति । अप्स्वेवापो जुहोति यज्ञस्य त्वा यज्ञपते हविर्भिः । सूक्तवाके नमोवाके विधेम स्वाहेति । अत्रैतमवभृथऽ संप्रकिरन्ति यत्किंचित्सोमलिप्तं भवत्यवभृथ निचंकुण निचेरुरसि निचंकुणाव देवैर्देवकृतमेनो ऽयाडवमर्त्यैर्मर्त्यकृतमुरोरा नो देव रिषस्पाहीति। अथाञ्जलिनाप उपहन्ति सुमित्रा न आप ओषधयः सन्त्विति । तां दिशं निरुक्षति यस्यामस्य दिशि द्वेष्यो भवति दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति । अथाप उपस्पृश्यात्रैतदृजीषं प्रप्लावयन्ति सह कृष्णाजिनेन देवीराप एष वो गर्भस्तं वः सुप्रीतऽ सुभृतमकर्म देवेषु नः सुकृतो ब्रूतादिति । बिन्दूनुपैव स्पृशति । न भक्षयति । अथानुपमज्जन्ता-

demon's power, offer a fire-stick in each house."[3] He offers a spoonful on it with the formula, "Let thy tongue suck the clarified butter, svāhā."[3] Having taken four spoonfuls into the ladle, he offers four Prayājas omitting the one to Barhis. Then he offers two Ājyabhāgas—"to Agni." "to Soma." Having spread clarified butter as base into the ladle, while taking a portion from the eastern half of the cake, he says (to the Hotṛ):

VIII.20

"Do you recite the puronuvākyā for Varuṇa." Having taken a portion from the eastern half he takes another portion from the rear half. He pours clarified butter over it. He anoints back (the oblation). Having crossed beyond and having caused to announce, he says (to the Hotṛ), "Do you recite the yājyā for Varuṇa." At the Vaṣaṭ-utterance he makes the offering. Having spread clarified butter (into the ladle), putting the entire cake for Varuṇa (into the ladle) he says (to the Hotṛ), "Do you recite the puronuvākyā for Sviṣṭakṛt Agni-Varuṇa." He pours clarified butter twice. Having caused to announce, he says, "Do you recite the yājyā for Sviṣṭakṛt Agni-Varuṇa." He makes the offering at the Vaṣaṭ-utterance into the eastern half of the northern half transgressing the earlier offerings. Having taken four spoonfuls into the ladle, he offers two Anūyājas leaving out the one for Barhis. He holds the ladle on the surface of water with the formula, "Thy heat is in the ocean, within water."[1] He fills it with water with the formula, "Let the plants and water enter thee."[1] He offers water into water with the formula, "O lord of sacrifice, may we furnish thee with the credit of Sūktavāka and Namovāka of the sacrifice through the offerings (of water), svāhā."[1]

At this juncture they scatter the material pertaining to the Avabhṛtha whatever is besmeared with Soma with the formula, "O resounding Avabhṛtha-material, thou art being dispersed. Do thou destroy for gods the evil done by us with regard to the gods, and for men the evil done by us with regard to men. O God, guard us from injury."[1] The sacrificer strikes water with folded hands with the formula, "May the waters and plants be friendly towards us."[1] He throws it towards that direction towards which lives one whom he hates with the formula "May they be unfriendly to him who hates us and whom we hate."[1] Having touched water they submerge the sediment of Soma together with the skin of black antelope with the formula, "O divine waters, this is your foetus; glad and well tended, have we made it for you; proclaim us as doers of good deeds among gods." (The sacrificer) touches the drops (of Soma) : he does not consume them. The sacrificer and his wife wash each other's back without completely immersing into water. They loosen the girdles and

1. TS.I.4.45.2

वन्योन्यस्य पृष्ठे धावयतो विस्रस्य मेखले प्रतिवसनीये वाससी परिधायोन्नेतारमाहोन्नेतरुन्नो नयेति । तिसृभिरुद्वतीभिरुदायन्त्युद्वयं तमसस्पर्युदुत्यं चित्रमिति । अथापामन्तं प्रतियौति प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाश इति । अथाप्रतीक्षमायन्ति वरुणस्यान्तर्हित्यै। प्रपथे समिधः कुर्वत एधो ऽस्येधिषीमहीति । एत्याहवनीये ऽभ्यादधाति समिदसि तेजो ऽसि तेजो मयि धेहीति । अथाहवनीयमुपतिष्ठन्ते ऽपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसेति । व्यवच्छिन्दन्ति परिश्रयणानि । विवर्तयन्ति हविर्धाने दक्षिणेन दक्षिणमुत्तरेणोत्तरम् ॥ २० ॥

यावदेवात्राध्वर्युश्चेष्टति तावदेष प्रतिप्रस्थाता प्रायणीयस्य निष्कास उदयनीयमभिनिर्वपति । एष एव वेद एतन्मेक्षणमेतद्बर्हिः । अथैतां चरुस्थालीꣳ सक्षामकाषामुत्स्विद्य निर्णिज्य तयोदयनीयꣳ श्रपयति । तस्मिꣳस्तथैव श्रप्यमाणे जघनेन गार्हपत्यमौपसदायां वेद्याꣳ स्तम्बयजुर्हरति । इदमेव प्रसिद्धं पौरोडाशिकंत्रिर्यजुषा तूष्णीं चतुर्थम् । पूर्वं परिग्राहं परिगृह्णाति । करणं जपति । उद्धन्ति । उद्धतादाग्नीध्रस्त्रिर्हरति । समानं कर्म यथा प्रायणीयस्य । एतावदेव नाना । पथ्याममुत्र स्वस्तिं प्रथमां यजति तामिहोपोत्तमां यजति । नो तु दिशश्च्यवन्ते । अथ पुरस्तात्स्विष्टकृतः

wear new garments. (The sacrificer) says to the Unnetṛ, "Do thou pull us out." With three verses containing the preverb *ud* they come up : "We have gone above darkness beholding the higher light, God Sūrya among the gods, the highest light—Thy rays bear upwards, god Sūrya, the lord of wealth, so that everything may be visible. - The bright face of the gods has arisen, the eye of Mitra, Varuṇa and Agni. It has filled in the heaven and the earth and the midregion; the sun, the soul of the moving and standing." He tosses back the water at the border with the formula, "Varuṇa's bond is tossed back; Varuṇa's bond is thrown back."[2]

They return without gazing back for the purpose of concealment from Varuṇa. On the way they collect firesticks with the formula, "Thou art the fuel; may we flourish."[2] Having come back (the sacrificer) puts a fire-stick on the Āhavanīya with the formula, "Thou art a fire-stick, thou art lustre; place lustre within me."[2] All pray to the Āhavanīya with the verse, "I have penetrated to the water, we are united with the sap. Rich in milk, O Agni, I have come. Do thou unite me with radiance."[2] The enclosures are broken off, the Havirdhāna carts are turned back, the southern one by south and the northern one by the north.

VIII.21

While the Adhvaryu is functioning, the Pratiprasṭātṛ pours out paddy for the oblation at the Udayanīyeṣṭi in the scrapings of the Prāyaṇīyeṣṭi.[1] The same Veda, the same corn-stirring stick and the same sacrificial grass (are used in this Iṣṭi which were used at the Prāyaṇīyeṣṭi). Having scooped out the vessel of cooked rice together with the scrapings and having cleansed, he cooks in it the rice for the Udayanīyeṣṭi. While the rice is being cooked in a similar manner, he carries the Stambayajus from the altar used for the Upasad Iṣṭi (in the Prāgvaṁśa shed). He carries the Stambayajus three times with the Yajus and the fourth time silently with the mantras prescribed in the Paurodāśika Brāhmaṇa.[2] He does the first tracing of the altar; murmurs the Karaṇa formula.[3] He digs out the altar. The Āgnīdhra carries away (the grass and earth) from the dug out part. The (further) rite is similar as in the Prāyaṇīyeṣṭi. This much is different : there he offers to Pathyā Svasti first;

2. TS.I.4.45.3
3. TBr. III.7.11

1. cf. BaudhŚS. VI.10
2. cf. BaudhŚS V.2. ff
3. cf. BaudhŚS. VI.10

स्रुवाहुतिमुपजुहोति यास्ते विश्वाः समिधः सन्त्यग्न इति । उप-स्तरणाभिघारणाभ्यामेवैतद्ध्रुवाज्यं विच्छिꣳषन्ति । समिष्टयजुरु हैके जुह्वति । शंय्वन्त उदयनीयः संतिष्ठते । अत्रैतत्पूर्णपात्रमन्तर्वेदि निनयति। अथ पृषदाज्यवन्त्याज्यानि गृहीत्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते केशश्मश्रु वपते नखानि निकृन्तते। सर्वसꣳस्थां पशोः कुर्वन्ति । अथ यदि वशां न लभते मैत्रावरुणीमामिक्षां गार्हपत्ये श्रपयित्वा तयाहवनीये प्रचरति । साज्यभागप्रतिपत्केडान्ता संतिष्ठते ॥ २१ ॥

अथारण्योरग्नीन् समारोह्योदवसाय मथित्वाग्नीन्विहृत्याग्नेयमष्टा-कपालमुदवसानीयामिष्टिं निर्वपति । श्रपयित्वासादयति । तस्याः पञ्चदश सामिधेन्यः । पञ्च प्रयाजाः । वार्त्रघ्नावाज्यभागौ । अथ हविषो ऽग्ने तमद्याश्वं न स्तोमैर्ह्यग्न इति । त्रिष्टुभौ संयाज्ये । अन्वाहार्यमासद्यानड्वाहं ददाति। सा प्रसिद्धेष्टिः संतिष्ठते । अथारण्योरग्नीन्समारोह्योदवसाय मथित्वाग्नीन्विहृत्य पूर्वाणि देविकाहवीꣳषि निर्वपत्यनुमत्यै चरुꣳ राकायै चरुं धात्रे पुरोडाशं द्वादशकपालमिति । अन्वाहार्यमासाद्य वत्सतरीं ददाति । सा प्रसिद्धेष्टिः संतिष्ठते । अथ तदानीमेव पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयोत्तराणि देविकाहवीꣳषि निर्वपति सिनीवाल्यै चरुं कुह्वै चरुं धात्र एव पुरोडाशं द्वादशकपालमिति। अन्वाहार्यमासाद्य वत्सतरं ददाति । सा प्रसिद्धेष्टिः संतिष्ठते ।

here he offers her as the last one. The locations (of the oblations) are however not changed. Before the Sviṣṭakṛt offering he offers a spoonful with the verse, "O Agni, all the fire-sticks that are thine on earth, on the Barhis, or in the sun, let these of thine approach the oblation of clarified butter, a protection to the pious sacrificer."[4] The clarified butter in the Dhruvā vessel is exhausted with the spreading and pouring. Some teachers prescribe the offering of the Samiṣṭayajus. The Udayanīya sacrifice is concluded with the rite of Śaṁyuvāka. At this stage the Adhvaryu pours down the Pūrṇapātra (= Praṇītā goblet) within the altar.

Having taken into the ladles clarified butter together with Pṛṣadājya, he dedicates a barren cow to Mitra-Varuṇa. Having gone through the rite of offering the omentum in the prescribed manner, the sacrificer gets his hair and beard shaved and nails pared. The entire rite of the animal-sacrifice is gone through. If one does not get a barren cow, he offers on the Āhavanīya the Āmikṣā having boiled it on the Gārhapatya. The Iṣṭi begins with the Ājyabhāgas and ends with the Iḍā.

VIII.22

Having consigned the fires into the kindling woods, having moved from the place, having churned out fire, and having spread out fires, (the Adhvaryu) pours out paddy for a cake on eight potsherds for Agni at the Udavasānīyā Iṣṭi. Having baked the cake, he places it (within the altar). In this Iṣṭi there are fifteen Sāmidheni verses, five Prayāja offerings; the Ājvabhāgas are Vārtraghna. The puronuvākya-yājyā for the principal offering are *agne tam adya...*[1] and *adhā hy agne...*[1] the puronuvākyā-yājyā for the Sviṣṭakṛt offering are in the Triṣṭubh metre. Having placed the Anvāhārya cooked rice (within the altar), the sacrificer gives away a bullock as Dakṣiṇā. The Iṣṭi comes to an end in the prescribed manner.

Having consigned the fires into the kindling woods, having moved from the place, having churned out fire, having spread out fires, the Adhvaryu pours out material for the former Devikā-offerings, namely, cooked rice for Anumati, cooked rice for Rākā, and a cake on twelve potsherds for Dhātṛ. Having placed the Anvāhārya cooked rice, the sacrificer gives away a heifer. The Iṣṭi comes to an end in the prescribed manner. At the same time, having strewn the Pṛṣṭhyā line and having carried forth Praṇītā water, he pours out material for latter Devikā-offerings, namely, cooked rice for Sinīvālī, cooked rice for Kuhū, and a cake on twelve potsherds for Dhātṛ. Having placed the Anvāhārya cooked rice, the sacrificer gives away a steer as Dakṣiṇā. The Iṣṭi comes to an end in the prescribed manner. Having

4. TS III.5.5.3

1. TS.IV.4.4.7

अथारण्योरग्नीन्समारोह्य स्वान्यग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्य सायंप्रातरग्निहोत्रे प्रतिजुहोति । संतिष्ठते ऽग्निष्टोमः संतिष्ठते ऽग्निष्टो- मः ॥ २२ ॥ षष्ठः ॥

॥ इत्यष्टमः प्रश्नः ॥

consigned the fires into the kindling woods, having reached his own fireplaces, having churned out fire, having spread out fires, the sacrificer severally offers the evening and morning Agnihotra. The Agniṣṭoma comes to an end. The Agniṣṭoma comes to an end.

CHAPTER VIII ENDS.

प्रवर्ग्यꣳ संभरिष्यन्नुपकल्पयते खादिरीमौदुम्बरीं वैणवीं वैकङ्कतीं वाभ्रिं व्याममात्रीं वारत्निमात्रीं वोभयतःक्ष्णूं मृदं च भाविता करणीयां कृष्णाजिनं वराहविहतं वल्मीकवपामूतीकस्तम्बं वादारस्तम्बं वा छागापयो ऽर्मकपालानि शर्करा अवाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि सूनामधिकरणीं कर्तारं कुशलं वेणुकाण्डं मदन्तीरिति । अथामावास्येन वा हविषेष्ट्वा नक्षत्रे वा पूर्वाꣳ शान्तिमुपयन्ति नमो वाच इति । अथाग्रेण शालां धनुर्मात्रे वेद्यै गर्तं खानयति । तद्भावितां मृदमवलेपयति । समां बिलेन करोति । तदुपसादयति वराहविहतं वल्मीकवपामूतीकस्तम्बं वादारस्तम्बं वा स्थाले छागापय इति । अथोत्तरतः पार्श्वतः संभाराणां प्राचीनाग्राणि तृणानि सꣳस्तीर्य तेषूपरि कृष्णाजिनं प्राचीनग्रीव-मुत्तरलोमोपस्तृणाति । अथोत्तरꣳ शालाखण्डमग्रेण स्फ्येनोद्धत्यावोक्ष्य सिकता निवपति । तं परिमण्डलं खरं करोति । अथैनꣳ सिकताभिराभ्राशिनं करोति । तं कुशतरुणकैर्दूर्वाग्रन्थिभिरिति संप्रच्छाद्याथैनं परिश्रयन्ति ।

CHAPTER - IX
THE PRAVARGYA RITE
IX.1

One who is going to provide for the materials necessary for the Pravargya rite, procures a hoe made of the wood of *Acasia catechu,* or *Ficus glomerata* or Bamboo or *Flacourtia sapida* as long as the span of exended arms or a cubit, having points at both the ends, refined soil to be used, a skin of black antelope, earth dug out by a boar, earth of an anthill, a stem of *Basela cordifolia* or Ādāra, milk of a she-goat, potsherds from a deserted village, well-powdered sand, goat's hair, hair of a skin of black antelope, a plank to be used as a receptacle, a skilled workman, a piece of Bamboo and hot water.

After having performed the New-moon sacrifice or having performed an Iṣṭi under an (auspicious) constellation, they pronounce the preceding Śānti formulas: "Obeisance to the speech which is uttered and which is not uttered; obeisance to the lord of speech; obeisance to the Ṛṣis the authors of mantras; the guardians of mantras; may the Ṛṣis the authors of mantras the guardians of the mantras not abandon me; may I not abandon the Ṛṣis the authors of mantras the guardians of mantras. May I utter the speech pertaining to all gods, auspicious, undecayed and approved by gods. May the heaven be gracious to me; may the earth be gracious; may the entire universe be gracious; may the sun and the moon be gracious; may the Brahman and Prajāpati be gracious. I shall utter (speech of) what is created; I shall utter splendour; I shall utter glory; I shall utter heat; I shall utter the mantra; I shall utter the truth. For that (speech) I spread this support; let there be support for my offspring and cattle; may I be a support for the offspring and cattle. O Prāṇa and Apāna, do you guard me from death; O Prāṇa and Apāna, do you not leave me. I shall think sweet; I shall produce sweet; I shall carry through sweet; I shall utter sweet; may I utter for the gods the speech which is sweet and worthy of listening by men. May the gods help me towards the fulfilment (of the worship); may the Pitṛs acquiesce. *Om* (let there be) appeasement, appeasement, appeasement."[1]

In front of the northern part of the shed, (the Adhvaryu) causes a pit to be dug out at a distance of a bow. He fills it with the refined soil. He makes the level of the soil equal to the opening of the pit. He keeps by its side the earth dug out by a boar, earth of an anthill, a stump of *Basela cordifolia* or Ādāra and the milk of a female goat in a vessel. Having spread blades of darbha with their tips towards the east near the materials and towards the north, he spreads upon them a skin of black antelope with its neck towards the east and with the hairy side upwards.

1. TĀ IV.1

तस्योदीचीं द्वारं कुर्वन्ति। तदुपसादयत्यर्मकपालानि शर्करा अवाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि सूनामधिकरणीं कर्तारं कुशलं वेणुकाण्डमिति । अथ गार्हपत्ये मदन्तीरपो ऽधिश्रयति । अन्तर्वेद्यभ्रिं निदधाति। परिश्रयन्ति द्वाराणि। पत्नीशाले पत्नीं परिश्रयन्ति। परिस्तृणन्ति। दक्षिणत उपविशतो ब्रह्मा च यजमानश्च । अत्र पूर्वाः शान्तिमुपयन्ति येषामनुपेता भवति। अथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये सावित्रं जुहोत्यन्वारब्धे यजमाने ॥ १ ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहेति । जुहोत्यदीक्षितस्य। जपति दीक्षितस्य। अथाभ्रिमादत्ते देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद इति । आदायाभिमन्त्रयते ऽभ्रिरसि नारिरस्यध्वरकृद्देवेभ्य इति । अथैनामादायोपोत्तिष्ठत्युत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचेति । प्रैति प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु न इति। अथ भावितां मृदमुपतिष्ठते देवी द्यावापृथिवी अनु मे ऽमꣳसाथामिति। अभ्रिया प्रहरत्यृध्यासमद्य मखस्य शिर इति। मखाय त्वेति हरति। मखस्य त्वा शीर्ष्ण इत्युत्तरतः कृष्णाजिने निवपति । उदूह्योपस्थानमेवमेव द्वितीयꣳ हरति । एवं तृतीयं तूष्णीं चतुर्थम् । पर्येतस्यै शिनष्टि । अथ वराहविहतमुपतिष्ठत इयत्यग्र आसीरिति। अभ्रिया प्रहरत्यृध्यासमद्य मखस्य शिर इति। मखाय त्वेति हरति । मखस्य त्वा शीर्ष्ण इत्युत्तरतः कृष्णाजिने निवपति ।

अथ प्रतिप्रस्थाता पत्नीमुदानयत्युदकमण्डलुमुत्थाप्य । सानुपूर्वं पशूनां प्राणानाप्याययति । अन्वगध्वर्युर्वपा उत्खिदन्नेति । आग्नेयस्यैवाध्वर्युर्वपया प्रथमया प्रतिपद्यते ऽनूचीरितरा आहरन्ति । आग्नेयस्यैव वपायै प्रतितप्यमानायै बर्हिषो ऽग्रमुपास्यत्युपेतरा यच्छन्ति। आग्नेयस्यैव वपाः स्रुवाहुत्याभिजुहोत्युपेतरा यच्छन्ति । अथ स्वाहाकृतिप्रैषेण चरित्वा सःस्रावेण पृषदाज्यमभिघार्याग्नेयस्यैव वपामभिघारयत्युपेतरा यच्छन्ति। अथ पुरस्तात्स्वाहाकृतिः स्रुवाहुतिः हुत्वाथैतेषां नानादेवत्यानां पशूनामनुब्रूहि प्रेष्येति वपाभिश्चरति।अथैतेषाः समानदेवत्यानां पशूनां मुख्यस्य वपाः समवलुम्पन्नाह प्रजापतय इत्युपाःशु छागानां वपानां मेदसो ऽवदीयमानस्यानुब्रूहीत्युच्चैर्यावतीः स्रुक्संभवति। अथेतराः पात्र्या वेडसूनेन वोपोद्यच्छन्ते । द्विरभिघारयति । अत्याक्रम्याश्राव्याह प्रजापतय इत्युपाःशु छागानां वपा मेदः प्रस्थितं प्रेष्येत्युच्चैः । वषट्कृते वपा जुहोति । उपाःशु सारस्वत्यै वपया चरति। अथोपरिष्टात्स्वाहाकृतिः स्रुवाहुतिः हुत्वा वपाश्रपणीरनुप्रहृत्य समुत्क्रम्य चात्वाले मार्जयन्ते । अथ पशून्विशास्ति शमितरित्याह यन्मारुत्या अनवदानीयं तदभ्यर्धाच्छ्रपयतादिति । अथ सावित्रः हुत्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते ॥ ५ ॥ द्वितीयः ॥

animal from the snare, and the sacrificer from the bond."[5] He follows the animals being released from the snares with the verse "May Aditi unfold thes snares ..."[6] Having hung them separately on forkless spikes, he throws them towards 'this' (south-west) direction with the verse, "I put down one who is hostile to me ..."[6]

XI.5

The Pratiprasthātṛ leads the sacrificer's wife having made her take up a pot filled with water. She serially swells the vital breaths of the animals. Subsequently the Adhvaryu goes on extracting their omenta. The Adhvaryu first enters with the omentum of the animal for Agni;[1] other omenta are brought in one by one. He throws into the fire the tip of the darbha-blade for the omentum of the animal for Agni being baked. Tips of darbha-blades are then put on the fire for other animals. The Adhvaryu pours a spoonful over the omentum of the animal for Agni. Spoonfuls arepoured over other omenta. After having given the call for the offering to Svāhākṛtis and having offered the drops of clotted butter, he pours clarified butter over the omentum of the animal for Agni. Clarified butter is poured over the other omenta. He offers a spoonful prior to the offering to Svāhākṛtis (that is the eleventh Prayāja), and (then having offered the Prayāja-offering) proceeds to offer the omenta of animals for different deities by giving the calls "Do you recite the puronuvākyā" "Do you give out the call." Snatching the omentum of the main animal among those belonging to one and the same divinity, he gives out the call, "Do you recite (loudly) the puronuvākyā for the omenta the fats of goats (in a low tone) for Prajāpati being apportioned." (He should place into the juhū) as many oments as may be accomodated. Other omenta should be held in a pan or on a plank. He pours clarified butter over the oblation twice.

Having crossed and having caused to announce, he says (to the Maitrāvaruṇa) "(loudly) do thou call out (the Hotṛ) in regard to the omenta the fats of goats set out (in low tone) for Prajāpati.." At the Vaṣaṭ-utterance he offers the omentum of the female sheep for Sarasvatī with the mantras recited in a low tone. After having offered a spoonful posterior to the offering to Svāhākṛtis, having thrown the omentum-forks into the fire and having stepped up, they sprinkle themselves at the Cātvāla. Then he gives a direction with regard to the animals, "O immolator, do thou cook separately the flesh of the barren cow for Maruts which is not to be apportioned." Having made an offering to Savitṛ, they proceed for the morning pressing. It straight comes to a conclusion.

5. TS. III.1.4.3; BaudhŚS IV.6
6. TS. III.1.4.4 modified a little; BaudhŚS IV.6

1. cf. BaudhŚS IV.7

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति माध्यंदिनाय सवनाय देवी द्वारावित्यत एवोर्ध्वेन । संप्रसृप्तान्विदित्वाध्वर्युः प्राञयन्नाह चात्वाले रथचक्रं निमिनुत रथवाहने रथमाधत्ताश्वान्पल्पूलयत यद्वास्यन्नसि तद्दक्षिणत उपस्थापयाभिषोतार एत ह्वयत ग्रावस्तुतमेहि यजमानेति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माग्रयणाद्ग्रहात् । आग्रयणं गृहीत्वा षोडशिनमभिगृह्णातीन्द्रमिद्धरी वहत इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इति । अथोक्थ्यं गृह्णाति । समानं कर्मा दाक्षिणेभ्यः । दाक्षिणानि होष्यन्याचत्याज्यस्थालीꣳ सस्रुवाꣳ स्रुचं वासः । तस्यैतस्य वसनस्यान्तमायां दशायां निष्करज्जुः प्रग्रथिता भवति। एतत्समादायाहैहि यजमानेति । उत्तरेणाग्नीध्रीयं परीत्योत्तरेण सदः परीत्याग्रेण शालां तिष्ठते प्रतिप्रस्थात्र एतानि शस्त्राणि प्रयच्छति । अथाहैहि यजमानेति । रथ एष दक्षिणे श्रोण्यन्ते रथवाहन आहितो भवति। तमुपावहरतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादिति । अथैनं धूर्गृहीतमन्तर्वेद्यभ्यववर्तयन्ति वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषदिति । अथाप्स्वश्वान्पल्पूलयत्यप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवथ वाजिन इति । अथ दक्षिणं योग्यं युनक्ति वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविꣳशतिः । ते अग्रे अश्वमयुञ्जन्ते अस्मिञ्जवमादधुरिति । अथास्य पृष्ठं मर्मृज्यते ऽपां नपादाशुहेमन्य ऊर्मिः

XI.6

Having offered an oblation to Savitṛ, they proceed to the Midday pressing with the formula, "O divine doors ..."[1] Being aware that the priests have entered the Sadas, the Adhvaryu, moving forward says, "Do you fix a chariot-wheel in the Cātvāla; raise the chariot upon the wagon; bathe the horses; O sacrificer, do you procure by your right side what you will giving away as Dakṣiṇā; O Soma-pressers, do you come up; do you call out the Grāvastut priest; come on O sacrificer." The Soma-pressing takes place as prescribed. The draughts are taken up as prescribed. The procedure upto the taking up of the Āgrayaṇa draught is similar. Having taken up the Āgrayaṇa draught, he takes up the Ṣoḍaśi draught with the mantra, "The two ruddy horses bring in Indra with invulnerable might for the lauds by the Ṛṣis and the sacrifice by men. Thou art taken with a support for Ṣoḍaśin Indra thee; this is thy birth-place. I take thee agreeable to Ṣoḍaśin Indra."[2] Having cleansed around, he places it with the formula, "This is thy birth-place; for Ṣoḍaśin Indra thee." Then he takes up the Ukthya draught. The procedure upto the offerings pertaining to the Dakṣiṇās is similar.[3]

While going to offer the oblations pertaining to the Dakṣiṇās, he asks for the vessel of clarified butter together with the spoon, the ladle and a piece of cloth. A cord with golden coins tied to it is fastened to the extreme fringe of this piece of cloth. Having taken up this he says, "Come on O sacrificer." Having gone around along the north of the Āgnīdhrīya fire and having gone arond along the north of the Sadas, he hands over these things to the Pratiprasthātṛ standing in front of the Prāgvaṁśa shed. Then he says, "Come on O sacrificer." The chariot is placed on the wagon near the southern buttock of the Mahāvedi. He causes it to be brought down with the formula, "Thou art the thunderbolt of Indra, killer of Vṛtra; may he (the sacrificer) kill Vṛtra through thee."[4] Held at yoke, it is caused to be brought within the Mahāvedi with the verse, "We praise mother earth the Aditi for the production of food. May god Savitṛ impel support on this earth on which all creatures live."[4] He causes the horses to be bathed with the verse, "There is immortality in waters, there is healing quality in waters. O horses, do you be strong by virtue of the good qualities of waters."[5] He yokes the southern horse with the verse, "Vāyu, Manu and the

1. cf. BaudhŚS VII.10
2. TS. I.4.38
3. cf. BaudhŚS VIII.5
4. TS. I.7.7.1
5. TS. I.7.7.2

ककुद्मान्प्रतूर्तिर्वाजसातमस्तेनायं वाजꣳ सेदिति । एवमेवोत्तरं योग्यं युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति । तयोरेवमेव पृष्ठे मर्मृज्यते। एतस्य योगमनु सर्वमाणिवद्युज्यते । अधिकक्ष्यान्हस्तिनः कुर्वन्ति । प्रवेष्टयन्ति वासोभारान् । वसनानां दशासु निष्करज्जूः प्रग्रथ्नन्ति । पूगशो दक्षिणा आयातयति । अथ सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति । नयवत्यर्चाग्नीध्रे जुहोति । सृज्यन्ते दक्षिणा दक्षिणापथेन । स यत्किंचिद्ददाति हिरण्यमुखमेव ददाति । अथ वासाꣳस्यथ युक्तानि गोअश्वꣳ हस्तिपुरुषमन्ततः । अदत्ता एवैते रथा अतिवर्तन्ते । नैते ऽन्यस्य सन्त आजिं धावन्ति । मनसैव स्वरथमध्वर्यवे ददाति मनसा समनुदिश्य दक्षिणाः । त्रिभिर्मरुत्वतीयैश्चरति। सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो माहेन्द्राय ॥ ६ ॥

अथ याचति नैवारꣳ सप्तदशशरावम् । स एष क्षीरे शृतो भवति । तेन चरति बृहस्पतये ऽनुब्रूहि बृहस्पतिं यजेति । तमनिष्टस्विष्टकृतमपिधाय प्रज्ञातं निदधाति । अथास्यैतत्पुरस्तादेवौदुम्बरे द्रोणे सर्वौषधं दध्नाज्येन समुदायुतं भवति । तस्यौदुम्बरेण स्रुवेणोपघातꣳ सप्तान्नहोमाञ्जुहोति वाजस्येमं प्रसवः सुषुवे अग्र इति । अभिषेकाय प्रेरकं परिशिनष्टि । अथैनमपिधाय प्रज्ञातं निदधाति । अथ पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेति । अथ यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्य सर्वौषधेन पुरस्तात्प्रत्यञ्चमभिषिञ्चति । शीर्षतो

Gandharvas, twentyseven in all yoked the horse first. May they instal speed within thee."[5] He cleanses his back with the verse, "O great grandson of the waters[6] going fast, may this (sacrificer) obtain food through that wave (of water) which is high, violent and giving abundant food."[5] Similarly he yokes the northern horse. He yokes a third horse to its north. Similarly he cleanses their backs. Following the yoking to this (chariot) yoking to all (chariots) equipped with pins of axles takes place.

Elephants are furnished with girths. Loads of pieces of cloth are wrapped. Strings furnished with golden coins are tied to the fringes of pieces of cloth. He causes the Dakṣiṇās to be entered in flocks. He makes offerings on the Gārhapatya with two verses addressed to Sūrya.[7] He makes an offering on the Āgnīdhrīya fire with the *nayavatī* verse.[8] The Dakṣiṇās are released along the southern route. Whatever the sacrificer has to give away, he gives with gold as the foremost. Then pieces of cloth, carts with oxen yoked to them, cattle and horses and finally elephants and men. The chariots remain over and above without being away. They do not take part in the chariot-race while being the property of others. The sacrificer gives away his own chariot to the Adhvaryu only mentally. (He gives away) Dakṣiṇās assigning (to the priests) mentally. The Adhvaryu offers three Marutvatīya cups.[9] The Nārāśaṁsa goblets being swollen remain below the support of the southern Havirdhāna-cart for the offering of the cup for Mahendra.

XI.7

(The adhvaryu) asks for the cooked wild rice measuring seventeen Śarāvas. It is cooked in milk. He offers it giving the calls (to the Hotṛ) "Do you recite the puronuvākyā for Bṛhaspati," " Do you recite the yājyā for Bṛhaspati." Having covered it while the Sviṣṭakṛt offering has not yet been made, he keeps it knowingly. For him (the sacrificer) all grains are already mixed with curds and clarified butter in a trough of *Ficus glomerata*. He makes seven food-offerings out of it each time dipping the spoon of *Ficus glomerata* respectively with seven verses; "The production of food first created Soma as king among plants and waters. May the plants and waters be sweet for us. May we the priests be alert among the subjects.—This was created as the cause of food; also all these creatures around. Promoting offspring and prosperity for us, that (cause of food) knowing, goes around towards Prajāpati.—The product of food the overlord resorted to the earth and the heaven.

6. Earth was born from waters, plants from earth, food from plants and horse from food. Thus the horse belongs to the fourth generation.
7. Namely, *ud u tyam jātavedasam* ... and *citraṁ devānām* ... cf. BaudhŚS VIII.5.
8. Namely, *agne naya supathā* ... cf. BaudhŚS VIII.5.
9. cf. BaudhŚS VII.7

ऽभिषिञ्चत्या मुखादन्ववस्त्रावयति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीति। समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता वाजपेयेनेति। अथ भूर्भुवः सुवरिति वाचं विसृजते। द्वाभ्यां मुखं विमृष्टे। गायत्रान्विष्णुक्रमान्क्रमते। अथोपरिष्टादभिषेकस्य षट् पार्थानि जुहोतीन्द्राय स्वाहा घोषाय स्वाहेति। द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति। अत्रैतस्य बार्हस्पत्यस्य स्विष्टकृता चरति। अथैनमादायान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रामति। उत्तरत एते रथा युक्तास्तिष्ठन्ति। तदेतान्यजुर्युजो ऽश्वानवघ्रापयति वाजिनो वाजजितो वाजꣳ सरिष्यन्तो वाजं जेष्यन्तो

Knowing, may he cause one averse to give to bestow, May he grant us wealth together with heroes.—O Agni, do thou speak here good about us. Do thou be favourable towards us. O lord of creatures, grant us wealth. Thou art our wealth-giver.—May Aryaman, Bhaga, Bṛhaspati, gods, bountious one, goddess speech grant us out desires.—O Agni, do thou impel Aryaman, Bṛhaspati, Indra, speech, Viṣṇu, Sarasvatī and the strong Savitṛ to makes gifts.—We keep contact with king Soma, Varuṇa, Agni, Ādityas, Viṣṇu, Sūrya, Brahman and Bṛhaspati."[1]

He keeps back the remnants of the oblation for consecratory bath. Having covered, he keeps it knowingly. Prior to the consecratory bath he offers six Pārtha offerings with the formulas, "To Agni svāhā, to Soma svāhā, to Savitṛ svāhā, to Sarasvatī svāhā, to Pūṣan svāhā, to Bṛhaspati svāhā."[2] He spreads on the sacrificer's seat a skin of black antelope with its neck towards the east and the hairy part upwards. Having seated on it the sacrificer facing east and having covered him on both sides with golden and silver sheets, sprinkles him with all grains from east to west. He sprinkles on the head and causes the liquid to flow down up to his mouth with the formula, "In the impulse of the god Savitṛ, with the arms of Aśvins, with the hands of Pūṣan, with the contrivance of Sarasvatī the controller of speeḥ I sprinkle thee with the sovereignty of Agni, with the sovereignty of Indra, with the sovereignty of Bṛhaspati."[3] When (the sacrificer) has been sprinkled all around, they exclaim "This N.N., of N.N. gotra, son of N.N. grandson of N.N., great grandson of N.N. has been sprinkled with Vājapeya." (The sacrificer) releases speech with *bhūr bhuvaḥ suvaḥ*. He cleanses his face with two verses, "Since Varuṇa has entered my body, the kingdom has been reposed in me. We have been following the laws of the brilliant Mitra; we have known the name of the holy order.—All have become the hosts of Varuṇa; Mitra in his course has overcome hostility. Those offering sacrifice have managed according to the holy order. Trita has taken possesion of our old age."[4] he strides Viṣṇu steps with the three formulas in the Gāyatrī metre; "Thou art the stepping of Viṣṇu; Thou art the stride of Viṣṇu; Thou art the victory of Viṣṇu."[5]

Subsequent to the sprinkling (the Adhvaryu) offers six Pārtha offerings with the formulas, "To Indra svāhā; to Ghoṣa svāhā; to Śloka svāhā; to Aṁśa svāhā, to Bhaga svāhā to the lord of region svāhā."[6] He offers twelve offerings to beings for removing calamity with the formula, "To Pṛthivī svāhā; to midregion svāhā; to the heaven svāhā; to the sun svāhā; to the moon svāhā; to the constellations svāhā; to the waters svāhā; to the plants svāhā; to the trees svāhā; to the moving and non-

1. TS. I.7.10.102
2. TS. I.8.13.3
3. TS. I.7.10.3
4. TS. I.8.10.2
5. TS. I.8.10.3
6. TS. I.8.13.3

बृहस्पतेर्भागमवजिघ्रतेति । अथैनमपिधाय प्रज्ञातं निदधाति। अथ रथमभिप्रैति विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तम-सीति । अथ रथस्य पक्षसी संमृशत्यङ्कौ न्यङ्कावभितो रथं याविति । रथमातिष्ठति देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषमिति । एतस्मिन्काले चात्वाले रथचक्रं निमितं ब्रह्मारोहति । तमत एवानुमन्त्रयते देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳ रुहेयमिति । अथ यजमानमन्वास्थायोज्जितीर्वाचयत्यग्निरेकाक्षरेण वाचमुदजयदिति सप्तदश । अथास्मा अश्वाजनीं प्रयच्छत्यश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्त्समत्सु वाजयेति । तया यथायुक्तम-श्वान्क्षिपत्यर्वासीति दक्षिणꣳ सप्तिरसीति मध्यमं वाज्यसीत्युत्तरम् ।

moving svāhā; to the flying around svāhā; to the crawling ones svāhā."[6] At this stage he offers the Sviṣṭakṛt offering pertaining to the offering of cooked wild rice to Bṛhaspati. Having taken it he goes to the north in between the Catvāla and the rubbish-heap.

The chariots to which horses have been yoked stand towards the north. He makes the horses yoked with the formula smell it with the formula, "O horse winning the food, going to march for the food, going to win the food, do you smell the share of Bṛhaspati."[7] Having covered, he keep it knowingly. Then the sacrificer approaches the chariot with the formula, "Thou art the stepping of Viṣṇu; thou art the steps of Viṣṇu; thou art the stride of Viṣṇu."[5] He touches the sides of the chariot with the verse, "The two signs, the two specific signs on both sides of the chariot which move along the gushing wind—by means of these may the liberal fires the one throwing the dart at distance, the powerful, and the winged one, lead us across."[8] He ascends the chariot with the formula, "In the impulse of god Savitṛ, may I win food through the food-winning Bṛhaspati."[9] At this time the Brahman ascends the chariot - wheel fixed in the Cātvāla. The sacrificer follows him (through recitation) with the formula, "In the impulse of god Savitṛ may I ascend the highest vault through food-winner Bṛhaspati.[9]

Having ascended the chariot following the sacrificer, the Adhvaryu makes him recite seventeen Ujjiti formulas beginning with, "Agni won the speech with the mantra of one syllable; Aśvins won inhale and exhale with the mantra of two syllables; Viṣṇu won the three regions with the mantra of three syllables; Soma won four-feeted cattle with the mantra of four syllables; Pūṣan won the Paṅkti metre with the mantra of five syllables; Dhātṛ won six seasons with the mantra of six syllables; Maruts won the seven-feeted Śakvarī metre with the mantra of seven syllables; Bṛhaspati won the Gāyatrī metre with the mantra of eight syllables; Mitra won the Trivṛt stoma with the mantra of nine syllables; Varuṇa won the Virāj metre with the mantra of ten syllables; Indra won the Triṣṭubh metre with the mantra of elevan syllables; Viśve Devas won the Jagatī metre with the mantra of twelve syllables; Vasus won the Trayodaśa Stoma with the mantra of thirteen syllables; Rudra won the Caturdaśa Stoma with the mantra of fourteen syllables; Ādityas won the Pañcadaśa Stoma with the mantra of fifteen syllables; Aditi won the Ṣoḍaśa Stoma with the mantra of sixteen syllables; Prajāpati won the Saptadaśa Stoma with the mantra of seventeen syllables."[10]

Then he gives him a whip for the horses. (The sacrifice receives) with the verse, O strong whip, fast moving for winning food, do thou instigate the horses in

7. TS. I.7.8.4
8. TS. I.7.7.2
9. TS. I.7.8.1
10. TS. I.7.11

अथैतानाजिसृतो ऽवख्यापयति वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्वन स्कभ्नीत काष्ठां गच्छतेति । औदुम्बर्येषा स्थूणा सप्तदशसु शम्याप्रव्याधेषु निमिता । तां काष्ठेत्याचक्षते । तामाजिसृतो ऽतीत्य मा गच्छत मो एनामप्राप्य निवृततान्तःपक्षसमेनां कृत्वा सव्यानवगृह्य दक्षिणैरनुपरिवर्तयाध्वै मो अप्रसूताः सर्पतेति ॥ ७ ॥ तृतीयः ॥

अथाहाभिसर्प यजमान माहेन्द्रं ग्रहं ग्रहीष्यामीति । अन्वारब्धे यजमाने माहेन्द्रं ग्रहं गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनुद्रुत्योपयामगृहीतो ऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेति । तदेतान्पञ्चैन्द्रानतिग्राह्यान्सह सꣳसादयति । अथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते माहेन्द्राय । प्रस्तुते साम्नि संप्रैषमाह ब्रह्मन्वाजिनाꣳ साम गायाजिसृत आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो ऽभिषुणताग्नीदाशिरं विनयोलूखलमुद्वादय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति । गायति ब्रह्मा वाजिनाꣳ साम । तं य एव कश्च परिकर्म्यावेष्टयति । धावन्त्याजिसृतः । आघ्नन्ति दुन्दुभीन् ।

battles."[11] he hits at the horses with it in the order of their yoking: the southern one with "Thou art a steed," the middle one with "Thou art a horse," the northern one with "Thou art strong." He instructs the participants of the chariot-race, "O horses, do you run for food: do you win in the impulse of Maruts, do you traverse the distances, tread the way and reach the goal."[11] A pole of *Ficus glomerata* is fixed at a distance of seventeen throws of a yoke-halter. It is called the goal. O participants, do not beyond it, do not return without reaching it. Keeping it so as to be inside the wing (of the chariot), having controlled the left, lead by the right, do not start without being directed."

XI.8

(The Adhvaryu) says, "Come on O sacrificer, I shall take up the draught for Mahendra." While the sacrificer has kept contact, he takes up the draught for Mahendra with the mantra, "Indra who is strong in valour, like a cloud showering rain, grows with the praise by Vatsa. Thou art taken up with a support for Mahendra thee; I take thee agreeable to Mahendra."[1] Having cleansed around, he places it with the formula, "This is thy bith-place; for Mahendra thee."[1] (The sacrificer ascends the chariot.) He places along with it the five Atigrāhya cups for Indra. Having touched water, having taken two darbha-blades, restraining speech and hastening to the west, he introduces the stotra. The Sāman-chanters chant the stotra for Mahendra. After the Prastāva of the Sāman has been chanted, he gives out the call, "O Brahman, do you chant the Vājinām Sāman. O participants, do you run the race. Do you beat the drums. O Soma-pressers, do you press Soma. O Agnīdh, do thou churn out curdled milk, strike at the mortar; O Pratiprasthātṛ, do thou pour out paddy for the cake on one potsherd for Varuṇa. Enquire about the cooked rice for Soma." They act accordingly. The Brahman chants Vājinām Sāman. Some assistant moves him around. The racers run the race. The drums are beaten. Noises are made. The Adhvaryu recites over the noises the formula, "Do you utter sound for Indra; make Indra win the food, Indra has won the food."[1] He recites over the running chariots the four mantras serially. "O horses, do you help us in every gain and in valued objects. O wise righteous immortals, do you drink this sweet drink and, rejoice; and, being satiated do you depart along the path of gods.—May those all strong horses listening to our calls attend to our call.—May the horses, fast-treading, giving in thousands, desiring to gain in sacrificial ceremonies, who snatched great bounty in battles, be auspicious to us in our invocations.—May they, fast-treading, being highly praised in sacrifices, killing the serpent, the wicked and

11. TS. I.7.8.1

1. TS. I.4.20

संप्रवदन्ति वाचः । सम्प्रोदिता वाचो ऽनुमन्त्रयत इन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयिदिति । अथ रथान्धावतो ऽनुमन्त्रयते वाजेवाजे ऽवत वाजिनो न इति चतसृभिरनुच्छन्दसꣳ । शाम्यन्ति घोषाः शस्त्राय । होत्र एषोत्तमेति प्राहुः । होतुः कालात्पराङवर्तते ऽध्वर्युः । अभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतं माहेन्द्रं ग्रहम् । अनूद्यच्छन्त इतरान् । उपोद्यच्छन्ते नाराशꣳसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृते जुहोति । तदेतान्पञ्चैन्द्रानतिग्राह्यान्सह जुह्वति। वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशꣳसाननुप्रकम्पयन्ति । द्विर्हुतो माहेन्द्रः परिशेते । आयन्ति रथाः । आगतान् रथान्दृष्ट्वा याचत्याज्यस्थालीꣳ सस्रुवाꣳ । स यद्यस्मै रथभ्रेषमाचक्षत आग्नीध्रीय एतां जुहोत्युत स्मास्य द्रवतस्तुरण्यत इत्युभयेनैव । रथविमोचनीयं जुहोत्या मा वाजस्य प्रसवो जगम्यादिति ॥ ८ ॥

अथ याचति नैवारꣳ सप्तदशशरावꣳ सप्तदश सुवर्णानि कृष्णलानि हिरण्यपात्रं मधोः पूर्णमिति । एतत्समादायान्तरेण चात्वालोत्करा-वुदङ्ङुपनिष्क्रामति । उत्तरत एते रथा युक्तास्तिष्ठन्ति । तदेतान्यजुर्युजो ऽश्वानवघ्रापयति वाजिनो वाजजितो वाजꣳ ससृवाꣳसो वाजं जिगिवाꣳसो बृहस्पतेर्भागे निमृड्ढ्वमिति । अथैनमपिधाय प्रज्ञातं निदधाति । अथ रथान्विमुच्यमानाननुमन्त्रयत इयं वः सा सत्या संधाऽभूद्यामिन्द्रेण समधद्ध्वमिति । दुन्दुभीनवस्यतो ऽनुमन्त्रयते ऽजीजिपत वनस्पतय इन्द्रं

Rakṣases, fast remove evils from us. This horse runs up following the whip, fastened at the neck, in the girths and in the mouth, Dadhikrā, abiding by the directions (of the rider) and stepping the ups and downs of the way."[2]

Noise is clamed down for the recitation of the Śastra. The Sāman-chanters declare to the Hotṛ, "This is the last (Ṛk)." The Adhvaryu (standing with his hands on the knees) turns around from the Hotṛ's front. The Hotṛ invokes him. The Adhvaryu responds. (The Hotṛ) recites the Śastra. (The Adhvaryu) utters a response. Having responded to the Śastra as prescribed and having gone to the east, he lifts up the cup for Mahendra. (The assistants) subsequently lift up the other (cups). (The Camasādhvaryus) lift up the Nārāśaṁsa goblets. He gives out the call, "Do thou make it heard;" (The Āgnīdhra says), "let it be heard." (The Adhvaryu says) "O reciter of the Śastra, do you recite the yājyā for the offering of Soma." He makes the offering at the Vaṣaṭ-utterance. At the same time the assistants offer the five Atigrāhya-cups belonging to Indra. He offers twice - at the Vaṣaṭ- and the second Vaṣaṭ-utterance. Similarly (the Camasādhvaryus) twice shake the Nārāśaṁsa goblets. The cup for Mahendra which is offered twice is laid down.

The chariots return. Having seen the chariots come back, the Adhvaryu asks for the vessel of clarified butter together with the spoon. If any damage to the chariot is reported to him, the Adhvaryu offers an oblation on the Agnīdhrīya fire with the verse, "The accessories of this horse, who is moving, treading, hastening flow like the wings of a bird, like an impetuous eagle, like the Dadhikrā traversing mightily."[3] He offfers the offering pertaining to the unyoking of the chariot with the two mantras, "May the flow of food come to me; may the heaven and earth giving happiness to all. May the father and mother come to me. May Soma come to me for immortality."[3]

XI.9

(The Adhvaryu) asks for cooked wild rice measuring seventeen Śarāvas, seventeen golden Kṛṣṇalas and a golden pot full of honey. Having taken this, he goes out towards the north inbetween the Cātvāla and the rubbish-heap. The chariots with horses yoked stand towards the north. He makes the horses yoked with the formula smell (the cooked wild rice) with the formula, "O horses, winners of gain who have run for the gain who have won the gain, do you be cleansed in Bṛhaspati's portion. Having covered it (the rice) he keeps it knowingly. He recites over the chariots from which horses have been unyoked the formula, "This your oath has come true which you had given to Indra."[1] He recites over the drums being

2. TS. I.7.8.2. BaudhŚS seems to have accomodated the last verse among the four.
3. TS. I.7.8.3
1. TS. I.7.8.4

वाजं विमुच्यध्वमिति । तदेतं यजुर्युजः रथं विमुञ्चति यथादत्त-मितरान्व्यावर्तयन्ति । उपसंगच्छन्त एनमेत आजिसृतः । तेभ्य एकैकं कृष्णलं व्युत्प्रयच्छति । तानि सार्धः समादाय हिरण्यपात्रं मधोः पूर्णमित्येकधा ब्रह्मण उपहरति ॥ ९ ॥

तद्ब्रह्मा प्रतिगृह्योपावरोहति । अथाहाजिसृतो दक्षिणापथेनोपातीत्य दक्षिणाः श्रोणिमभिनिश्रयध्वं मारुता अग्रेणाहवनीयं परीत्य दक्षिणमः-समुपसःश्रयध्वमिति । तदेनान्विमिताभ्यामभिविघ्नन्ति । अथाहैहि यजमानेति । पूर्वया द्वारा हविर्धानं प्रपाद्य यजमानः सोमग्रहानुपस्थाप-यति ॥ १० ॥

संपृच स्थ सं मा भद्रेण पृङ्क्तेति । विपृच स्थ वि मा पाप्मना पृङ्क्तेति सुराग्रहान् । अथैताः सुराः सप्रेकामादायैताःश्च सुराग्रहानाजिसृद्भ्य उपहरन्ति। तां ते पिबन्तो रममाणा महीयमाना आसते । अत्र यन्मारुत्या अनवदानीयं तदुभयानन्तरेण पर्णशाखासु न्यस्यति । तत्समुत्क्रुश्य विमाथीकुर्वते । अथ याचत्याज्यस्थालीः सस्रुवां तार्प्यं दर्भमयमिति । एतत्समादायाहैहि यजमानेति । अन्वग्यजमानो ऽनूची पत्नी । आहवनीये जुहोत्यन्वारब्धे यजमाने वाजश्च प्रसवश्चेति द्वादश स्रुवाहुतीः । अथ यजमानं तार्प्यं परिधापयति क्षत्रस्योल्बमसीति । क्षत्रस्य योनिरसीति दर्भमयं पत्नीम् । अथैताः श्रितिं यजमानायतनात्प्राचीं वोदीचीं वा यूपमभ्यायातयति । अथ जायामामन्त्रयते जाय एहि सुवो रोहावेति । रोहाव हि सुवरितीतरा प्रत्याह । अहं नावुभयो सुवो रोक्ष्यामीति

released the formula, "O (drums made out of) trees, you have won the gain in respect of Indra; do you be released."[1] He releases the chariot to which horses were yoked; other chariots are turned away as they may have been given away. The participants of the chariot-race approach the Adhvaryu. The latter gives a Kṛṣṇala to each of them. Having taken them back together, he presents the golden pot full of honey together with the Kṛṣṇalas.

XI.10

Having received them the Brahman climbs down (the chariot-wheel). (The sacrificer) says, "O participants of the race, having gone along the southern route, do you assemble at the southern buttock of the Mahāvedi; O coachmen,[1] having gone around along the front of the Āhavanīya do you remain at the southern shoulder (of the Mahāvedi)." These (persons belonging to two groups) are separately covered together in two separate sheds. (The Adhvaryu) says, "Come O sacrificer." Having led him to the Havirdhāna by the eastern door, he makes the sacrificer pray to the Soma-draughts :

XI.11

"You are commingled; do you commingle me with the good."[1] To the Surā-cups with the formula, "You are separated: do you separate me from the evil."[1] Having taken up the wine together with the balance and the Surā-cups, they carry towards the participants of race. Drinking it they remain thrilling and exalting themselves. (The Adhvaryu) keeps on the twigs of *Butea frondosa* inbetween the two (sheds) the portions (of the cooked flesh) of the barren cow for Maruts. They tear them asunder making noise together. (The Adhvaryu) asks for the vessel of clarified butter together with the spoon and a short piece made of linen and another of darbha-grass. Having taken this, he says, "come on O sacrificer." The sacrificer follows him and the wife follows the sacrificer. The Adhvaryu makes offerings of twelve spoonfuls on the Āhavanīya while the sacrificer has kept contact with the formulas, "(May these come to me:) food, its production, reproduction, intention, heaven, day, night, month, year, Prajāpati, creation, and overlord."[2]

He makes the sacrificer wear the short loin cloth of linen with the formula, "Thou art the caul of ruling power."[2] and the sacrificer's wife wear a loin cloth of darbha-grass with the formula, "Thou art the womb of ruling power."[2] He causes

1. By *mārutāḥ* BaudhŚS XXV,34 understands *kṣattasaṁgrahītāraḥ*.

1. TBr. I.3.3.6
2. TS. I.7.9.1

यजमानः । त्वं नावुभयोः सुवो रोहेति पत्नी । तां दशभिः कल्पै रोहत्यायुर्यज्ञेन कल्पतामिति । आन्तं गत्वा बाहू उद्गृह्णाति सुवर्देवाꣳ अगन्मामृता अभूम प्रजापतेः प्रजा अभूमेति । अथेमं लोकं प्रत्यवेक्षते समहं प्रजया सं मया प्रजा समहꣳ रायस्पोषेण सं मया रायस्पोष इति । अथैनामुपावरोहति । स यावति मन्यत एतावति मोदाप्स्यन्तीति तदेनमासपुटैर्घ्नन्ति ॥ ११ ॥

अन्नाय त्वेति पुरस्तादध्वर्युरन्नाद्याय त्वेति दक्षिणतो ब्रह्मा वाजाय त्वेति पश्चाद्धोता वाजजित्यायै त्वेत्युद्गातोत्तरतः । यद्यु वा एते न कामयन्ते ऽध्वर्युरेव पुरस्ताद्धन्ति दक्षिणतः प्रतिप्रस्थाता पश्चादाग्नीध्र उन्नेतोत्तरतः । तेषां तथा विभागो यथा दुन्दुभीनाम् । अत्रास्मै प्रत्यवरोहणत आसन्दीं निदधाति । तस्यां बस्ताजिनमास्तृणाति बस्ताजिने शतमानꣳ हिरण्यम् । अथ दक्षिणं पादꣳ हिरण्य उपावरोहत्यमृतमसीति पुष्टिरसि प्रजननमसीति सव्यं बस्ताजिने । अथैनमेतयासन्द्या सद आवहन्त्या वा व्रजति । अन्वायन्त्येनमेते चमसाः । अत्रैतस्य बार्हस्पत्यस्येडामुपह्वयते । इडोपहूतं माहेन्द्रꣳ होता चैवाध्वर्युश्च संभक्षयतः । नराशꣳसपीतेन नाराशꣳसान् । अत्रैतेषामतिग्राह्याणां मुख्ये पात्रे सꣳस्रावान्समवनीय यजमान एव प्रत्यक्षं

to erect the ladder against the sacrificial post towards the east or north of the sacrificer's seat. The sacrificer invites his wife, "O wife, come up; we shall ascend the heaven." "Yes indeed,, we shall ascend the heaven,"[2] says the latter, "For both of us I shall ascend the heaven,"[2] says the sacrificer. "Do you ascend the heaven for both of us"[2] says his wife. He ascends with ten formulas," May long life be attained through the sacrifice; may the exhale through the sacrifice; may the inhale through the sacrifice; may the Vyāna through the sacrifice; may the eye through the sacrifice; the ear through the sacrifice; the mind through the sacrifice; the speech through the sacrifice; the self through the sacrifice; the sacrifice through the sacrifice."[3] Having finished, he raises his arms with the formula, "O gods, we have ascended the heaven; we have become immortal; we have become the offspring of Prajāpati."[4] He gazes back at this world with the formula, "May I conjoin with offspring; may the offspring conjoin with me, may I conjoin with prosperity in wealth; may prosperity of wealth conjoin with me."[4] He comes down to this earth. He comes down to that level at which, he may think, they would reach me, at that level they strike him with folders of soil.

XI.12

The Adhvaryu towards the east with "For food thee,"[4] the Brahman towards the south eatable food thee,"[4] the Hotṛ towards the west with "For gain thee,"[4] the Udgātṛ towards the north with "For winning of gain thee."[4] If these (priests) do not desire (to do so), the Adhvaryu strikes from the east, the Pratiprasthātṛ from the south, the Āgnīdhra from the west and the Unnetṛ from the north.[5] For them the division (of folders) should be that which is for the distribution of drums. For him the Adhvaryu places the stool at that spot where he would step down. He spreads a goat's skin on it, on the skin he places a piece of gold weighing a hundred mānas. The sacrificer places his right foot on the piece of gold with the formula, "Thou art immortality, thou art prosperity; thou art procreation."[4] He puts the left foot on the goat's skin. He is brought into the Sadas together with the stood. Or he himself comes there. The goblets follow him. At this time he invokes the Iḍā pertaining to the offering to Bṛhaspati. The Hotṛ and the Adhvaryu consume together the cup offered to Mahendra after the Iḍā (pertaining to the offering to Bṛhaspati) has been invoked.[6] (The Camasins) consume the Nārāśaṁsa goblets with the *narāśaṁsapīta* formula.[7]

3. TS. I.7.9.1-2
4. TS. I.7.9.2
5. The Adhvaryu strikes with five folders, the Pratiprasthātṛ with five, the Āgnīdhra with four and the Unnetṛ with three.
6. The cup of Mahendra, the Atigrāhya cups and the goblets which have already been offered, are brought over to the Sadas for consumption.
7. Namely, *narāśaṁsapītasya soma devta ....*

भक्षयति । अपि वैनान्सर्वश एव चमसेषु व्यवनीय भक्षयेयुरित्येतद-परम् । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान्। हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते । अथेन्द्राय त्वेन्द्राय त्वेत्येवं त्रिभिरुक्थ्यपर्यायैश्चरति । संतिष्ठते माध्यंदिनꣳ सवनम् ॥ १२ ॥ चतुर्थः ॥

अथ सावित्रꣳ हुत्वा प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । अथ षोडशिनमभिगृह्णात्यसावि सोम इन्द्र त इत्यनुद्रुत्योपयामगृहीतो ऽसीन्द्राय त्वा षोडशिने जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरिन्द्राय त्वा षोडशिन इति । अथोक्थ्यं गृह्णाति । समानं कर्मा पवमानात् । पवमानेन चरित्वा स्वे धामन्पशुभिश्च-रति । तेषां नाना मनोता नाना देवता नाना प्रत्यभिमर्शना नाना वसाहोमाः समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशः । नाना दिश इत्येके । समानं कर्मा ध्रुववद्भ्यश्चमसेभ्यः । ध्रुव-वद्भिश्चमसैश्चरित्वा त्रिभिरुक्थ्यपर्यायैश्चरतीन्द्रावरुणाभ्यामिन्द्रा-बृहस्पतिभ्यामिन्द्राविष्णुभ्यामिति । अथ षोडशिना चरति । अथ प्राडयन्नाह होतुश्चमसमनून्नयध्वमुन्नेतः सर्वश एव राजानमुन्नय मातिरीरिच इति । होतृचमसमेव प्रथममुन्नयन्ति यथोपपादमितरान् । सर्वश एव राजानꣳ समुन्नीयोत्तरवेद्याꣳ सꣳसादयन्ति । तदेतान्प्राजापत्यान्सह सꣳसादयन्ति । अथाप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ्द्रुत्वा स्तोत्रमुपाकरोति।

The remnants of the Atigrāhya cups are poured into the main cup, and the sacrificer himself consumes them. Alternatively the remnants are poured into all goblets, and the Camasins consume them. This is another view. The three consume the Hotṛ's goblet having obtained the consent of each other.[8] The Camasins consume their respective goblets. They touch themselves with the formula, "Do thou impel my limbs ..."[9] They do not swell the goblets. They consume the entire quantity and cleanse them. Then the Adhvaryu goes through the procedure of the three turns of the Ukthya cups after filling them with "For Indra thee." "For Indra thee."[10] The midday-pressing comes to an end.

XI.13

The Adhvaryu makes an offering to Savitṛ and then they enter into the Sadas for the third pressing. Having offered the cup to Ādityas, the Adhvaryu takes up a draught in the Āgrayaṇa vessel. Then he takes up a draught in the Ṣoḍaśin-cup with the mantra, "O Indra, Soma has been pressed for thee; do thou, O most powerful and clever, come here. Thou art taken with a support; I take thee agreeable to Ṣoḍaśin Indra."[1] Having cleansed around, he places it with the formula, "This is thy birth-place; for Ṣoḍaśin Indra thee."[1] He then takes the Ukthya draught. The procedure upto the (Ārbhava) Pavamāna is similar. After having gone through the rite of Pavamāna, he goes through the rite of offering (organs) of the animals at the proper time. In regard to them there should be different Manotā hymns, different deities, different touching formulas, different offerings of oily portion of flesh, a common offering to Vanaspati, a common Sviṣṭakṛt offering characterised by a call, common Iḍā and common offerings to the quarters. According to some teachers there should be different offerings to the quarters. The procedure upto the offering of the goblets together with the Dhruva-draught is similar. After having offered the goblets together with the Dhruva-draught,[2] he follows the procedure of three turns of Ukthya-draught—for Indra-Varuṇa, Indra-Bṛhaspati and Indra-Viṣṇu.[3] Then he offers the Ṣoḍaśin-cup.

Going towards the east, he says, "Do you fill in (the goblets) following the Hotṛ's goblet. O Unnetṛ, do thou fill in the entire Soma; do not keep back." The

8. The Hotṛ, the Adhvaryu and the Pratiprasthātṛ.
9. TS. III.2.5.3
10. cf. BaudhŚS VII.17-20. VIII.8

1. TS. I.4.3.9
2. cf. BaudhŚS VIII.15
3. cf. BaudhŚS XVII.2

स्तुवते । तदेतद्बृहत्सामैकविꣳशं वैष्णवीषु शिपिविष्टवतीषु कुर्वन्ति । होत्र एषोत्तमेति प्राहुः । होतुः कालात्पराङावर्तते ऽध्वर्युः । अभ्येनमाह्वयते होता । प्रत्याह्वयते ऽध्वर्युः । शꣳसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राङेत्योद्यच्छत एतꣳ होतृचमसम् । अनूद्यच्छन्त इतरान् । उपोद्यच्छन्ते चमसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमानामिति । वषट्कृते जुहोति । तदेतान्प्राजापत्यान्सह जुह्वति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विः सर्वाꣳश्चमसाञ्जुह्वति । अथ भक्षैः प्रत्यञ्च आद्रवन्ति । अनुसवनभक्षः प्रजापतिना पीतस्येति । अत्रैतेषां प्राजापत्यानां मुख्ये पात्रे सꣳस्रावान्समवनीय यजमान एव प्रत्यक्षं भक्षयति । अपि वैनान्सर्वश एव चमसेषु व्यवनीय भक्षयेयुरित्येतदपरम्। अत्र यन्मारुत्या अवदानीयं तदृत्विग्भ्य उपहरति । तदेतत्समावच्छो विभज्य प्राश्नन्ति । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते । अथ संप्रैषमाहाग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्सकृत्सकृत्सकृत्संमृड्ढीति । आहरन्त्येतानाग्नीध्रादौपयजानङ्गारान् । तानग्रेण होतारं निवपति । उपसीदत्युपयष्टा गुदतृतीयैः । अत्रैतानि गुदतृतीयान्येकादशधा कृत्वोपयष्टोपयजति । समानमत ऊर्ध्वम् संतिष्ठते वाजपेयः । वाजपेयेनेष्ट्वा प्रत्यवरोहणीयेनाग्निष्टोमेन यजेत । संतिष्ठते वाजपेयः संतिष्ठते वाजपेयः ॥ १३ ॥ पञ्चमः ॥

॥ इत्येकादशः प्रश्नः ॥

Hotṛ's goblet is filled in first, others as they come to hand. Having filled in the entire Soma, they place (all the cups etc.) on the Uttaravedi. The Prājāpatya cups are placed together. Having touched water, having taken two darbha-blades, having gone to the west restraining speech, he introduces the Stotra. (The Sāman-chanters) chant. They chant the Bṛhat Sāman based on the verses addressed to Śipiviṣṭa Viṣṇu in twentyone stomas. They announce to the Hotṛ, "This is the last (verse)." The Adhvaryu turns around in front of the Hotṛ. The Hotṛ invokes him. The Adhvaryu responds. (The Hotṛ) recites the Śastra. (The Adhvaryu) utters response. Having responded to the Śastra in the prescribed manner and having gone to the east, he lifts up the Hotṛ's goblet. (The assistants) lift up the other (cups). (The Camasādhvaryus) lift up the goblets. (The Advharyu) causes to announce, "Do thou make it heard;" "Let it be heard;" "O reciter of the Śastra, do you recite the yājyā in respect of the Soma draughts." (The Adhvaryu) makes the offering at the Vaṣaṭ-utterance. (The assistants) simultaneously offer the Prājāpatya draughts. He offers twice at the Vaṣaṭ- and second Vaṣaṭ-utterance. Similarly all goblets are offered twice. They hasten to the west together with the cups to be consumed. The Savanabhakṣa formula to be recited subsequent to (the invocation of the Iḍā) is, "Drunk by Prajāpati ..."[4] At this stage having collected together in the main cup the remnants of the cups for Prajāpati, the sacrificer himself consumes. Alternatively having poured them into all goblets, (the Camasins) should consume. This is another view. He carries towards the priests the acceptable portions (of the flesh of the barren cow for the Maruts). Having distributed equally they partake of it. The three[5] consume (the Soma from) the Hotṛ's goblet after having obtained the consent of each other. (The Camasins) consume their respective goblets. They touch themselves with the formula, "Do thou impel my limbs ..." They do not swell the goblets. They consume the entire quantity and sprinkle themselves.

Then (the Adhvaryu) gives out the call, "O Agnīdh, do thou bring in the embers for the Upayaj offerings, O Upayaj-offerer, do thou seat thyself, O Brahman we shall start, having put a fire-stick, O Agnīdh, do thou cleanse (the enclosing sticks and the fire) once each." The Agnīdh brings in the embers for the Upayaj offerings from the Āgnīdhrīya fire. he pours them down in front of the Hotṛ. The Upayaj-offerer sits down taking the pieces of the third part of the rectum. Having made the third part of the rectum into eleven pieces, the Upayaj-offerer makes the offerings. The further procedure is similar. The Vājapeya comes to an end. Having performed the Vājapeya one should perform the descending Agniṣṭoma. The Vājapeya comes to an end. The Vājapeya comes to an end.

CHAPTER XI ENDS.

4. The rest as an TS. III.2.5.
5. The Hotṛ, the Adhvaryu and the Pratiprasthātṛ.

राजसूयेन यक्ष्यमाणो भवति । स पुरस्तात्फाल्गुन्यै वा चैत्र्यै वा पौर्णमास्या आमावास्येन हविषेष्ट्वा दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । संतिष्ठत एष प्रायणीयो ऽग्निष्टोमश्चतुष्टोमः सहस्रदक्षिण उदवसानीयान्तः । अथाष्टमे ऽह्न्यानुमतं निर्वपति । हविष्कृता वाचं विसृजते । समानं कर्माधिवपनात् । अध्युप्य दक्षिणार्धे गार्हपत्यस्याष्टौ कपालान्युपदधात्येकं प्रतिप्रस्थातोत्तरतो नैर्ऋताय । हविःपेष्यै प्रयच्छन्नाह प्राचश्च प्रतीचश्च व्यवशातयन्ती पिण्ड्ढीति । स ये प्राञ्चः शम्याया अवशीयन्ते तानध्वर्युः समुप्य संयुत्यानुमतꣳ श्रपयति । अथ ये प्रत्यञ्चः शम्याया अवशीयन्ते तान्प्रतिप्रस्थाता समुप्य संयुत्य नैर्ऋतꣳ श्रपयति । आददत एतं नैर्ऋतमुपस्तीर्णाभिघारितं कृष्णं वासः कृष्णतूष-मन्तमागारादेकोल्मुकमुदपात्रमिति । एतत्समादाय गार्हपत्ये स्रुवाहुतिं जुहोति वीहि स्वाहाहुतिं जुषाण इति । अथ दक्षिणया द्वारोपनिष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्पष्टं भवति प्रदरो वा । तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्याङ्गुष्ठाभ्यां परिगृह्य नैर्ऋतं जुहोत्येष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममꣳहसः स्वाहेति । अत्र कृष्णं वासः कृष्णतूषं ददाति । अथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादान्प्रक्षाल्य । एतेनैव यथेतमेत्य गार्हपत्ये स्रुवाहुतिं जुहोति स्वाहा नमो य इदं चकारेति । अथानुमतेन सꣳस्थां करोति । धेनुं ददाति ॥ १ ॥

CHAPTER - XII

RĀJASŪYA

XII.1

One proposes to perform the Rājasūya. He gets initiated after having performed the New-moon sacrifice prior to the full-moon of Phālguna or Caitra. In this sacrifice there are three initiation-days, three Upasad-days, and the pressing takes place on the seventh day. This Prāyaṇīya Agniṣṭoma, involving the chanting of Stotras characterised by four Stomas and the giving away of one thousand (cows) comes to an end with the Udavasānīyā Iṣṭi. On the eighth day, (the Adhvaryu) pours out (paddy) for the Anumati-Iṣṭi. He releases speech with the call to the preparer of oblation-material. The rite up to the pouring (of the paddy on the lower crushing stone) is similar. Having poured, he arranges eight potsherds in the southern half of the Gārhapatya; the Pratiprasthātṛ arranges one for the offering to Nirṛti towards the north. Handing over (the grains) to the female crusher of the grains he says, "Do thou crush letting the flour fall down towards the east and towards the west." The Adhvaryu bakes the cake for Anumati after having poured in a pan the flour which falls down to the east of the yoke-halter (placed below the lower crushing stone) and having mixed it with water. The Pratiprasthātṛ bakes the cake for Nirṛti after having collected into a pan the flour which falls down to the west of the yoke-halter and having mixed it with water. They take up this cake for Nirṛti for which clarified butter has been spread as base and on which clarified butter has been poured, a black piece of cloth, a black fringe, a fire-brand brought from a neighbouring house and a pot full of water . Having taken up this, he offers a spoonful on the Gārhapatya with the formula, "Enjoying the oblation, do thou depart, svāhā."[1]

Having gone out by the southern door, they proceed towards that direction where a hollow or a crevice becomes visible. Having enkindled the fire-brand at that place, having strewn it around and having traced it by means of the two thumbs, he makes an offering to Nirṛti with the formula, "This is thy share, O Nirṛti; O prosperous one, thou hast received an oblation; do thou relieve him of sin, svāhā."[1] Here he gives away the black piece of cloth and the black fringe. Having sprinkled away waters and having thrown away the pot and having cleansed hands and feet, they come back without looking back. Having come back by the route by which they had gone, he offers a spoonful on the Gārhapatya with the formula, "Svāhā and homage to one who granted this."[1] He concludes the Anumati-Iṣṭi. The sacrificer gives away a milch-cow as Dakṣiṇā.

1. TS I.6.1.1.; TBr; I.6.1.1

अथ नवमे ऽह्न्यादित्यं चरुं निर्वपति । वरं ददाति । अथ दशमे ऽह्न्याग्नावैष्णवमेकादशकपालम् । वामनं वहिनं ददाति । अथैकादशे ऽह्न्यग्नीषोमीयमेकादशकपालम् । हिरण्यं ददाति । अथ द्वादशे ऽह्न्यैन्द्रमेकादशकपालम् । ऋषभं वहिनं ददाति । अथ त्रयोदशे ऽह्न्याग्नेयमष्टाकपालमैन्द्रं दधि । ऋषभं वहिनं ददाति । अथोपातीत्याग्रयण-हवीꣳषि चतुर्दशे ऽह्नि सरस्वत्यै चरुम् । वत्सतरीं ददाति । अथ पञ्चदशे ऽह्नि सरस्वते चरुम् । वत्सतरं ददाति । यद्यु वै चतुर्दश्यामेवोपवसथः संपद्यत एवमेवैतदहरेताभ्यामिष्टिभ्यां नानाबर्हिर्भ्यां यजेत । अथास्यैतदहर्विश्वेभ्यो देवेभ्यो वत्सा अपाकृता भवन्ति । वैश्वदेवं पयो दोहयित्वोपवसति सांनाय्यस्य वावृता तूष्णीं वा । अथ श्वो भूते वैश्वदेवहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । अथ श्वो भूत इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपति । अभिहितो रथ उभाकाꣳस्यकवचो गर्भिणीभिर्वा वडबाभिर्युक्तः साण्डैर्वाश्वैरावेष्ट्यो निष्कस्तद्ददाति । अथ श्वो भूत इन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपति । अनभिहितो रथो ऽकाꣳस्यकवचो ऽगर्भाभिर्वा वडबाभिर्युक्तो निरष्टैर्वाश्वैः श्लक्ष्णको निष्कस्तद्ददाति ॥ २ ॥

एते संतनी इत्याचक्षते । अथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते । स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानश्चतुरो मास एति काममिष्ट्या कामं पशुबन्धेन कामं यवाग्रयणेन । अथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्येष्ट्वा वरुणप्रघासहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । अथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते । स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपराꣳश्चतुरो मास एति काममिष्ट्या कामं पशुबन्धेन कामꣳ श्यामाकाग्रयणेन । अथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्येष्ट्वा साकमेधहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं

XII.2

On the ninth day he offers cooked rice to Aditi. The sacrificer gives a boon. On the tenth day a cake on eleven potsherds to Agni-Viṣṇu. The sacrificer gives away a short ox. On the eleventh day a cake on eleven potsherds to Agni-Soma. The sacrificer gives away a piece of gold. On the twelfth day a cake on eleven potsherds to Indra. The sacrificer gives away a bull bearing the yoke. On the thirteenth day a cake on eight potsherds to Agni and curds to Indra. The sacrificer gives away a bull bearing the yoke. Having gone through the offering of Āgrayaṇa oblations, on the fourteenth day cooked rice to Sarasvatī. The sacrificer gives away a heifer. On the fifteenth day cooked rice to Sarasvant. The sacrificer gives away a heifer. If the Upavasatha happens to be on the fourteenth day, one should perform on that very day these two Iṣṭis with separate sacrificial grass.

On this day calves are driven away from their mothers for (the oblation to) Viśve Devas. Having caused the milk for Viśve Devas to be milked, the sacrificer observes fast in the manner of the Sāṁnāyya or silently. Next day, after having performed the Vaiśvadevaparvan (of the Cāturmāsyas) and the Full-moon sacrifice and the Vaimṛdheṣṭi, he gets his hair cut as prescribed.[1] Next day he offers a cake on eight potsherds to Sutrāman Indra. He gives a harnessed chariot with bronze guards on both sides and yoked with pregnant mares or young horses and a niṣka coin to be enveloped. Next day he offers a cake on eleven potsherds to Aṁhomuc Indra. He gives away an unharnessed chariot without bronze guards on both sides yoked with non-pregnant mares or emasculated horses and a smooth niṣka.

XII.3

These two are called as 'harmonious.' Next day he commences as with the two harmonious sacrifices. In a similar manner the sacrificer goes on for four months by means of the two 'harmonious' sacrifices performed day by day alternately (and also) of Iṣṭis or animal-sacrifices or Āgrayaṇa of barley. At the expiry of four months, having performed the 'harmonious' Iṣṭis, having performed the Varuṇapraghāsaparvan and having performed the Full-moon and Vaimṛdha Iṣṭi, he gets his hair cut as prescribed.[1] Next day he commences with the 'harmonious' sacrifices themselves. In a similar manner the sacrificer goes on for further four months by means of the two 'harmonious' sacrifices performed day by day alternately (and also) of Iṣṭis, or animal-sacrifices or Āgrayaṇa of Śyāmāka. At the expiry of four months, having performed the two 'hermonious' sacrifices, having performed the Sākamedhaparvan and having performed the Full-moon and Vaimṛdha sacrifices, he gets his hair cut as prescribed.[1] Next day he comences with the two 'harmonious' sacrifices themselves. In a similar manner the sacrificer goes on for four months

1. cf. BaudhŚS V.4

1. cf. BaudhŚS V.4

निवर्तयते । अथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते । स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानो ऽपराꣳश्चतुरो मास एति काममिष्ट्या कामं पशुबन्धेन कामं व्रीह्याग्रयणेन । अथ चतुर्षु मासेषु पर्यवेतेषु संतन्येष्ट्येष्ट्वा शुनासीरीयहविर्भिरिष्ट्वा पौर्णमासवैमृधाभ्यामिष्ट्वा प्रसिद्धं निवर्तयते । अथ श्वो भूते संतनीभ्यामेव प्रतिपद्यते। स एवमेव संतनीभ्यामहरहर्विपर्यासं यजमानः सप्ताहान्येति काममिष्ट्या कामं पशुबन्धेन । अथाष्टमे ऽह्नीन्द्रतुरीयमाग्नेयमष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुम् । अन्वाहार्यमासाद्य वहिनीं धेनुं ददाति ॥ ३ ॥

अथ तदानीमेव पञ्चेध्मीयेन प्रतिपद्यते । पञ्चधाङ्गारान्निरूह्य पञ्चेध्मानभ्यादधाति पर्णमयं पुरस्तान्नैयग्रोधं दक्षिणत आश्वत्थं पश्चादौदुम्बरमुत्तरतः प्लाक्षं मध्ये । अथैनानाज्येन व्याघारयति ये देवाः पुरःसदो ऽग्निनेत्रा रक्षोहणस्ते नः पान्तु ते नो ऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा ये देवा दक्षिणसदो ये देवाः पश्चात्सदो ये देवा उत्तरसदो ये देवा उपरिषद इति । अथोपवेषेणाङ्गारान्समूहति समूढꣳ रक्षः संदग्धꣳ रक्ष इदमहꣳ रक्षो ऽभिसंदहामीति । अथैनान्स्रुवाहुतिभिरभिजुहोत्यग्नये रक्षोघ्ने स्वाहेति पञ्चभिरत्र प्रष्टिवाहिनꣳ रथं ददाति । अथ याचति पर्णमयꣳ स्रुवमपामार्गसक्तून्प्रतिवसनीयं वासो ऽन्तमागारादेकोल्मुकमुदपात्रमिति। एतत्समादायोदञ्चो निष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणꣳ स्पष्टं

with the two 'harmonious' sacrifices alternately performed day by day (and also) with Iṣṭi, or animal-sacrifice or Āgrayaṇa of paddy. At the expiry of four months after having performed a 'harmonious' sacrifice, having performed the Śunāsīrīyaparvan and having performed the Full-moon and Vaimṛdha sacrifices, he gets his hair cut as prescribed.[1] Next day he commences with the two 'harmonious' sacrifices. In a similar manner the sacrificer goes on for seven days with the two 'harmonious' sacrifices performed alternately day by day (and also) with Iṣṭi or animal-sacrifice. On the eighth day he offers a cake on eight potsherds to Agni, cooked Gavīdhuka rice to Rudra, curds to Indra and cooked barley to Varuṇa. After having placed the Anvāhārya rice (within the altar), the sacrificer gives away a load bearing milch-cow.

XII.4

Immediately afterwards (the Adhvaryu) performs the Pañcedhmīya sacrifice. Having spread the embers in five places, he puts on them five faggots - that of *Butea frondosa* in front, of *Ficus Indica* to the south, of *Ficus religiosa* to the west, of *Ficus glomerata* to the north and of *Ficus infectoria* in the middle. He makes an Āghāra-offering on each fire—(on the eastern fire) with the formula, "The gods who are seated in front, with Agni as their eye, killing demons, may they guard us, may they help us, obeisance to them, to them svāhā." (On the southern fire) with the formula, "The gods who are seated towards the south with Yama as their eye ... ." (On the western fire) with the formula "The gods who are seated towards the west and Savitṛ as their eye ..." (On the northern fire) with the formula, "The gods who are seated the north with Varuṇa as their eye ..." (On the middle fire) with the formula "The gods who are seated above with Bṛhaspati as their eye. ..."[1] He collects together the embers by means of the fire-stirring stick with the formula, "The Rakṣas is piled together, the Rakṣas is burnt out, here do I burn together the Rakṣas."[2] He offers on the piled up embers five spoonfuls respectively with the formulas, "To Agni the killer of Rakṣas svāhā; to Yama the killer of Rakṣas svāhā; to Savitṛ the killer of Rakṣas svāhā; to Varuṇa the killer of Rakṣas svāhā; to Bṛhaspati receiving worship and killer of Rakṣas svāhā."[2] At this stage the sacrificer gives away (to the Adhvaryu) a chariot with three horses yoked to it. (The Adhvaryu) asks for a spoon made of *Butea frondosa*, flour of roasted Apāmārga-seeds (*Achyranthes aspera*), a piece of cloth to be changed, a fire-brand brought from a neighbouring house, and a pot full of water. Having taken all this and having gone out towards the north, they proceed towards that direction where a natural hollow or a crevice

1. TS I.8.7.1
2. TS I.8.7.2. Caland's text reads *upatiṣṭhate*. It requires to be changed as *upottiṣṭhati*. cf. BaudhŚS XXII.17.

भवति प्रदरो वा । तदेतदेकोल्मुकमुपसमाधाय संपरिस्तीर्य पर्णमयेन स्रुवेणापामार्गसक्तूञ्जुहोति देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि स्वाहेति । हतꣳ रक्ष इति स्रुवमनुप्रहरति । अवधिष्म रक्ष इत्युपोतिष्ठति । अत्र यद्धस्ते तद्ददाति । अथापो व्यतिषिच्य परास्य पात्रमनवेक्षमाणा आयन्ति हस्तपादान्प्रक्षाल्य। एतेन यथेतमेत्येन्द्रतुरीयेण सꣳस्थां करोति । अथ नवमे ऽह्नि पूर्वाणि देविकाहवीꣳषि निर्वपत्यनुमत्यै चरुꣳ राकायै चरुं धात्रे पुरोडाशं द्वादशकपालमिति । अन्वाहार्यमासाद्य वत्सतरीं ददाति । अथ दशमे ऽह्न्युत्तराणि देविकाहवीꣳषि निर्वपति सिनीवाल्यै चरुं कुह्वै चरुं धात्र एव पुरोडाशं द्वादशकपालमिति । अन्वाहार्यमासाद्य वत्सतरं ददाति । अथैकादशे ऽह्नि त्रिषंयुक्तैः प्रतिपद्यते । आग्नावैष्णवं निर्वपत्यैन्द्रा-वैष्णवमेकादशकपालं वैष्णवं त्रिकपालम् । वामनमृषभं वहिनं ददाति । अथ द्वादशे ऽह्न्यग्नीषोमीयमेकादशकपालं निर्वपतीन्द्रासोमीयमे-कादशकपालꣳ सौम्यं चरुम् । बभ्रुं ददाति । अथ त्रयोदशे ऽह्नि सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुम् । श्यामं ददाति । अथ चतुर्दशे ऽह्नि वैश्वानरं द्वादशकपालं निर्वपति । हिरण्यं ददाति । अथ पञ्चदशे ऽह्नि वारुणं यवमयं चरुम् । अश्वं ददाति ॥ ४ ॥ प्रथमः ॥

अथैनमामावास्येन हविषेजानꣳ रत्निनः पर्यवस्यन्ति दक्षिणतो वोदञ्चो पश्चाद्वा प्राञ्चः । तेषामवसितानां ब्रह्मैव दक्षिणाध्यो वापराध्यो वा भवति। स यत्किंच यज्ञपरिभोजनं ब्रह्मण एव तद्गृहे भवति । अथारण्योरग्नीन्समारोह्य ब्रह्मणो गृहानध्यवसाय मथित्वाग्नीन्विहृत्य बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे । शितिपृष्ठं ददाति । अथारण्योरग्नीन्समारोह्य स्वान्यग्न्याय-तनान्यभिप्रव्रजति । तं यन्तमनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा

becomes visible. Having placed there the fire-brand and having strewn it around, he offers by means of the spoon the flour of roasted Apāmārga-seeds with the formula, "In the impulse of god Savitṛ, with the arms of Aśvins, with the hands of Pūṣan, I offer the means of killing the Rakṣas svāhā."[2] He throws the spoon (on the fire) with "The Rakṣas is smitten."[2] He gets away with "We have killed the Rakṣas."[2] Here he gives away that piece of cloth which he has worn. Having sprinkled away water and having thrown away the water-pot, they come back without looking back having washed hands and feet. Having come back by the route by which they had gone, he concludes the procedure (of the day) with Indraturīya sacrifice.

On the ninth day he offers prior Devikā oblations, namely, cooked rice to Anumati, cooked rice to Rākā, and a cake on twelve potsherds to Dhātṛ. Having placed the Anvāhārya cooked rice (within the altar) the sacrificer gives away a heifer as Dakṣiṇā. On the tenth day he offers the posterior Devikā-oblations, namely, cooked rice to Sinīvālī, cooked rice to Kuhū and a cake on twelve potsherds to Dhātṛ himself. Having placed the Anvāhārya cooked rice, the sacrificer gives away a heifer. On the elventh day he offers the threefold sacrifice; he offers a cake to Agni-Varuṇa (on elven potsherds), a cake on eleven pothsherds to Indra-Viṣṇu and a cake on three potsherds to Viṣṇu. The sacrificer gives away a short load-bearing bull. On the twelfth day he offers a cake on eleven potsherds to Agni-Soma, a cake on eleven potsherds to Indra-Soma, and cooked rice to Soma. The sacrificer gives away a brown bull. On the thirteenth day he offers cooked rice to Soma-Pūṣan, cooked rice to Indra-Pūṣan, and cooked rice to Pūṣan. The sacrificer gives away a black bull. On the fourteenth day, he offers a cake on twelve potsherds to Vaiśvānara Agni. The sacrificer gives away gold. On the fifteenth day he offers cooked rice to Varuṇa. The sacrificer gives away a horse.

XII.5

The Ratnins sit around the sacrificer who has already performed the New-moon sacrifice—either towards the south facing the north or towards the west facing the east. Among the seated (Ratnins) the Brahman is either the southernmost or westernmost. Whatever the applicances of the sacrificer, they go to the Brahmaṇ's residence. Having consigned the fires into the kindling woods, having reached the Brahman's residence, having churned out fire and having spread out fires, the Adhvaryu offers cooked rice to Bṛhaspati at the Brahman's residence. The sacrificer gives away a white-backed bull. Having consigned the fires into the kindling woods, the sacrificer proceeds towards his own fire-places. (The Brahman) recites over the proceeding sacrificer the formula, "This our king is the killer of enemies; may he, becoming a king, kill the enemy." Having reached his fire-places, having churned out fire and having spread out fires, he offers in return a

वृत्रं वध्यादिति। अथ स्वान्यग्न्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्येन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रतिनिर्वपति । अथास्यैतदहः श्वेतायै श्वेतवत्सायै पयो दोहयित्वा समातच्य निदधाति । अथ श्वो भूते ऽरण्योरग्नीन्समारोह्य राजन्यस्य गृहानध्यवसाय मथित्वाग्नीन्विहृत्यैन्द्र-मेकादशकपालꣳ राजन्यस्य गृहे। ऋषभं ददाति। तथारण्योरग्नीन्समारोह्य स्वान्येवाग्न्यायतनान्यभिप्रव्रजति। तं तथैव यन्तमनुमन्त्रयते। यस्ययस्य गृहे यजते ससो ऽनुमन्त्रयते ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्या-दिति। अथ स्याज्येवान्यायतनान्यध्यवसाय मथित्वाग्नीन्विहृत्येन्द्रायाꣳहो-मुचे पुरोडाशमेकादशकपालं प्रतिनिर्वपति। प्रज्ञातमेवास्यैतदहः श्वेतायै श्वेतवत्सायै पयो दोहयित्वा समातच्यैव निदधाति । अथ तृतीये ऽह्न्यादित्यं चरुं महिष्यै गृहे । धेनुं ददाति। अथ चतुर्थे ऽह्नि भगाय चरुं वावातायै गृहे। विचित्तगर्भां पष्ठौहीं ददाति। अथ पञ्चमे ऽह्नि नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नम्। कृष्णां कूटां ददाति। अथ षष्ठे ऽह्न्याग्नेयमष्टाकपालꣳ सेनान्यो गृहे । हिरण्यं ददाति । अथ सप्तमे ऽह्नि वारुणं दशकपालꣳ सूतस्य गृहे । महानिरष्टं ददाति। अथाष्टमे ऽह्नि मारुतꣳ सप्तकपालं ग्रामण्यो गृहे। पृश्निं ददाति। अथ नवमे ऽह्नि सावित्रं द्वादशकपालं क्षत्तुर्गृहे । उपध्वस्तं ददाति । अथ दशमे ऽह्न्याश्विनं द्विकपालꣳ संग्रहीतुर्गृहे । सवात्यौ ददाति । अथैकादशे ऽह्नि पौष्णं चरुं भागदुघस्य गृहे । श्यामं ददाति । अथ द्वादशे ऽह्नि रौद्रं गावीधुकं चरुमक्षावापस्य गृहे। शबलमुद्वारं ददाति। प्रसिद्धमेवास्यैतदहः श्वेतायै श्वेतवत्सायै पयो दोहयित्वा समातच्यैव निदधाति । अथ त्रयोदशे ऽह्नि मैत्राबार्हस्पत्यं भवति ॥ ५ ॥

अथ वै भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च

cake on eleven potsherds to Sutrāman Indra. The same day having caused the milk of a white cow with a white calf to be milked, he coagulates and places it.

Next day, having consigned the fires into the kindling woods, having reached the residence of a Rājanya, having churned out fire and having spread out fires, he offers a cake on eleven potsherds to Indra at the residence of a Rājanya. The sacrificer gives away a bull. Having consigned the fires into the kindling woods, he goes to his own fire-places. The Adhvaryu recites over the proceeding (sacrificer) the same formula.[1] At whosesoever residence the sacrificer performs the sacrifice, he recites over him the formula, "This our king is the killer of enemies; may he, becoming a king, kill the enemy." Having reached his own fire-places, having churned out fire and having spread out fires, he offers in return a cake on eleven potsherds to Aṁhomuc Indra. Having caused the milk of a white cow with a white calf to be milked, he coagulates and keeps it. On the third day he offers cooked rice to Aditi at the residence of the senior queen. The sacrificer gives a milch-cow. On the fourth day he offers cooked rice to Bhaga at the residence of the favourite wife. The sacrificer gives away a heifer with perceivable foetus. On the fifth day he offers to Nirṛti at the residence of the dispised wife cooked rice of grains obtained by piercing black paddy. The sacrificer gives away a black cow with broken horns. On the sixth day he offers a cake on eight potsherds to Agni at the residence of the chief of army. The sacrificer gives away gold. On the seventh day he offers a cake on ten potsherds to Varuṇa at the residence of a charioteer. The sacrificer gives away a castrated bull. On the eighth day he offers a cake on seven potsherds to Maruts at the residence of a village-chief. The sacrificer gives away a spotted cow. On the ninth day he offers a cake on twelve potsherds to Savitṛ at the residence of a chamberlain. The sacrificer gives away a variegated bull. On the tenth day he offers a cake on two potsherds to Aśvins at the residence of a charioteer. The sacrificer gives away two bulls who were born of the same mother. On the eleventh day he offers cooked rice to Pūṣan at the residence of a tax-collector. The sacrificer give away a black bull. On the twelfth day he offers cooked wild rice to Rudra at the residence of a gambler. The sacrificer gives away a variegated bull with raised tail. Having caused on this day a white cow with a white calf to be milked, he coagulates the milk and places it. On the thirteenth day a sacrifice is offered to Bṛhaspati and to Mitra.

XII.6

Now indeed the Brāhmaṇa goes, "(Rice should be cooked for Bṛhaspati) in the milk of a white cow with a white calf and (rice should be cooked for Mitra) in ghee naturally churned out from self-coagulated milk (in a leather-bag) in a four-

1. "This our king ...." as given above.

तण्डुलान्विचिनुयादिति । अथ वै भवति स्वयंकृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्म इति । राजैवायः स्वयं कर्मभिः पूजितो भवति । स स्वयमेव वेदिं करोति स्वयमिध्माबर्हिः संनह्यति स्वयमाश्वत्थं पात्रं चतुःस्रक्ति करोति स्वयमवपन्नायै शाखायै कर्णाःश्चाकर्णाःश्च तण्डुलान्विचिनोति । अथ वै भवति ये कर्णाः स पयसि बार्हस्पत्यो येऽकर्णाः स आज्ये मैत्र इति । अथोत्तरतो भस्ममिश्रानङ्गारान्निरूह्य तेषु नवं पात्रमधिश्रित्य तिरः पवित्रमाज्यमानीय तिरः पवित्रमकर्णानोप्य तेन बार्हस्पत्यमपिदधाति । तं तथापिहितमन्तर्वेद्यासादयति । समानं कर्मा प्रयाजेभ्यः । पञ्च प्रयाजानिष्ट्वोदङ्ङत्याक्रम्य सःस्रावेण बार्हस्पत्यमभिघार्य मैत्रमभिघारयति । बार्हस्पत्येन पूर्वेण प्रचरत्यथ मैत्रेण । बार्हस्पत्यस्य पूर्वस्य स्विष्टकृतेऽवद्यत्यथ मैत्रस्य । बार्हस्पत्यस्य पूर्वस्येडामवद्यत्यथ मैत्रस्य । अन्वाहार्यमासाद्यैतामेव श्वेताः श्वेतवत्सां ददाति । संतिष्ठते मैत्राबार्हस्पत्यः हविः ॥ ६ ॥ द्वितीयः ॥

अथैतस्मिन्नेव पूर्वपक्ष उक्थ्यायाभिषेचनीयाय दीक्षते । तस्यापरिमिता दीक्षाः षडुपसदः । स तथा राजानं क्रीणाति यथा मन्यते ऽमावास्यायै मे यज्ञिये ऽहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । अथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा रोहिते चर्मणि राजानं क्रीत्वोह्यातिथ्यं निर्वपति । आतिथ्येन प्रचर्याथान्वहमुपसद्भिश्च-रति । अथाहवनीयं प्रणयति । आहवनीयं प्रणीय रथवाहने सदोहविर्धाने संमिनोति। रथवाहने सदोहविर्धाने संमित्याग्नीषोमौ प्रणयति । अग्नीषोमौ प्रणीय यूपस्यावृता यूपमुच्छ्रयति । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं

edged pot made of naturally fallen branch of Aśvattha tree. One should separate the broken the unbroken rice-grains. (The broken grains should be used for the rice for Bṛhaspati, and the unbroken ones for Mitra)"[1] It is further said, "The altar is prepared by himself; self cut sacrificial grass and faggot fastened by himself."[2] It is indeed the king himself who is honoured by the acts. He himself prepares the altar; himself fastens the sacrificial grass and sacrificial faggot; he himself prepares a four-edged pot out of a twig of an Āsvattha tree. He himself separates the broken and whole rice-grains. It is indeed said, "Those which are broken rice-grains are utilised to prepare rice cooked in milk for Bṛhaspati; those which are whole are utilised to prepare rice cooked in ghee for Mitra."[2] Having taken out embers mixed with ashes towards the north, having kept over them a new pot, having poured into it ghee across the strainer, and having poured into it whole rice-grains across the strainer, he covers the rice cooked for Bṛhaspati with it. He places it so covered within the altar. The procedure upto the Prayāja-offerings is similar. Having offered five Prayājas and having crossed towards the north, he pours drops (from the ladle) on the rice for Bṛhaspati and that for Mitra. He offers the rice first to Bṛhaspati and then to Mitra. For the Sviṣṭakṛt offering he first takes portions from the rice for Bṛhaspati and then those from the rice for Mitra. For the Iḍā he first takes portions from the rice for Bṛhaspati and then from that for Mitra. After having placed the Anvāhārya cooked rice (within the altar) the sacrificer gives away the white cow with white calf. The offering to Bṛhaspati and Mitra comes to an end.

XII.7

In this very bright half of the month the sacrificer gets initiated for the Ukthya sacrifice pertaining to the consecratory bath. The Dīkṣā-days for this sacrifice are more than the normal number. There are six Upasad-days. He purchases king Soma on such a day that he would think "my pressing day would coincide with the new-moon day - the day for sacrifice." It coincides accordingly. The Adhvaryu performs the Prāyaṇīyā Iṣṭi.[1] After having performed the Prāyaṇīyā Iṣṭi, he goes through the rite of (the earth below) the foot-print.[2] Having gone through the rite of the foot-print, having purchased king Soma on the hide of a red bull,[3] and having carried it,[4] he performs the Ātithyā Iṣṭi.[4] Having performed the Ātithyā Iṣṭi, he performs the Upasad Iṣṭis on consecutive days. Then he carries forth the Āhavanīya.[5]

1. TS I.8.9.2-3
2. TS I.8.9.3

1. cf. BaudhŚS VI.10
2. cf. BaudhŚS VI.13
3. cf. BaudhŚS VI.14-15
4. cf. BaudhŚS VI.16
5. cf. BaudhŚS VI.24

पशुमुपाकरोति । तस्य प्रसिद्धं वपया चरित्वा वसतीवरीर्गृह्णाति । अथ पशुपुरोडाशं निर्वपति । तमनुवर्तन्ते ऽष्टौ देवसुवाᳬ हवीᳬष्यग्नये गृहपतय इत्येतानि । तेषामुक्तं चरणं यथाग्नेर्विधायाम् । इडान्ताः पुरोडाशाः संतिष्ठन्ते । पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके । अत्रैतान्दुन्दुभी-ननुदिशमासञ्जयति । अथ वसतीवरीः परिहृत्य पयाᳬसि विशिष्योपवसन्ति। अथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैति । अद्भिरुदैति। उक्थ्यं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहात् । आश्विनं ग्रहं गृहीत्वा द्वे रशने आदाय यूपमभ्यैति । स्वर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपाकरोति । तस्यैन्द्राग्न उपालम्भ्यो भवति। तयोः प्रसिद्धं वपाभ्यां चरित्वा प्रसर्पन्ति प्रातःसवनाय । तदृजुधा संतिष्ठते। प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते। समानं कर्मा दाक्षिणेभ्यः । दाक्षिणानि होष्यन्याचत्याज्यस्थालीᳬ सस्रुवाᳬ स्रुचं वासः तस्यैतस्य वसनस्यान्तमायां दशायां निष्करज्जुः प्रग्रथिता भवति । एतत्समादायाहैहि यजमानेति । उत्तरेणाग्नीध्रीयं परीत्योत्तरेण सदः परीत्याग्रेण शालां तिष्ठते प्रतिप्रस्थात्र एतानि शस्त्राणि प्रयच्छति । अथाहैहि यजमानेति । रथ एष दक्षिणे श्रोण्यन्ते रथवाहन आहितो भवति। तमुपावहरतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादिति । अथैनं धूर्गृहीतमन्तर्वेद्यभ्यववर्तयन्ति तूष्णीम् । अथाप्स्वश्वान्पल्पूलयति तूष्णीम्। अथ दक्षिणं योग्यं युनक्ति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेनेति । अथास्य पृष्ठं मर्मृज्यते तूष्णीम् । एवमेवोत्तरं योग्यं

Having carried forth the Āhavanīya, he fixes the Havirdhāna and the Sadas erected on a chariot. Having fixed the Havirdhāna and the Sadas erected on a chariot, he carries forth fire and Soma.[6] Having carried forth fire and Soma, he erects the sacrificial post with the procedure for a sacrificial post.[7] Having furnished the sacrificial post with a splinter, he dedicates the animal to Agni-Soma.[7] Having offered its omentum in the prescribed manner, he takes up the Vasatīvarī water.[7] He offers the Paśupuroḍāśa.[7] The eight Devasu offerings "to Agni Gṛhapati" etc. follow it. Their offering takes place as it prescribed in the Agnicayana.[8] The rite of offering Puroḍāśas is concluded with the invocation of Iḍā. The animal-sacrifice is concluded with the Patnīsaṁyāja-offerings. According to some teachers it is concluded with the disposal of the heart-pike.[8] At this stage he manages to fix the drums towards the quarters. Having carried around the Vasatīvarī waters and having given instructions in respect of the milks,[9] they wait for (the subsequent rites).

They get up at early dawn. Having taken up clarified butter in the different ladles and vessels in the morning and having taken down king Soma, (the Adhvaryu) introduces the Prātaranuvāka. After the Prātaranuvāka has come to a conclusion, he approaches the waters. He comes up with waters. He employs the Kratukaraṇa formula related to the Ukthya.[10] The pressing of Soma takes place as prescribed. The draughts are taken as prescribed. The procedure upto the draught for Aśvins is similar. Having taken up the draught for Aśvins and having taken two cords, he approaches the sacrificial post. Having furnished the post with a splinter, he dedicates the animal to Agni. For this (sacrifice) an animal is to be immolated for Indra-Agni. After the omenta of these two animals have been offered in the prescribed manner, they proceed to the morning pressing. It comes to a conclusion straightway.

They proceed to the midday-pressing. The pressing of Soma is as prescribed. The draughts are taken as prescribed. The procedure upto the offerings pertaining to the Dakṣiṇā is similar. Going to offer the offering pertaining to the Dakṣiṇā, he asks for a vessel of clarified butter together with the spoon, the ladle and a piece of cloth. To the ending fringe of this piece of cloth a cord for gold coins is fastened. Having taken up this, he says, "Come up O sacrificer." Having gone around along

6. cf. BaudhŚS VI.30
7. cf. BaudhŚS VI.32
8. cf. BaudhŚS X.55
9. cf. BaudhŚS VI.33-34
10. cf. BaudhŚS VII.4

युनक्ति । तस्यैवमेवोत्तरतः प्रष्टिमुपनियुनक्ति । तयोरेवमेव पृष्ठे मर्मृज्यते। एतस्य योगमनु सर्वमाणिवद्युज्यते । अधिकक्ष्यान्हस्तिनः कुर्वन्ति । प्रवेष्टयन्ति वासोभारान् । वसनानां दशासु निष्करज्जूः प्रग्रथ्नन्ति । पूगशो दक्षिणा आयातयति । अथ सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोति । नयवत्यर्चाग्नीध्रे जुहोति । सृज्यन्ते दक्षिणा दक्षिणापथेन । स यत्किंचिद्ददाति हिरण्यमुखमेव ददाति । अथ वासाꣳस्यथ युक्तानि गोअश्वꣳ हस्तिपुरुषमन्ततः । अदत्ता एवैते रथा अतिवर्तन्ते । नैते ऽन्यस्य सन्त आजिं धावन्ति । मनसैव स्वरथमध्वर्यवे ददाति । मनसा चतुष्पात्क्षेत्रं ब्रह्मण आदिशति । मनसा समनुदिश्य दक्षिणास्त्रिभिर्मरुत्वतीयैश्चरति । सीदन्ति नाराशꣳसा आप्यायिता दक्षिणस्य हविर्धानस्यापालम्बमधोऽधो माहेन्द्राय ॥ ७ ॥

अथ याचति वैतसं द्रोणकलशꣳ षोडश वायव्यानि । अथास्यैतत्पुरस्तादेव षोडशतय्य आपो दिग्भ्यः संभृता उत्तरस्य हविर्धानस्य प्राच्यो अक्षात्प्रतीच्य उपस्तम्भनान्निहिताः शेरते । तासां वहन्त्यः पूर्वार्ध्या भवन्ति सारस्वत्यो ऽपरार्ध्याः । स वहन्तीरभिजुहोत्यर्थेत स्थापो देवीर्मधुमतीरगृह्णन्नूर्जस्वती राजसूयाय चितानाः । याभिर्मित्रावरुणा-वभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ राष्ट्रदा स्थ राष्ट्रं दत्त स्वाहेति । गृह्णाति पर्णमयेन राष्ट्रदा स्थ राष्ट्रममुष्मा आमुष्यायणायामुष्य पुत्रायामुष्य

the north of the Āgnīdhrīya fire and along the north of the Sadas, he hands over these implemens to the Pratiprasthātṛ standing in front of the (Prāgvaṁśa) hall. He says, "Comẹ on O sactrificer." The chariot is placed upon the wagon for chariot near the southern buttock of the Mahāvedi. He takes it down with the formula, "Thou art the thunderbolt of Indra, killer of Vṛtra; may he kill his enemy through thee."[11] Held at the yoke, it is brought within the Mahāvedi silently. The Adhvaryu bathes the horses silently. He yokes the horse to be yoked to the south with the formula, "I yoke thee with the yoke of sacrifice with the impulse of Mitra-Varuṇa the controllers."[12] He cleanses his back silently. Similarly he yokes the horse to be yoked on the northern side. Similarly he yokes the additional horse to the north. Similarly he cleanses their backs. Following the yoking to this chariot all vehicles are yoked. The elephants are equipped with girths. Loads of pieces of cloth are twined around; stringes for gold coins are tied to the fringes of pieces of cloth. He causes the Dakṣiṇās to be brought in in multitudes.

He makes offerings on the Gārhapatya with two verses addressed to Sūrya.[13] He makes an offering on the Āgnīdhra fire with the *nayavatī* verse.[14] The Dakṣiṇā cows are released along the southern path. Whatever the sacrificer gives, he gives commencing with gold itself. Then pieces of cloth, then vehicles with animals yoked to them, cattle and horses, and lastly elephants and men. The chariots pass beyond without being given. They do not run the race when they yet belong to others. The sacrificer gives away his chariot to the Adhvaryu only orally. He assigns only orally to the Brahman the four-feeted animals and land. When the sacrificer has assigned the Dakṣiṇās orally, the Adhvaryu offers three Marutvatīya cups. The Nārāśaṁsa goblets which have been swollen lie down below the resting wood of the southern Havirdhāna cart for the offering to Mahendra.

XII.8

(The Adhvaryu) asks for the trough of Vetasa and sixteen Vāyavya cups. For this (sacrificer) sixteen varieties of water collected from different quarters lie down placed to the east of the axle of the southern Havirdhāna cart and to the west of the support (of the yoke). Out of them (the waters brought from) flowing waters are towards the east and those from the Sarasvatī are towards the west. The Adhvaryu offers clarified butter over those from flowing waters with the mantra, "You are approaching. They have taken divine sweet waters, full of strength, yearning for

11. TS I.7.7.1
12. TS I.8.15.1
13. Namely *udu tyam* ... and *citraṁ devānām* ... TS I.4.43.1 cf. BaudhŚS XI.6.
14. Namely, *agne naya supathā* ... TS I.4.43.1. cf. BaudhŚS XI.6.

पौत्राय दत्तेति । अपां पतिरसीत्यपांपतीयाः पुंनाम्नो वोत्सस्य समुद्रिया वा। वृषास्यूर्मिरित्यौर्म्याः । वृषसेनो ऽसीति पल्वल्याः । व्रजक्षित स्थेति कूप्याः। मरुतामोज स्थेति निवेष्ट्याः । सूर्यवर्चस स्थेत्यतिदृश्याः । सूर्यत्वचस स्थेत्यातपति वर्ष्याः । मान्दा स्थेति ह्रादुन्यः । वाशा स्थेति पृष्वाः । शक्करी स्थेति गोरुल्ब्याः । विश्वभृत स्थेति पयः । जनभृत स्थेति दधि । अग्नेस्तेजस्या स्थेत्याज्यम् । अपामोषधीनाꣳ रस स्थेति मधु । अथ सारस्वतीरभिजुहोत्यपो देवीर्मधुमतीरगृह्णन्नूर्जस्वती राजसूयाय चितानाः । याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ राष्ट्रदा स्थ राष्ट्रं दत्त स्वाहेति । गृह्णाति पर्णमयेन राष्ट्रदा स्थ राष्ट्रममुष्मा आमुष्यायणायामुष्य पुत्रायामुष्य पौत्राय दत्तेति । अथैना वैतसे द्रोणकलशे समवनयति देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वाना इति । अथैना अन्तरेण होतुश्च धिष्णियं ब्राह्मणाच्छꣳसिनश्च

royal consecration, with which they sprinkled Mitra and Varuṇa and with which they led Indra beyond the enemies. You are givers of kingdom; do you grant kingdom, svāhā.[1] He takes them with the cup of *Butea frondosa* with the formula, "You are givers of kingdom; do you grant kingdom to N.N., of N.N. gotra, son of N.N., Grandson of N.N."[1] Of ocean or a fountain with masculine name or of a pond with the formula, "Thou art the ocean; they have taken divine sweet waters ..., you are givers of kingdom...."[1] Of the waves with the formula, "Thou art the male wave; they have taken divine sweet waters ... you are givers of kingdom...."[1] Of a pond with the formula, "Thou art with mighty army; they have taken divine sweet waters ..., you are givers of kingdom...."[1] Of a well with the formula, "You are dwellers in a surrounded place; they have taken divine sweet waters ...; you are givers of kingdom...."[1] Of a whirl-pool with the formula, "You are the vigour of Maruts, they have taken divine sweet waters...; you are givers of the kingdom ..."[1] Of the waters whose bottom is visible with the formula, "You are the brilliance of the sun; they have taken divine sweet waters...; you are givers of kingdom...[1] Of the rain waters visible in the sun with the formula, "You are envelopers of the sun, they have taken divine sweet waters..., you are givers of kingdom..."[1] Of a pool with the formula, "You are delightful; they have taken divine sweet waters...; you are givers of kingdom...."[1] Of dew with the formula, "You are obedient; they have taken divine sweet waters ...; you are givers of kingdom...."[1] Of the caul of cows with the formula, "You are capable; they have taken divine sweet waters ...; You are givers of kingdom..."[1] Of milk with the formula, "You are supporters of all; they have taken divine sweet waters ...; you are givers of kingdom....[1] Of curds with the formula, "you are supporters of men; they have taken divine sweet waters ...; you are givers of kingdom...."[1] Of clarified butter with the formula, "You are furnished with the brilliance of fire; they have taken divine sweet waters...; you are givers of kingdom...."[1] Of honey with the formula, "You are the essence of waters and plants; they have taken divine sweet waters...; you are givers of kingdom...."[1]

He makes an offering over the water of Sarasvatī with the mantra, "They have taken divine sweet waters, full of strength, yearning for royal consecration with which they sprinkled Mitra and Varuṇa and with which they led Indra beyond the enemies. You are givers of kingdom; do you grant kingdom, svāhā."[1] He takes it with a cup of *Butea frondosa* with the formula, "You are givers of kingdom; do you give kingdom to N.N., belonging to the gotra of N.N., son of N.N. and grandson of N.N."[1] He pours it into a trough finished with cane with the formula, "O divine sweet waters, do you be mixed up with sweet waters winning great valour for the

1. TS I.8.11.1 Out of a mass, sixteen formulas have been suitably formulated by conjunction. For *atidṛśyāḥ* VādhŚS X.4.13 has *paridṛsnīyā*. ĀpŚS XVIII.13.11 has *yāsu rūpāṇi paridṛśyante*.

सादयत्यनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरिति । अत्र ये ऽर्थ्याः प्रेका अध्वर्योस्तानावसथꣳ हरन्ति । अथ ये ऽनर्थ्या अपस्तानभ्यवहरन्ति । अनभिहुतानाꣳ सारस्वतीनां वसतीवरीर्दशपेयाय परिशाययन्ति ॥ ८ ॥ तृतीयः ॥

अथात्रैव तिष्ठन्याचति दर्भनाडीꣳ शतमानꣳ हिरण्यं चत्वारि नानावृक्ष्याणि पात्राणि तार्प्यं चोष्णीषं चैकशतं च दर्भपुञ्जीलानि दध्युदुम्बरꣳ शष्पाणि धनुश्चेषूꣳश्चेति । स दर्भनाड्याꣳ शतमानꣳ हिरण्यं प्रग्रथ्नात्यनि-भृष्टमसि वाचो बन्धुस्तपोजा इति । अथैनद्वैतसे द्रोणकलशे ऽवदधाति सोमस्य दात्रमसीति । हिरण्येनोत्पुनाति शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चिताना इति । गृह्णाति पर्णमयेन सधमादो द्युम्निनीरूर्ज एत अनिभृष्टा अपस्युवो वसानाः । पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर्मातृतमास्वन्तरिति । पुरस्तादासीनाय ब्रह्मणे प्रयच्छति । एतयैव गृहीत्वा दक्षिणत आसीनायौदुम्बरेण राजन्याय प्रयच्छति । एतयैव गृहीत्वा पश्चादासी-नायाश्वत्थेन वैश्याय प्रयच्छति । एतयैव गृहीत्वोत्तरत आसीनाय नैयग्रोधेन जन्याय प्रयच्छति । अथैतं प्रेकमाग्नीध्रꣳ हृत्वापिधाय प्रज्ञातं निदधाति। अथ यजमानं तार्प्यं परिधापयति क्षत्रस्योल्बमसीति । क्षत्रस्य

ruler."[1] He places them (i.e. all the waters) between the mounds of the Hotṛ and the Brāhmaṇācchaṁsin with the formula, "Unoffended, do you sit down, strong and granting great vigour to the ruler."[1] Out of the various waters the remnants which are not deviating from a purpose are carried to the Adhvaryu's residence; those which are deviating from a purpose are disposed in water. The waters of Sarasvatī over which offering is not made are retained as Vasatīvarī water for the Daśapeya sacrifice.

XII.9

Standing here only, (the Adhvaryu) asks for a Darbha-blade, gold weighing a hundred mānas, four wooden pots of different trees, a lower garment of linen, a turban, a hundred and one Darbha-clusters, curds, fruit of *Ficus glomerata*, young grass, a bow and arrows. He fastens with the darbha-blade the piece of gold weighing a hundred mānas with the formula, "Thou are not parched, friend of speech, born of heat."[1] He puts it into the trough of Vetasa with the formula, "Thou art to be given away for Soma."[1] He purifies (the waters) by means of the gold with the formulal, "O you bright ones, I purify you with the bright; the glittering ones, with glittering. You immortal ones, with the immortal, svāhā, yearning for royal consecration."[1] He takes (the waters) with the cups of *Butea frondosa* with the verse, "These (are) rejoicing together, brilliant, strong, active; in these most motherly waters has Varuṇa, the child of waters made his abode."[1] He gives these waters to the Brahman seated in front. Having received them with the same verse, he hands them over in the cup of *Ficus glomerata* to the Rājanya seated to the south. Having received with the same verse, he hands them over in the cups of *Ficus religiosa* to a Vaiśya seated to the west. Having received with the same verse, he hands them over to a common man seated towards the north in a cup of *Ficus Indica*. Having carried the remnants in the Āgnīdhra chamber and having covered them, he keeps them knowingly.

He makes the sacrificer wear the lower linen garment with the formula, "Thou art the caul of royal power."[2] The sacrificer wears the lower linen garment with the formula, "Thou art the womb of ruling power."[2] He suspends the turban over the navel. (The Adhvaryu) purifies him with a hundred and one clusters of Darbha-blades with the normal formulas. Cleansing him, he makes him eat curds, fruit of *Ficus glomerata* and young grass. He leads him towards the east with seven *āvid* formulas, "Informed is Agni lord of the house, informed is wide-famed Indra, informed is all-knowing Pūṣan, informed are Mitra and Varuṇa, the promoters of

1. TS I.8.12.1
2. TS I.8.12.2

योनिरसीत्यासजते तार्प्यम् । अभीव नाभिमुष्णीषं पर्यस्यति । अथैनमेकशतेन दर्भपुञ्जीलैः पवयति नित्येन पवनेन । अथैनमुन्मृजन्नाशयति दध्युदुम्बरꣳ शष्पाणीति । अथैनमाविद्भिः प्राञ्चमानयत्याविन्नो अग्निर्गृहपतिरिति सप्तभिरनुच्छन्दसम् । अथैनं यजमानायतने तिष्ठन्तं प्राहैष वो भरता राजेति येषाꣳ श्रेष्ठी भवति । सोमो ऽस्माकं ब्राह्मणानाꣳ राजेतीतरे प्रत्याहुः । अथास्मै धनुः प्रयच्छतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यादिति । शत्रुबाधना स्थेतीषून् । शत्रून्मे बाधध्वमितीतरः प्रतिगृह्णाति पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पातेति । अथ हिरण्यवर्णावुषसाꣳ विरोक इति त्रिष्टुभा बाहू उद्गृह्णाति । अथैनꣳ सꣳशास्ति मनसैव दिशो ऽनुप्रक्राम मनसोर्ध्वा-मनूज्जिहीष्वेति । अथैनं वाचयति ॥ ९ ॥

समिधमातिष्ठोग्रामातिष्ठ विराजमातिष्ठोदीचीमातिष्ठोर्ध्वामातिष्ठेति। अथात्रैव तिष्ठन्याचति मारुतं चैकविꣳशतिकपालं वैश्वदेवीं चामिक्षाम् । तस्य यो ऽरण्ये ऽनुवाक्यो गणस्तेन मध्यमानि कपालान्युपहितानि भवन्ति राजसूयगणाभ्यामितराणि । ताभ्यां चरति मरुद्भ्यो ऽनुब्रूहि मरुतो यजेति विश्वेभ्यो देवेभ्यो ऽनुब्रूहि विश्वान्देवान्यजेति । अनिष्टस्विष्टकृते एवैते हविषी अपिधाय प्रज्ञाते निदधाति । अथ याचति शार्दूलचर्म

law, informed are heaven and eart abiding by the vows, informed is goddess Aditi the multiformed, informed is this N.N., of N.N. gotra, among these subjects. In this kingdom for great ruling power, for great overlordship, for kingship over the people."[2] With regard to him standing on his seat, he says "O Bharatas, this is your king." (He addresses them) of whom he is the lord.[2] Others (the priests) say, "Soma is the king of us the brāhmaṇas"[2] He hands over the bow to him with the formula, "Thou art the thunderbolt of Indra, killer of enemies. May he kill the enemy through thee."[2] He hands over the arrows with the formula, "You are expellers of enemy."[2] Saying "Do you expel my enemies," he receives them with the formula, "Guard me from behind, guard me across, guard me all around, guard me from the quarters, guard me from all deadly things."[2] He raises his arms with the Triṣṭubh verse, "(O my arms) glittering like gold and strong as iron pillars, O Varuṇa and Mitra (in valour), do you ascend the seat of the chariot at the rising up of dawn and at sunrise and therefrom gaze at Aditi and Diti."[2] The Adhvaryu then instructs him, "Do thou traverse the quarters one by one mentally; do thou go upwards mentally," Then he makes him recite.

XII.10

"Do thou mount the rising direction; may Gāyatrī among the metres help thee; Trivṛt among the stomas; Rathantara among the Sāmans; Agni among the gods; the brāhmaṇa class the treasures. Do thou mount the fierce direction (south); may Triṣṭubh among the metres help thee; Pañcadaśa among the stomas; Bṛhat among the Sāmans; Indra among the gods; the ruling class the treasures. Do thou mount the western direction, may Jagatī among the metres help thee; Saptadaśa among the stomas; Vairūpa among the Sāmans, Maruts among the gods, the settlers the treasures. Do thou mount the northern direction; may Anuṣṭubh among the metres help thee; Ekaviṁśa among the Stomas. Vairāja among the Sāmans, Mitra-Varuṇa among the gods, might the treasures. Do thou mount the upper direction; may Paṅkti among the metres help thee; Triṇava and Trayastriṁśa among the Stomas, Śākvara and Raivata among the Sāmans, Bṛhaspati among the gods, and brilliance the treasures."[1]

Standing here only, he asks for the cake on twentyone potsherds and Amikṣā for Viśve Devas. The middle potsherds are laid down with the names of Maruts in the group mentioned in the Anuvāka of the Taittirīya Āraṇyaka,[2] namely, Dhuni, Dhvānta, Dhvana, Dhvanayan, Nilimpa, Vilimpa and Vikṣipa. Others potsherds are laid down with the name in the two groups of names mentioned in the two groups pertaining to the Rājasūya, namely Īdṛṅ, Anyādṛṅ, Etādṛṅ, Pratidṛṅ, Mita, Sammita

1. TS I.8.13.1-2
2. TA IV.24

सुवर्णरजतौ च रुक्मौ वाराही उपानहौ सीसं च लोहितायसं च। दक्षिणतः क्लीब आस्ते । अथ पुरस्तादभिषेकस्य षट् पार्थानि जुहोत्यग्नये स्वाहा सोमाय स्वाहेति । अथ यजमानायतने शार्दूलचर्म प्राचीनग्रीवमुत्तर-लोमोपस्तृणाति सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति । तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्याꣳ रुक्माभ्यां पर्युपास्यति । अमृतमसि मृत्योर्मा पाहीत्यधस्ताद्रजतमुपास्यति । दिद्योन्मा पाहीत्युपरिष्टात्सुवर्णꣳ शतातृण्णम् । अथावेष्टा दन्दशूका इति दक्षिणत आसीनं क्लीबꣳ सीसेन विध्यति । सव्येन पादेन लोहितायसं निरस्यति निरस्तं नमुचेः शिर इति। अत्रास्मा अभिषेकान्संप्रगृह्णन्ति । तान्सो ऽवेक्षते ॥ १० ॥

सोमो राजा वरुणो देवा धर्मसुवश्च ये । ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रꣳ सुवन्तामिति । अथ ब्रह्मणः पात्रमादाय तेनाभिषिञ्चति । अध्वर्युरेव यजुर्जपति । अभिषिञ्चन्तीतरे सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा क्षत्राणां क्षत्रपतिरस्यति दिवस्पाह्यसा-

and Sabhara (this is the first of the two groups); Śukrajyotis, Citrajyotis, Satyajyotis, Jyotiṣmān, Satya, Ṛtapā and Atyaṁhas (this is the second group).[1] The Adhvaryu offers the two oblations. He gives out the calls: "Do you recite the puronuvākyā for Maruts," "Do you recite the yājyā for Maruts." Also "Do you recite the puronuvākyā for Viśve Devas," "Do you recite the yājyā for Viśve Devas." While the Sviṣṭakṛt offering is not yet made, he put lids over the oblations and keeps them knowingly.

Then he asks for a tiger's skin, a sheet of gold and another of silver, footwear of the skin of a hog, lead and iron. A eunuch is seated towards the south. Prior to the consecratory bath of the sacrificer, he offers six Pārtha offerings: "To Agni svāhā, to Soma svāhā, to Savitṛ svāhā, to Sarasvatī svāhā, to Pūṣan svāhā, to Bṛhaspati svāhā."[1] On the sacrificer's seat he spreads the tiger's skin with its neck towards the east and having hairyside upwards with the formula, "Thou art the brilliance of Soma: may I possess brilliance like thee."[3] Having seated the sacrificer so as to face the east, he covers him with a golden and a silver sheet. He places under him the silver sheet with the formula, "Thou art ambrosia; do thou guard me from death."[3] With the formula, "Do thou guard me from thunderbolt," he places above him a golden sheet with a hundred pores. With the formula, "The biting flies are propitiated through offering,"[3] he strikes a the eunuch seated towards the south with the lead. With the left leg he throws away the piece of iron with the formula, "The head of Namuci is driven away."[3] At this stage the materials for consecratory bath are taken up for him. He gazes at them.

XII.11

(With the verse) "King Soma, Varuṇa, law-promoter gods—may they promote thy speech; may they promote thy vital breath; may they promote thy eye; may they promote thy ear."[1] Taking up the Brahman's cup, he sprinkles with it. The Adhvaryu himself murmurs the formula, and others sprinkle. (The formula is) "I sprinkle thee with the lustre of Soma, with the brilliance of Agni, with the radiance of the sun, with the power of Indra, with the valour of Mitra and Varuṇa, with the force of Maruts. Thou art the lord of royal powers. Guard us beyond luminaries, N.N."[1] The sacrificer wipes the streams upwards with the verse, "They have turned up together from below upwards following Ahi Budhniya. Going on sprinkling, they move like waters on the surface of the showering cloud."[2] Having collected into the main cup the drops of the clarified butter used for consecration, he goes

3. TS I.8.14.1

1. TS I.8.14.1
2. TS I.8.14.2

विति । अथोर्ध्वाधाराः समुन्मृष्टे समाववृत्रन्नधरागुदीचीरहिं बुध्नियमनु-संचरन्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयाना इति । अत्रैतेषामभिषेकाणां मुख्ये पात्रे सꣳस्रावान्समवनीय प्रतिहितस्य गृहानेति। अथान्वारब्धयोः प्रतिहिते च महिष्यां च जुहोति प्रजापते न त्वदेतान्यन्य इति । अत्रास्मा एष प्रतिहितो वरं ददाति । अथ प्रतिहिताय पात्रं प्रयच्छन्नाहेदं ते पात्रं दायाद्यमसद्यदा त्वाभिषिञ्चामीदं ते ऽसदिति । अथैतेनैव यथेतमेत्याग्नीध्रे प्रेरेकं जुहोति रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि यमेष्टमसि स्वाहेति । अत्रास्मै धनुः प्रयच्छति यदि पुरस्तादप्रत्तं भवति । समुन्मृष्टे समुत्क्रोशन्त्यभ्यषेच्ययमसावामुष्यायणो ऽमुष्य पुत्रो ऽमुष्य पौत्रो ऽमुष्य नप्ता राजसूयेनेति । अथ भूर्भुवः सुवरिति वाचं विसृजते । द्वाभ्यां मुखं विमृष्टे । गायत्रान्विष्णुक्रमान्क्रमते । अथोपरिष्टा-दभिषेकस्य षट् पार्थानि जुहोतीन्द्राय स्वाहा घोषाय स्वाहेति । द्वादश भूतानामवेष्टीर्जुहोति पृथिव्यै स्वाहान्तरिक्षाय स्वाहेति । अत्रैतयोर्हविषोः स्विष्टकृता चरति । अथैने अपिधाय प्रज्ञाते निदधाति ॥ ११ ॥

अथ वाराही उपानहावुपमुञ्चते पशूनां मन्युरसीति दक्षिणे पादे तवेव मे मन्युर्भूयादिति सव्ये । अथेमामभिमृशति नमो मात्रे पृथिव्या इति । तस्यां दक्षिणं पादमुपावहरति माहं मातरं पृथिवीꣳ हिꣳसिषमिति मा मां माता पृथिवी हिꣳसीदिति सव्यम् । अथान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रामति

to the residence of the deputy (of the sacrificer). While the deputy and the head queen have maintained contact with him, he makes the offering with the verse, "O Prajāpati, none other than thee ...." Here the deputy gives him a boon. While handing over the cup to the deputy, he says to him, "Let this cup serve as heirdom for thee; let it be procured when I shall besprinkle thee." Having returned by the same route by which he had gone, he offers the remnants of clarified butter with the formula, "O Rudra, thou art that which is offered to that great name of thine which promotes action and also that which is offered to Yama, svāhā."[3]

He gives him (the sacrificer) the bow if it was not given earlier. When the sacrificer has wiped up the streams, it is pronounced by all. "Besprinkled for Rājasūya is this sacrificer N.N. of N.N. Gotra, son of N.N., grandson of N.N., great grandson of N.N." The sacrificer releases speech with the utterance of *bhūr bhuvaḥ suvaḥ*. He wipes his face with two verses.[4] He strides Viṣṇu-steps with the verses in Gāyatrī-metre. Subsequent to the consecratory bath he offers six Pārtha offerings with the formulas "To Indra svāhā; to Ghoṣa svāhā; to Śloka svāhā; to Aṁśa svāhā, to Bhaga svāhā, to lord of Kṣetra svāhā."[5] He offers twelve compensating offerings with the formulas, "To Pṛthivī svāhā, to Antarikṣa svāhā; to the heaven svāhā; to Sūrya svāhā, to the moon svāhā; to the constellations svāhā; to the waters svāhā; to the plants svāhā; to the trees svāhā; to the moving and static svāhā; to the flying around svāhā; to the crawling ones svāhā."[5] Here he makes the Sviṣṭakṛt offering of the two oblations.[6] Having covered he keeps them (the oblations) knowingly.

XII.12

(The sacrificer) wears the footwear of the skin of a hog—in the right foot with the formula, "Thou art the spirit of cattle;" in the left with the formula, "May my spirit be like thine."[1] He touches the earth with the formula, "Obeisance to mother goddess."[1] He puts down the right foot on it with the formula "Let me not injure mother goddess;"[1] the left one with the formula, "May mother goddess not injure me."[1] He steps out towards the north inbetween the Cātvāla and the rubbish-heap with the formula, "Thou art the step of Viṣṇu; thou art the stepping of Viṣṇu; thou art the stepping out of Viṣṇu."[1]

3. TS I.8.14.2
4. namely, *prati tyaṁ nāma* ... and *sarve vrātā varuṇasyá'bhūvan* ... TS I.8.10.2, cf. BaudhŚS X.58; XI.7.
5. TS I.8.13.3
6. The remnants of the cake on twentyone potsherds for the Maruts and Āmikṣā for Viśve Devas. cf. BaudhŚS XII.10.

1. TS I.8.15.1

विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीति । उत्तरत एते रथा युक्तास्तिष्ठन्ति । तान्दृष्ट्वैव प्रतिहितो ऽवतिष्ठति । अथ प्रतिहितस्य धनुरादायाधिज्यं कृत्वा रथमातिष्ठति मरुतां प्रसवे जेषमिति । आप्तं मन इति कूबरमभिनिश्रयते । तं तदानीमेव प्रतिहितो ऽन्वातिष्ठति प्रससाहिषे पुरुहूत शत्रूनिति । त्रिष्टुभान्वारभत इति ब्राह्मणम् । अथ प्रतिहिताय धनुः प्रयच्छन्नाह राजन्य एष षट्त्रिꣳशत्सु शम्याप्रव्याधेषु निर्जयेन सहस्रेणावसितस्तस्मा इषुमस्यतादपैनꣳ राध्नुताज्जित्वैनं दक्षिणापथे-नात्याकुरुतादिति । राजन्य एव सꣳशिष्टो भवति राजपुत्रस्त इषुमसिष्यति स त्वापरात्स्यति तस्मा उत्तरवर्ग्येण संमृज्येषुं प्रयच्छतादिति । स तथा करोति ॥ १२ ॥ चतुर्थः ॥

अथाहाभिसर्प यजमान माहेन्द्रं ग्रहं ग्रहीष्यामीति । अन्वारब्धे यजमाने माहेन्द्रं ग्रहं गृह्णाति महाꣳ इन्द्रो य ओजसेत्यनुद्रुत्योपयामगृहीतो ऽसि महेन्द्राय त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिर्महेन्द्राय त्वेति । अथैतान्मणीन्याचति राजतमौदुम्बरꣳ सौवर्णमिति । त एते नानासूत्रेष्वोता भवन्ति । तानुत्तरस्य हविर्धानस्य मध्यमे वꣳशे प्रग्रथ्याप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ् द्रुत्वा स्तोत्रमुपाकरोति । स्तुवते माहेन्द्राय । प्रस्तुते साम्नि संप्रैषमाहाजिसृत आजिं धावत दुन्दुभीन्समाघ्नताभिषोतारो ऽभिषुणुताग्नीदाशिरं विनयोलूखलमुद्वादय प्रतिप्रस्थातर्वारुणमेककपालं निर्वप सौम्यस्य विद्धीति । यथासंप्रैषं ते कुर्वन्ति । धावन्त्याजिसृतः । आघ्नन्ति दुन्दुभीन् । संप्रवदन्ति वाचः । संप्रोदिता वाचो ऽनुमन्त्रयते । शाम्यन्ति घोषाः शस्त्राय । होत्र एषोत्तमेति प्राहुः । होतुः कालात्पराङवर्तते ऽध्वर्युः । अभ्येनमाह्वयते होता ।

The chariots with horses yoked stand towards the north. Having gazed at them the deputy presents himself. Having taken up the bow from the deputy and having fastened the string, he ascends the chariot with the formula, "May I win (the enemies) in the impulse of Maruts."[2] He resorts to the pole of the chariot with the formula, "I have obtained the desired object."[2] The deputy stands by his side at that time with the verse, "O widely invoked Indra, thou assaultest the foes; may thy best strength, the gift be here. Do thou provide riches with thy right hand; thou art the lord of wealth-possessing rivers."[2] "He touches him with the Triṣṭubh verse" So says the Brāhmaṇa.[3] While handing over the bow to the deputy, the Adhvaryu says, "This ruler is set down with a thousand (cows) to be conquered at a distance of thirtysix throws of yoke-halter. Do thou shoot an arrow at him; offend him; having won him, drive him away towards the south." The ruler is also instructed: "The prince wil shoot an arrow at you, he will offend you; having wipes off the arrow with the upper garment, do you return it to him." He acts accordingly.

XII.13

(The Adhvaryu) says, "O sacrificer, do you come up; I shall take up the draught for Mahendra." While the sacrificer has maintained contact with him, he takes up the draught for Mahendra with the verse, "Indra who is great in might, like a cloud full of water, grows with the praise by Vatsa;[1] thou art taken up with a support. I take thee agreeable to Mahendra."[1] Having wiped around, he keeps it with the formula, "This is thy birth-place; for Mahendra thee."[1] At this stage he asks for the beads—of silver, Udumbara and gold. They are woven in different strings. After having tied them on the middle beam of the northern Havirdhāna cart, having touched water, having taken two darbha-blades, having restrained speech and having hastened to the west, he introduces the Stotra. The Stotra for Mahendra is chanted.

After the Prastāva of the Sāman has been chanted, he gives out the call, "O Chariteers, run the race, do you beat the drums; O pressers, do you press the Soma; O Agnīdh, do thou churn out the curdle milk; make the mortar resound; O Pratiprasthātṛ, do thou pour out paddy for a cake on one potsherd for Varuṇa and keep an eye on (the cooked rice) for Soma." They act following the calls. The chariots run. Drums are beaten. They make all sounds. The Adhvaryu recites over the sounds (the formula) "Do you make sound for Indra ...").[2] The sounds cease for the recitation of the Śastra. The chanters notify the Hotṛ: "This is the last (verse)." The Adhvaryu turns outwards in front of the Hotṛ. The Hotṛ invokes him.

2. TS III.4.11.4
3. TBr I.7.9.2

1. TS I.4.20.1
2. cf. BaudhŚS XI.8

प्रत्याह्वयते ऽध्वर्युः । शंसति । प्रतिगृणाति । प्रसिद्धमुक्थं प्रतिगीर्य प्राडेत्योद्यच्छत एतं माहेन्द्रं ग्रहम् । अनूद्यच्छन्त इतरान् । उपोद्यच्छन्ते नाराशंसान् । अथाश्रावयत्यो श्रावयास्तु श्रौषडुक्थशा यज सोमस्येति । वषट्कृतानुवषट्कृते द्विर्जुहोति । तथैव द्विर्द्विर्नाराशंसाननुप्रकम्पयन्ति । द्विर्हुतो माहेन्द्रः परिशेते । आयन्ति रथाः । आगतान् । रथान्दृष्ट्वा जपति समहमिन्द्रियेण वीर्येण सं मयेन्द्रियं वीर्यमिति। अथान्तरेण चात्वा-लोत्करावुदङ्ङुपनिष्क्रामति । उत्तरत एते रथा युक्तास्तिष्ठन्ति। तान्दृष्ट्वैव प्रतिहितो ऽवतिष्ठति । अथ प्रतिहितस्य धनुरादायाधिज्यं कृत्वा रथमातिष्ठति मरुतां प्रसवे जेषमिति । आप्तं मन इति कूबरमभिनिश्रयते। तं तदानीमेव प्रतिहितो ऽन्वातिष्ठति प्रससाहिषे पुरुहूत शत्रूनिति । त्रिष्टुभान्वारभत इति ब्राह्मणम् । अथ प्रतिहिताय धनुः प्रयच्छन्नाहेदं ते धनुर्दायाद्यमसद्यदा त्वाभिषिञ्चामीदं ते ऽसदिति । अथैतेनैव यथेतमेत्यान्तरेण चात्वालोत्करावुपातीत्य पूर्वया द्वारा हविर्धानं प्रपाद्य प्राञ्चं रथमावर्त्य तिष्ठति ॥ १३ ॥

तदेतान्मणीन्याचति राजतमौदुम्बरं सौवर्णमिति । सव्ये हस्ते राजतं प्रतिमुञ्चत इयदस्यायुरस्यायुर्मे धेहीति दक्षिण औदुम्बरमूर्गस्यूर्जं मे धेहीति दक्षिण एव सौवर्णं युङ्ङसि वर्चो ऽसि वर्चो मयि धेहीति ।

The Adhvaryu responds. The Hotṛ recites the Śastra; the Adhvaryu responds. Having responded to the reciting of the Śastra in the prescribed manner and having gone to the east, he lifts up the cup for Mahendra. The other (cups) are lifted up. (The Camasādhvaryus) lift up the Nārāśaṁsa goblets. The Adhvaryu causes to announce, "Do thou cause to listen." "Let it be heard," "O reciter of the Śastra, do you recite the yājyā for the offering of Soma." He offers twice at the Vaṣaṭ-utterance and at the second Vaṣaṭ-utterance. (The Camasādhvayus) shake twice the Nārāśaṁsa goblets in a similar manner. The cup for Mahendra which is offered twice stays on.

The chariots return. Seeing the chariots which have returned, the sacrificer murmurs the formula, "May I be (furnished) with power and valour; may power and valour (be obtained) by me."[3] He goes out towards the north inbetween the Cātvāla and the rubbish-heap. The chariots with horses yoked stand to the north. Having gazed at them, the deputy comes down. Having taken up the bow from the deputy and having adjusted its string, the sacrificer ascends the chariot with the formula, "May I conquer in the impulse of the Maruts."[4] With the formula, "I have obtained the desired object."[4] He resorts to the pole of the chariot. The deputy stands by his side at that time with the verse, "O widely invoked Indra, thou assaultest the foes ..."[4] "He touches him with the Triṣṭubh verse," so says the Brāhmaṇa.[5] While handing over the bow to the deputy, the Adhvaryu says, "Let this bow serve as thy heirdom; when I besprinkle thee, this would belong to thee." Having returned by the same route by which he had gone, having passed between the Cātvāla and the rubbish-heap, having led (the chariot) into the Havirdhāna-shed by the eastern door, and having turned the chariot so as to face the east, he stands.

XII.14

He asks for the beads of silver, Udumbara and gold. He ties on the sacrificer's left fist the silver bead with the formula (recited by the latter) "Thou art this much; thou art life; grant me life."[1] The Udumbara bead on the right fist with the formula, "Thou art strength; grant me strength."[1] The golden bead again on the right fist with the formula, "Thou art the yoker. Thou art radiance; grant me radiance."[1] At

3. TS I.8.15.1 : The words *sam maye 'ndriyaṁ vīryam* are absent. The exactly identical formula is not traced anywhere.
4. TS I.8.15.1
5. TBr I.7.9.2

1. TS I.8.15.2

अत्रास्मा आमिक्षामुपोद्यच्छते । तस्यां दक्षिणꣳ हस्तमुपावहरति मित्रो ऽसीति वरुणो ऽसीति सव्यम् । अथैनामभिमृशति समहं विश्वैर्देवैरिति । अथैनामपिधाय प्रज्ञातां निदधाति । तदेतान्मणीनेकस्मिन्सूत्र आवयति मध्यत औदुम्बरं करोति । तान्ग्रीवासु प्रतिषज्यैतेनैव यथेतमेत्याग्रेणाग्नीध्रं प्राञ्चꣳ रथमावर्त्यावतिष्ठति। अथाग्नीध्रे रथविमोचनीया जुहोत्यग्नये गृहपतये स्वाहेति चतस्रः स्रुवाहुतीः । अथास्यैतत्पुरस्तादेवाग्रेणाग्नीध्रꣳ रथवाहनं प्रागीषं योग्यकृत-मुपस्थितं भवति । तस्मिन्सह संग्रहीत्रा रथवाहने रथमादधाति। सुवर्गादेवैनं लोकादन्तर्दधाति । हꣳसः शुचिषदित्यादधाति। ब्रह्मणैवैनमुपावहरति ब्रह्मणादधाति । अतिच्छन्दसादधातीति ब्राह्मणम् । अथास्यैतत्पुरस्तादेव जघनेनाग्नीध्रं चतुरपस्त्रावं वाष्टापस्त्रावं वा विमितं कारितं भवति । तस्य मध्यत औदुम्बरीमासन्दीं निमिनोति क्षत्रस्य नाभिरसीति । तस्यामुत्तरमष्टनमधीवासमास्तृणाति क्षत्रस्य योनिरसीति । अथैनामासीदति । आसीदन्तमनुमन्त्रयते स्योनामासीद सुषदामासीद मा त्वा हिꣳसीदिति । मा मा हिꣳसीदितीतरः प्रत्याह । आसन्नमभिमन्त्रयते निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरिति । अथैनमृत्विजः पर्युपविशन्ति । पुरस्तादध्वर्युरुपविशति दक्षिणतो ब्रह्मा पश्चाद्धोतोद्गातोत्त-रतः । ततः प्राञ्चो वोदञ्चो वा रत्निनः । सो ऽध्वर्युमभिवदति ॥ १४ ॥

this stage he brings him the Āmikṣā. (The sacrificer) puts his right hand into it with the formula, "Thou art Mitra."[2] The left one with "Thou art Varuṇa."[2] He touches it with the formula, "May I be (united) with Viśve Devas."[2] Having covered it, the Adhvaryu keeps it knowingly. He weaves the beads into a single thread; he puts the Udumbara one in the middle. Having suspended them into the neck, having come back by the same route by which he had gone and having turned the chariot in front of the Āgnīdhra chamber so as to face the east, he stops. The Adhvaryu offers on the Āgnīdhrīya fire four spoonfuls pertaining to the unyoking of the chariot, respectively with the formulas, "To Agni lord of the house svāhā; to Soma the lord of plants svāhā; to the power of Indra svāhā; to the brilliance of the Maruts svāhā."[1] A chariot-carrying wagon with its pole towards the east with oxen yoked is already kept ready in front of the Āgnīdhra chamber. The Adhvayu keeps the chariot together with the charioteer upon the wagon. "He thereby keeps it away from the heavenly world."[3] He raises the chariot on the wagon with the verse, "The chariot (is) seated on the wagon, the illuminating, lying in the midregion, like the Hotṛ seated within the altar, the wandering seated in a residence, seated for human being, seated in a thing to be chosen, seated by the cosmic order, seated in the varied protection, born of waters, born in the earth, born of law, born of wood, truth and developing."[4] "He takes it down with a formula; raises with a formula, He raises with the verse in the Aticchandas metre."[3] So the Brāhmaṇa says.

A square shed with four or eight leakages is already got prepared for him to the west of the Āgnīdhra chamber. In its centre he fixes a stool of Udumbara with the formula, "Thou art the navel of ruling power."[5] Over it he spreads a skin to be worn as a garment[6] With the formula, "Thou art the womb for a ruling person."[5] The sacrificer sits upon (the stool). The Adhvaryu follows the sitting of the sacrificer with the formula, "Do thou sit upon the pleasant one; do thou sit upon one easy for sitting; may it not injure thee."[5] The other one (i.e. the sacrificer) responds, "May it not injure me."[5] He recites over the sacrificer who is seated the verse, "Varuṇa who maintains the order, the doer of good deeds, has sat down in the house for sovereignty."[5] The priests sit down around him (the sacrificer). The Adhvaryu sits to the east, the Brahman to the south, the Hotṛ to the west, and the Udgātṛ to the north. The Ratnins sit down to the east or to the north. He (the sacrificer) says to the Adhvaryu:

2. TS I.8.16.1
3. TBr I.7.9.6
4. TS I.8.15.2 This verse occurs in the various Vedic texts and is explained in different aspects. Bhaṭṭa Bhāskara in his commentary on the TS-passage has explained this verse in three ways: Adhyātma, Adhidaiva and Adhiyajña.
5. TS I.8.15.2
6. *uttaramaṣṭanam* is obscure. Other Sūtra texts have *kṛttyadhīvāsa*.

ब्रह्मा३निति । त्वꣳ राजन्ब्रह्मासीत्याहाध्वर्युः सवितासि सत्यसव इति । ब्रह्मा३निति ब्रह्माणम् । त्वꣳ राजन्ब्रह्मासीत्याह ब्रह्मेन्द्रो ऽसि सत्यौजा इति । ब्रह्मा३निति होतारम् । त्वꣳ राजन्ब्रह्मासीत्याह होता मित्रो ऽसि सुशेव इति । ब्रह्मा३नित्युद्गातारम् । त्वꣳ राजन्ब्रह्मासीत्याहोद्गाता वरुणो ऽसि सत्यधर्मेति। सुश्लोका३ꣳ इति क्षत्तारम् । त्वꣳ राजन्सुश्लोको ऽसीत्याह क्षत्ता । सुमङ्गला३ꣳ इति संग्रहीतारम् । त्वꣳ राजन्सुमङ्गलो ऽसीत्याह संग्रहीता । सत्यराजा३निति भागदुघम् । त्वꣳ राजन्सत्य-राजासीत्याह भागधुक् । सप्त पुण्यनाम्नो ऽभ्युद्याथास्मै स्फ्यं प्रयच्छतीन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तेन मे रध्येति । तेन ते रध्यासमितीतरः प्रतिगृह्णाति । तꣳ संप्रयच्छति सूताय सूतग्रामणिने सजाताय सजातग्रामणिने संग्रहीत्रे ऽक्षावापगोव्यच्छाभ्यामन्ततः । तेन तौ मध्यतो ऽधिदेवनमुद्धत्य तिस्रः पञ्चाशतः सौवर्णानक्षान्निवपतः । अथास्मै पञ्चाक्षानपच्छिद्य प्रयच्छति दिशो ऽभ्ययꣳ राजाभूदिति । ताꣳस्तदानीमेवाक्षेष्वपिसृजति । अथै-तमोदनमुद्बुवते । नानाꣳशिनौ ब्रह्मा च यजमानश्च समानाꣳशिनौ सूतग्रामणिनौ समानाꣳ शिनौ क्षत्तसंग्रहीतारौ । स यो नु मताक्ष इव स राज्ञ आसन उप-विश्य चतुःशतमक्षानपच्छिद्याहोद्भिन्नꣳ राज्ञ इति । तानेव मनाक्समन्तानिव कृत्वाह कृतं ब्राह्मणस्येति । अथैतमोदनमुद्बुवते । समानाꣳशिनौ ब्रह्मा च यजमानश्च नानाꣳशिनौ सूतग्रामणिनौ नानाꣳशिनौ क्षत्तसंग्रहीतारौ । स यः पराजयते तस्यैनं कुले क्षत्ता पाचयति । यावदेष ओदनः पच्यते तावदेष होता शौनःशेपमाख्यापयते हिरण्मये कशिपावासीनः । तस्मा अध्वर्युः प्रतिगृणाति हिरण्मये कूर्च आसीनः ॥ १५ ॥

XII.15

"O Brahman,," "You O King, are the Brahman"[1] says the Adhvaryu, "You are Savitṛ of true impulse." He says to the Brahman, "O Brahman," "You O King, are the Brahman"[1] says the Brahman, "You are Indra of true valour."[1] He says to the Hotṛ, "O Brahman," "You O king are the Brahman." says the Hotṛ, "You are Mitra the very kind."[2] He says to the Udgātṛ, "O Brahman," "You O King are the Brahman." Says the Udgātṛ, "You are Varuṇa of true law."[2] He says to the chamberlain, "O Suśloka." "You O King, are Suśloka" says the chamberlain. He says to the charioteer, "O Sumaṅgala." "You O King, are Sumaṅgala," says the charioteer. He says to the tax-collector, "O Satyarājan." "You O King, are Satyarājan" says the tax-collector. Having addressed seven persons having auspicious names. he (the sacrificer) hands over the wooden sword to each of them with the formula, "Thou art the thunderbolt of Indra, killer of what belongs to Vṛtra; do thou kill my (enemies)."[2] Each latter receives it saying "Let me kill your (enemy)." He hands it over serially to a groom, to a groom who is a village-chief, to a kinsman, to a kinsman who is a village chief, to a charioteer, and finally to a keeper of the gambling table and to one who torments a cow. Having dug out the gambling place in the centre, they pour down one hundred and fifty dice of gold.

Having taken out five dice, he hands them over to him (sacrificer) with the formula, "This (sacrificer) has become the king over the quarters."[2] He immediately inserts them into the dice. They then announce cooked rice as the stake. The Brahman and the sacrificer have different shares; the groom and the village-chief get a common share; the chamberlain and the charioteer get a common share. One who is an expert in dice takes the king's seat and having seized one hundred and four gold dice says, "The king's share is taken away." Having made them touch each other a little at the edges, he says, "The brāhmaṇa has won the Kṛta." Again they annoounce cooked rice as the stake. The Brahman and the sacrificer get a common share; the chamberlain and the village-chief have different shares; the groom and the charioteer get different shares. One who is defeated—at his residence the groom cooks the rice-grains. While the rice is being cooked, the Hotṛ seated on a golden mat, is made to tell the legend of Śunahśepa. The Adhvaryu seated on a bunch of golden sticks responds to him.

1. TS I.8.16.1
2. TS I.8.16.2

ओ३ होतस्तथा होतः सत्य३ होतररात्स्म होतरिति । यद्यु वै होता नाध्येत्यन्य उ होत्राशꣳसी शꣳसति । तस्मा उ प्रतिप्रस्थाता प्रतिगृणाति । परःशतं भवतीति ब्राह्मणम् । यदैष ओदनः पक्वो भवत्यथैनमेकधोद्धृत्य ब्रह्मण उपहरति । तस्मा एताꣳश्चैव मणीन्ददाति शतं विपथं चतुष्पात्क्षेत्रम्। अथ होत्रे ददाति शतं विपथꣳ हिरण्मयं कशिपु । अथोद्गात्रे ददाति शतं विपथम् । अथाध्वर्यवे ददाति शतं विपथꣳ स्वरथं तिस्रः पञ्चाशतः सौवर्णानक्षान्हिरण्मयं कूर्चमिति । अत्रैभ्य एतन्निर्जयꣳ सहस्रं चतुर्धा कृत्वा ददाति । अथैनमेतयासन्द्या सद आवहन्त्या वा व्रजति । अन्वायन्त्येनमेते चमसाः । अत्रैतयोर्हविषोरिडामुपह्वयते । इडोपहूतं माहेन्द्रꣳ होता चैवाध्वर्युश्च संभक्षयतः । नराशꣳसपीतेन नाराशꣳसान् । होतृचमसमेवैते त्रयः समुपहूय भक्षयन्ति । यथाचमसं चमसान् । हिन्व म इत्यात्मानं प्रत्यभिमृशन्ते । नाप्याययन्ति चमसान् । सर्वभक्षा मार्जयन्ते। अथेन्द्राय त्वेन्द्राय त्वेत्येवं त्रिभिरुक्थ्यपर्यायैश्चरति । संतिष्ठते माध्यंदिनꣳ सवनम् । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । अथोक्थ्यं गृह्णाति । समानं कर्म पवमानात् । पवमानेन चरित्वा स्वे धामन्पशुभ्यां चरति । तयोर्नाना मनोते नाना देवते नाना प्रत्यभिमर्शनौ नाना वसाहोमौ समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा

XII.16

"Om O Hotṛ." "So O Hotṛ." "True O Hotṛ." "We have flourished O Hotṛ." If the Hotṛ has not learned it, somebody who is aware of the Hotṛ's recitings pronounces it. The Pratiprasthātṛ responds to him. "The story extends beyond a hundred (verses)." So says the Brāhmaṇa.[1] When the rice is cooked, the Adhvaryu scoops it at one attempt, and presents it to the Brahman. The sacrificer gives away to him the beads and a hundred chariots fit for going along untrodden path and a field measuring four measures.[2] To the Hotṛ he gives a hundred chariots going along untrodden path and golden bed. To the Udgātṛ he gives a hundred chariots going along untrodden path. To the Adhvaryu he gives a hundred chariots going along untrodden path, his own chariot, a hundred and fifty dice of gold and the bunch of gold sticks. He divides the cows to be conquered in four parts and gives them away. The sacrificer while being seated on the wooden stool is brought into the Sadas; or he himself comes. The goblets are brought subsequently. The Hotṛ invokes the Iḍā pertaining to the two oblations.[3] The Hotṛ and the Adhvaryu consume together the Māhendra draught along with the Iḍā which has been invoked. The Nārāsaṁśa goblets are consumed with the Narāśaṁśapīta formula.[4] The three (the Hotṛ, the Adhvaryu and the Pratiprasthātṛ) give consent to each other and consume the Hotṛ's goblet. The goblets are consumed by the respective Camasins. They touch themselves with the verse, "Do thou impel my limbs..."[5] The goblets are not swollen. Consuming in entirety, they cleanse them. The Adhvaryu goes through the procedure of three Ukthya rounds (each time taking up the draught) with "For Indra thee." "For Indra thee." The Midday pressing is concluded.

They proceed to the third pressing. Having offered the draught to Āditya in the prescribed manner, the Adhvaryu fills in the Āgrayaṇa vessel. Then he fills in the Ukthya vessel. The procedure upto the (Ārbhava) Pavamāna is similar. Having gone through the rite of the (Ārbhava) Pavamāna, he goes through the rite of offering (the organs of) two (savanīya) animals, in the proper order. For them there should be separate Manotā hymns, separate divinities, separate touchings (of the cooked organs), separate offerings of oily portion of flesh, a common offering to Vanaspati, a common Sviṣṭakṛt offering characterised by a call (to the Hotṛ by Maitrāvaruṇa), common Iḍā, common offering to the quarters. According to some teachers there should be separate offerings.[6] The rites up to the Avabhṛtha are

1. TBr I.7.10.6
2. *pād* = *nivartana* (20 rods) according to Bhavasvāmin.
3. cf. BaudhŚS XII.14
4. cf. BaudhŚS VII.17
5. TS III.2.5.3; BaudhŚS VII.17
6. cf. BaudhŚS IV.9

समान्यो दिशः। नाना दिश इत्येके। समानं कर्मावभृथात्। अथैतस्मिन्नवभृथ उपाददते चार्मपक्ष्यावुपानहौ । प्रप्लाव्य वाराही चार्मपक्षीभ्यामुदेति । सो ऽपामन्ते जुहोत्यपां नप्त्रे स्वाहेति । विषुवति दर्भस्तम्बे जुहोत्यूर्जो नप्त्रे स्वाहेति । पुनरेत्य गार्हपत्ये जुहोत्यग्नये गृहपतये स्वाहेति । प्रसिद्धो ऽवभृथः । उदयनीयेष्ट्येष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा नैव श्मश्रूणि वपते न केशान् । संतिष्ठत एष उक्थ्यो ऽभिषेचनीयश्चतुस्त्रिꣳशपवमानः सहस्रदक्षिण उदवसानीयान्तः॥ १६ ॥
पञ्चमः ॥

अथास्यैषा पुरस्तादेव जुष्टे देवयजने सप्तसु शम्याप्रव्याधेषु शाला कारिता भवति । सो ऽत्रैवाग्नेयमष्टाकपालं निर्वपति । हिरण्यं ददाति । शम्यान्यास उदवसाय वसति । सारस्वतं चरुम् । वत्सतरीं ददाति । द्वितीये शम्यान्यास उदवसाय वसति । सावित्रं द्वादशकपालम् । उपध्वस्तं ददाति। तृतीये शम्यान्यास उदवसाय वसति । पौष्णं चरुꣳ । श्यामं ददाति । चतुर्थे शम्यान्यास उदवसाय वसति । बार्हस्पत्यं चरुम् । शितिपृष्ठं ददाति । पञ्चमे शम्यान्यास उदवसाय वसति । ऐन्द्रमेकादशकपालम् । ऋषभं ददाति । षष्ठे शम्यान्यास उदवसाय वसति । वारुणं दशकपालम् । महानिरष्टं ददाति । अथ सप्तमे ऽहञ्छालामध्यवस्यति । एतदेवाहर्दीक्षते । अथ वै भवति सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरिस्रजां प्रयच्छतीति । अथैनं तीर्थादानीय पवयित्वा पुण्डरिस्रजिनमुदानीय दीक्षणीयामिष्टिं

similar.[7] For the Avabhṛtha they procure footwear with the two sides made of leather. Having floated the footwear of boars's skin on water, the sacrificer comes up with the footwear with leathern sides. The Adhvaryu makes an offering by the side of water with the formula, "To the great grandson of waters svāhā."[8] Midway he offers over the cluster of darbha-blades with the formula, "To the great grandson of strength svāhā."[8] Having returned back he makes an offering on the Gārhapatya with the formula, "To Agni lord of house svāhā."[8] The Avabhṛtha rite takes place as prescribed. Having performed the Udayanīyā Iṣṭi, he dedicates a barren cow to Mitra-Varuṇa. After the omentum has been offered in the prescribed manner, the sacrificer does not get his beard shaved nor the hair. This Abhiṣecanīya Ukthya sacrifice with the Pavamāna stotras of thirty four stomas and involving the Dakṣiṇās of a thousand cows comes to an end concluded with the Udavsānīyā Iṣṭi.

XII.17

For him a shed is already got prepared in an already approved sacrificial place at a distance of seven throws of a yoke-halter. Here he offers a cake on eight potsherds to Agni. He gives away gold (as Dakṣiṇā). Having moved to a place at a distance of a throw of a yoke-halter, he halts. He offers cooked rice to Sarasvatī. He gives away a heifer (as Dakṣiṇā). Having advanced at a distance of the second throw of the yoke-halter, he halts. He offers a cake on twelve potsherds to Savitṛ. He gives away a speckled (bull). Having advanced at a distance of the third throw, he halts. He offers cooked rice to Pūṣan. He gives away a blackish (bull). Having advanced at a distance of the fourth throw, he halts. He offers cooked rice to Bṛhaspati. He gives away a white-backed (bull). Having advanced at a distance of the fifth throw, he halts. He offers a cake on eleven potsherds to Indra. He gives away a bull. Having advanced at a distance of the sixth throw, he halts. He offers a cake on ten potsherds to Varuṇa. He gives away a castrated bull.

On the seventh day he stays at the shed. He gets initiated on that day. It is indeed said "(They act as related in that) they initiate (the sacrificer) and purchase the Soma the same day. (The Adhvaryu) gives a garland of lotuses (for non-relatedness)."[1] Having brought him (bathed) from a water-place, having ceremonially purfieid (with bunches of darbha-grass) and having made him wear a lotus garland, the Adhvaryu performs the Dīkṣaṇīyā Iṣṭi. At its conclusion the sacrificer

7. cf. BaudhŚS VIII.12-18
8. TS I.8.16.2

1. TBr I.8.2.1. The lotuses are both-made of gold and brought from the river according to Baudhāyana's view BaudhŚS XX.20.

निर्वपति । तस्याः सꣳस्थितायां मुष्टी चैव न करोति वाचं च न यच्छति। निदधत्यस्मा एतद्धविरुच्छिष्टं व्रतभाजनम् । अथ प्रायणीयामिष्टिं निर्वपति। हविष्कृता वाचं विसृजते । अत्रास्मा एतद्धविरुच्छिष्टं प्रयच्छन्ति व्रतभाजनम्। अथ प्रायणीयेन चरति । प्रायणीयेन चरित्वा पदेन चरति । पदेन चरित्वा दशभिः साण्डैर्वत्सतरै राजानं क्रीत्वोह्यातिथ्यं निर्वपति । आतिथ्येन प्रचर्य पुरस्तादुपसदाꣳ सौम्यं चरुम् । बभ्रुं ददाति । अथ मध्यमे उपसदावन्तरेण त्वाष्ट्रमष्टाकपालम् । शुण्ठं ददाति । अथोपरिष्टादुपसदां वैष्णवं त्रिकपालम् । वामनं ददाति । अथाहवनीयं प्रणयति । आहवनीयं प्रणीय सदोहविर्धाने संमिनोति ।.सदोहविर्धाने संमित्याग्नीषोमौ प्रणयति। अग्नीषोमौ प्रणीय यूपस्यावृता यूपमुच्छ्रयति । स्वर्वन्तं यूपमुत्सृज्याग्नीषोमीयं पशुमुपाकरोति। तस्य प्रसिद्धं वपया चरित्वा सारस्वतीर्वसतीवरीर्गृह्णाति। अथ पशुपुरोडाशं निर्वपति । इडान्तः पशुपुरोडाशः संतिष्ठते । पत्नीसंयाजान्तः पशुर्हृदयशूलान्त इत्येके । अथ वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्ति । अथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके ऽपो ऽच्छैति । अद्भिरुदैति ॥ १७ ॥

अग्निष्टोमं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्माश्विनाद्ग्रहात् । आश्विनं ग्रहं गृहीत्वा द्वे रशने आदाय यूपमभ्यैति । स्वर्वन्तं यूपमुत्सृज्याग्नेयं पशुमुपाकरोति । तस्य प्राजापत्यस्तूपर उपालम्भ्यो भवति । तयोः प्रसिद्धं वपाभ्यां चरित्वा प्रसर्पन्ति प्रातः

does not close the fists nor does he restrain speech.[2] The remnants of the oblations are preserved for him as a share of his Vrata-food. The Adhvaryu pours out paddy for the Prāyaṇīyā Iṣṭi. The sacrificer releases speech at the call to the preparer of the oblation-material. The remnants of the oblation are given to the sacrificer as a share of Vrata-food. The Adhvaryu offers the Prāyaṇīya offering. After having offered the Prāyaṇīya-offering, he goes through the rite of collecting the earth) of the foot-print.[3] Having performed the rite of foot-print, having purchased Soma with ten young bulls, and having carried it (to the Prāgvaṁśa shed) he performs the Ātithyeṣṭi. Having performed the Ātithyeṣṭi, he offers cooked rice to Soma prior to the Upasads. The sacrificer gives away a white and red bull. Inbetween the two middle Upasads he offers a cake on eight potsherds to Tvaṣṭṛ. The sacrificer gives away a weak bull. Subsequent to the Upasads he offers a cake on three potsherds to Viṣṇu. He gives away a short bull.

The Adhvaryu carries forth the Āhavanīya fire, Having carried forth the Āhavanīya fire, he erects the Havirdhāna and Sadas Sheds. Having erected the Havirdhāna and the Sadas sheds, he carries forth fire and Soma. Having carried forth fire and Soma, he raises the sacrificial post with the procedure therefor. Having furnished the sacrificial post with a splinter, he dedicates the animal to Agni-Soma. Having offered its omentum in the prescribed manner, he takes up Vasatīvarī waters from the river Sarasvatī. He then offers the Paśupuroḍāśa. The Paśupuroḍāśa is concluded with the invocation of Iḍā. The animal-sacrifice comes to an end with the Patnīsaṁyāja offerings; according to some teachers with the discarding of the heart-spike. After the Vasatīvarī waters have been carried around and instructions have been given in respect of the various milks, they pass over. They rise up at early dawn. Having up clarified butter in the various ladles and having taken down Soma (from the southern Havirdhāna cart), the Adhvaryu introduces the recitation of the Prātaranuvāka. When the Prātaranuvāka has been concluded, he approaches the waters. He comes with waters.

XII.18

The Adhvaryu employs the Kratukaraṇa verse as applied in the Agniṣṭoma.[1] The pressing of Soma (takes place) in the prescribed manner. Draughts are taken in the prescribed manner. The procedure upto the draught for the Aśvins is similar. Having taken the draught for the Aśvins and having taken up two cords, he approaches the sacrificial post. Having furnished the post with a splinter, he

2. cf. BaudhŚS VI.5
3. cf. BaudhŚS VI.13

1. He offers a spoonful of clarified butter with the verse *yam agne pṛtsu martyam* ... cf. BaudhŚS VII.4.

सवनाय । पूर्वस्यां द्वारि सूतग्रामण्यावुपतिष्ठतो ऽपरस्यां क्षत्तसंग्रहीतारौ। प्रसर्पतः पृच्छतः का ते माता का ते मातामहीति । स य आ दशम्यै संपादयत्यति तꣳ सृजन्ति । अथ यो न संपादयति दीर्घवꣳशेन तमुपानुदन्ति। स य आह वैश्या मे माता सावित्रीति वाति तꣳ सृजन्ति विशो विवाहान् गोप्तार इति वदन्तः । दशदशात्र चमसमभिसंजानते । ऋजुधा प्रातःसवनꣳ संतिष्ठते । प्रसर्पन्ति माध्यंदिनाय सवनाय । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मा दाक्षिणेभ्यः । दाक्षिणानि हुत्वा प्राकाशावध्वर्यवे ददाति स्रजमुद्गात्रे रुक्मꣳ होत्रे ऽश्वं प्रस्तोतृप्रतिहर्तृभ्यां द्वादश पष्ठौहीर्ब्रह्मणे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिन वाससी नेष्टापोतृभ्याꣳ स्थूरि यवाचितमच्छावाकायानड्वाहमग्नीधे । भार्गवो होता भवति । श्रायन्तीयं ब्रह्मसामं भवति वारवन्तीयमग्निष्टोमसामम् । ऋजुधा माध्यंदिनꣳ सवनꣳ संतिष्ठते । प्रसर्पन्ति तृतीयसवनाय । प्रसिद्धमादित्यग्रहेण चरित्वाग्रयणं गृह्णाति । समानं कर्मा पवमानात् । पवमानेन चरित्वा स्वे धामन्पशुभ्यां चरति । तयोर्नाना मनोते नाना देवते नाना प्रत्यभिमर्शनौ नाना वसाहोमौ समानो वनस्पतिः समानः स्विष्टकृत्प्रैषवान्समानीडा समान्यो दिशः । नाना दिश इत्येके । समानं कर्मावभृथात् । प्रसिद्धो ऽवभृथः । उदयनीययेष्ट्येष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते श्मश्रूण्येव वपते न केशान् । संतिष्ठत एषो ऽग्निष्टोमः सप्तदशो दशपेयः सहस्रदक्षिण उदवसानीयान्तः ॥ १८ ॥ षष्ठः ॥

अथ पञ्चहविषा दिशामवेष्ट्या यजते । आग्नेयमष्टाकपालं निर्वपत्यैन्द्रमेकादशकपालं वैश्वदेवं चरुं मैत्रावरुणीमामिक्षां बार्हस्पत्यं चरुमिति।

dedicates the animal to Agni. A hornless goat is to be offered to Prajāpati. After their omenta have been offered in the prescribed manner, the priests enter the Sadas for the morning pressing. The chamberlain and the village-chief appear at the eastern door, and the groom and the charioteer at the western door. To those entering (the Sadas) they ask, "Who is your mother? Who is your mother's mother?" They allow him to enter who tells the names up to the tenth generation. One who is unable to do so, him they drive away by means of a long bamboo. One who says "My mother is a Vaiśya woman" or "My mother is Sāvitrī, him they admit saying that "the Vaiśyas are the protectors of marriages." Here ten persons consume each one of the goblets. The morning pressing comes to a conclusion straightway.

They proceed to the midday pressing. The Soma-pressing is well known. Draughts are taken in the prescribed manner. The procedure up to the offerings pertaining to the Dakṣiṇās is similar. After having offered the oblations pertaining to Dakṣiṇās, the sacrificer gives two mirrors to the Adhvaryu. The garland of lotuses to the Udgātṛ; the golden plate to the Hotṛ; the horse to the Prastotṛ and Pratihartṛ, twelve heifers to the Brahman, a barren cow to the Maitrāvaruṇa; a bull to the Brāhmaṇācchaṁsin; two pieces of cloth to the Neṣṭṛ and the Potṛ; a wagon laden with barley and drawn by a single ox to the Acchāvāka, and an ox to the Agnīdh. The Hotṛ is one who belongs to the Bhṛgu gotra. The Śrāyantīya Sāman is chanted corresponding to the Brāhmaṇācchaṁsin's Śastra. The Vāravantīya is the Agniṣṭoma Sāman. The Midday pressing comes to a close straightway.

They proceed to the third pressing. Having offered the draught to Āditya in the prescribed manner, the Adhvaryu takes a draught in the Āgrayaṇa vessel. The ritual upto the (Ārbhava) Pavamāna is similar. After having gone through the (Ārbhava) Pavamāna rite, the Adhvaryu offers two animals in the proper order. For them there are separate Manotā hymns, separate deities, separate touching of the cooked organs, separate offerings of oily portion of flesh, a common offering to Vanaspati, a common Sviṣṭakṛt-offering characterised by a call by the Maitrāvaruṇa, a common Iḍā-invocation, and common offerings to the quarters. According to some teachers there should be separate offerings. The procedure upto the Avabhṛtha is similar. The Avabhṛtha takes place as is prescribed. After having performed the Udayanīyeṣṭi, the Adhvaryu dedicates a barren cow to Mitra-Varuṇa. After the omentum of the cow has been offered in the prescribed manner, the sacrificer gets his beard shaved on the southern corner of the Mahāvedi; he does not get his hair shaved. This Agniṣṭoma characterised by seventeen stomas—the Daśapeya sacrifice, involving the gift of a thousand cows ends with the Udavasānīyeṣṭi.

XII.19

The Adhvaryu performs the Diśām Aveṣṭi sacrifice of five oblations. He offers a cake on eight potsherds to Agni, a cake on eleven potsherds to Indra, cooked rice

अथ वै भवति हविषोहविष इष्ट्वा बार्हस्पत्यमभिघारयतीति । स हविषोहविष इष्ट्वा बार्हस्पत्यमभिघारयति । अन्वाहार्यमासाद्यैता आदिष्टदक्षिणा ददाति । अथ द्विपशुना पशुबन्धेन यजते । आदित्यां मल्हां गर्भिणीमालभते मारुतीं पृश्निं पष्ठौहीम् । गर्भिण्यादित्या भवत्यगर्भा मारुती । आदित्यया पूर्वया प्रचरति मारुत्योत्तरया । उच्चैरादित्याया आश्रावयत्युपाꣳशु मारुत्यै । संतिष्ठते यथा द्विपशुः पशुबन्धस्तथा । अथ सात्यदूतानाꣳ हविर्भिर्यजते । अश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालम् । अन्वाहार्यमासाद्य तिसृधन्वꣳ शुष्कदृतिं ददाति । तं प्रतिराजभ्यः प्रहिणोति । स यः प्रतिगृह्णाति मित्रो म इति तं वेद । अथ यो न प्रतिगृह्णात्यमित्रो म इति तं वेद । अथ पूर्वैः प्रयुजाꣳ हविर्भिर्यजते। आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालं बार्हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैश्वानरं द्वादशकपालम् । अन्वाहार्यमासाद्य दक्षिणꣳ रथवाहनवाहं ददाति । अथ पौर्णमासवैमृधाभ्यामिष्ट्वोत्तरैः प्रयुजाꣳ हविर्भिर्यजते । सारस्वतं चरुं निर्वपति पौष्णं चरुं मैत्रं चरुं वारुणं चरुं क्षैत्रपत्यं चरुमादित्यं चरुम् । अन्वाहार्यमासाद्योत्तरꣳ रथवाहनवाहं ददाति ॥ १९ ॥

अत्रैतद्द्वादशाहं व्रतं चरति । आङ्क्ते । न दतो धावते । अभ्यङ्क्ते । न प्रमन्दयते । युध्यते युद्ध आगते । अग्निहोत्रोच्छेषणव्रतो वा यजमानो भवति । भक्तमु पत्न्या आहरन्ति । अथास्यैतत्पुरस्तादेव जुष्टे देवयजने तिस्रः शालाः कारिता भवन्ति । स दक्षिणार्ध्याꣳ शालामध्यवसाय

to Viśve Devas, Āmikṣā to Mitra-Varuṇa and cooked ric to Bṛhaspati. It is indeed said in the Brāhmaṇa, "Having offered the oblations one by one, he pours clarified butter over the cooked rice to Bṛhaspati."[1] Having offered the oblations one by one, he pours clarified butter over the cooked rice for Bṛhaspati. Having placed the Anvāhārya cooked rice (within the altar), the sacrificer gives the prescribed Dakṣiṇās. Then he performs the animal-sacrifice of two animals. He offers a dew-lapped pregnant (cow) to Aditi, and a spotted heifer to Maruts. (The cow to be offered) to Aditi is pregnant; (the heifer to be offered) to Maruts is not pregnant. He first offers to Aditi; then to Maruts. He gives loudly the call in respect of the offering to Aditi; in a low tone to Maruts. The sacrifice comes to a conclusion like the one of two animals.

The sacrificer then offers Sātyadūta offerings. He offers a cake on twelve potsherds to the Aśvins and Pūṣan, cooked rice to truth speaking Sarasvant and a cake on twelve potsherds to Savitṛ of true impulse. Having placed the Anvāhārya cooked rice (within the altar), he gives away a bow with three arrows and a dried leather-bag. The Adhvaryu sends these to rival kings. One who receives these, him he takes as his friend; one who does not, him he understands as his foe. Then he offers the prior Prayuj offerings. He offers a cake on eight potsherds to Agni, cooked rice to Soma, a cake on twelve potsherds to Savitṛ, cooked rice to Bṛhaspati, a cake on eight potsherds to Tvaṣṭṛ, and a cake on twelve potsherds to Vaiśvānara Agni. Having placed the Anvāhārya cooked rice (within the altar), the sacrificer gives away the southern side horse of the chariot-carrying wagon. Having performed the Full-moon and the Vaimṛdha sacrifices, he offers the posterior Prayuj offerings. He offers cooked rice to Sarasvatī, cooked rice to Pūṣan, cooked rice to Mitra, cooked rice to Varuṇa, cooked rice to Kṣetrapati and cooked rice to Aditi. Having placed the Anvāhārya cooked rice (within the altar), the sacrificer gives away the northern side horse of the chariot-carrying wagon.

XII.20

At this stage the sacrificer observes the twelve days vow. He puts collyrium into his eyes; he does not cleanse his teeth; he applies clarified butter to his body; he does not comb his hair.[1] He fights if required.[2] If he likes, he takes the remnants of Agnihotra as food; cooked food is provided for the sacrificer's wife. For him three

1. TBr I.8.3.1

1. The printed text reads na *pramandayate* which seems doutbtful, Bhavasvāmin reads *praskandayate* and gives the meaning *na khaṭvāyāṁ śete na keśān vilikhate.*
2. He proceeds while reciting the verse *apendra dviṣato manah* TS III.5.8.1; 9.2 cf. BaudhŚS VII.4.

मथित्वाग्नीन्विहृत्य प्रतीचीनस्तोमाय केशवपनीयायातिरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते पौर्णमास्यै मे यजनीये अहन्सुत्या संपत्स्यत इति । तस्य तथा संपद्यते । प्रसिद्धेन कर्मणोपवसथादेति । अथ वसतीवरीः परिहृत्य पयाꣳसि विशिष्योपवसन्ति । अथातो महारात्र एव बुध्यन्ते । प्रातराज्यानि गृहीत्वा राजानमुपावहृत्य प्रातरनुवाकमुपाकरोति । परिहिते प्रातरनुवाके अपो अच्छैति । अद्भिरुदैति । अतिरात्रं क्रतुमुपैति । प्रसिद्धो ऽभिषवः । प्रसिद्धं ग्रहा गृह्यन्ते । समानं कर्मावभृथात् । प्रसिद्धो ऽवभृथः । उदयनीययेष्ट्येष्ट्वा मैत्रावरुणीं वशामुपाकरोति । तस्यै प्रसिद्धं वपया चरित्वा दक्षिणे वेद्यन्ते यानि कानि च लोमानि वापयते । संतिष्ठत एष प्रतीचीनस्तोमः केशवपनीयो ऽतिरात्रः सहस्रदक्षिण उदवसानीयान्तः । अथ मध्यमाꣳ शालामध्यवसाय मथित्वाग्नीन्विहृत्य व्युष्टये द्विरात्राय दीक्षते । तस्यापरिमिता दीक्षा द्वादशोपसदः । स तथा राजानं क्रीणाति यथा मन्यते द्विरात्रस्य मे सतो अमावास्याया उपवसथीये ऽहन्पूर्वमहः संपत्स्यत उत्तरस्मिन्नुत्तरमिति। संतिष्ठते व्युष्टिद्विरात्रः । अथोत्तरार्ध्याꣳ शालामध्यवसाय मथित्वाग्नीन्वि-हृत्योदयनीयायाग्निष्टोमाय दीक्षते । तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः । संतिष्ठत एष उदयनीयो ऽग्निष्टोमश्चतुष्टोमः सहस्रदक्षिण उदवसानीयान्तः । अथ देविकाहविर्भिर्यजते । अथ त्रैधातवीयया यजते। अथ सौत्रामण्या यजते । संतिष्ठते राजसूयो ऽर्धसप्तदशैर्मासैः । संतिष्ठते राजसूयः संतिष्ठते राजसूयः ॥ २० ॥ सप्तमः ॥

॥ इति द्वादशः प्रश्नः ॥

sheds are already got prepared in an agreeable sacrificial place. Having entered the southern shed, having churned out fire, having spread out fires, (the sacrificer) gets initiated for the Keśavapanīya Atirātra sacrifice with the number of stomas of the stotras serialy decreasing. The sacrifice involves more days of initiation than the normal number and twelve Upasad days. (The Adhvaryu) purchases Soma on such a day that he would be sure that his pressing would coincide with the full-moon day. It so happens. He proceeds upto the Upavasatha day in the prescribed manner. After having carried around the Vasatīvarī waters and having given instructions in regard to the various milks, they stay on.

They get up at early dawn. Having taken up clarified butter in various ladles in the morning and having taken down the Soma, he introduces the Prātaranuvāka. After the Prātaranuvāka has been concluded, he approaches the waters. He comes up taking up the waters. He adopts the Kratukaraṇa prescribed for the Atirātra. The pressing of Soma (taken place) as prescrihbed. The draughts are taken as prescribed., The procedure up to the Avabhṛtha is similar. Having performed the Udayanīyeṣṭi, he dedicates a barren cow to Mitra-Varuṇa. Having offered the omentum in the precribed manner, the sacrificer gets shaven his hair as might have grown. This Keśavapanīya Atirātra sacrifice involving the number of stomas of Stotras increasing backwards and a thousand cows as Dakṣiṇā ends with the Udavasānīyeṣṭi.

Having resorted to the middle shed, having churned out fire and having spread out fires. the sacrificer gets initiated for the Vyuṣṭi Dvirātra sacrifice. It involves more days of initiation than the normal number and twelve Upasad days. The Adhvaryu purchases Soma on such a day that he would be sure that his Upavasatha of the first day of the Dvirātra would coincide with the new-moon; and the second with the next day. The Vyuṣṭi Dvirātra comes to a conclusion.

Having resorted to the northern shed, having churned out fire and having spread out fires, the sacrificer gets initiated for the Udayanīya Agniṣṭoma. It has three days of initiation, three Upasad days and the pressing is on the seventh day. This Udayanīya Agniṣṭoma involving stotras of four stomas and Dakṣiṇās of a thousand cows comes to an end with the Udavasānīyeṣṭi. He then offers Devikā offerings, then the Traidhātavīyeṣṭi, then the Sautrāmaṇī.

The Rājasūya comes to an end after seventeen and a half months. The Rājasūya thus comes to an end; the Rājasūya thus comes to an end.

CHAPTER XII ENDS.

CHINTAMANI GANESH KASHIKAR, M.A., D.Litt., is a well-known authority on the Vedic literature, religion and culture whose contributions are internationally acknowledged. A score of books—critical editions, translations and general studies written in Sanskrit, English and Marathi languages are to his credit. A hundred research papers written by him are published in oriental journals of international repute. He attended several sessions of All India Oriental Conference as also International Sanskrit Conference and presented research papers which have been widely appreciated. He is the Chairman of the Regulating Council of the Bhandarkar Oriental Research Institute, Pune. He was closely associated for many years with the Vaidika Samsodhana Mandala, Pune, Centre for Advanced Study in Sanskrit, University of Pune and the Project of encyclopaedic Dictionary of Sanskrit on historical Principles, Deccan College Post-Graduate and Research Institute, Pune."